॥ अथ श्रीमदनुव्याख्यानटिप्पणी सन्न्यायरत्नावली प्रारभ्यते ॥

॥ प्रथमाध्यायः ॥

16369

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ नारायणमसंख्येयकल्याणगुणविग्रहं ॥ वंदे भक्त्या सदाध्वस्तदूषणं परमप्रियं ॥ १ ॥ नमो भगवते तस्मै व्यासरूपाय विष्णवे ॥ यत्प्रसादात्परं ज्ञानं प्राप्यते विबुधादिभिः ॥ २ ॥ श्रीमदानंदतीर्थाख्यान् गुरून्विद्यादिवाकरान् ॥ वंदे कुदृष्टिदुर्बोधध्वांतसिद्धांतदीपकान् ॥ ३ ॥ तत्कृतां ब्रह्मसूत्राणामनुव्याख्यां यथामति ॥ विवृणोम्यर्थगंभीरां हरितत्त्वप्रकाशिकां ॥ ४ ॥ ग्रंथादौ शिष्टाचारादिप्राप्तस्य मंगलाचरणरूपस्वेष्टदेवतानमस्कारस्य प्रारिप्सितग्रंथसमाप्तिप्रचयाद्यर्थत्वाच्छिष्टजनाग्रणीराचार्यः स्वेष्टदेवतां सन्नमति ॥ नारायणमिति । नारायणस्य नम्यत्वोपपादकं निखिलेत्यादि । गुणवत्त्वेऽपि चेतनत्वेन हिरण्यगर्भादिवद्दोषवत्त्वं मा भूदित्युक्तं निर्दोषमिति । एवंभूतत्वादेवाखिलैः सुवाक्यैर्ज्ञानद्वाराऽतिशयेन प्राप्यं । निखिलपूर्णगुणोपपादनायोक्तमस्योद्भवादिदमिति । विश्वस्योद्भवादिदातारमित्यर्थः । अत एव वंद्यं । अशेषाद्विशिष्टत्वादपि वंद्यं । यो हि जननादिकर्ता यश्च गुणाधिकः स हि वंद्यो भवति । अत एवंभूतत्वादेव प्रियेभ्यः स्वात्मादिभ्योऽतिशयेन प्रियं । तेषां प्रियत्वापादकत्वात् । इतरेषां प्रायस्तथाऽनुभूत्यभावान्ममेत्युक्तं । सामिति श्रद्धाभक्त्यतिशयपूर्वकत्वमाह नमस्कारस्य । अनेनैव श्लोकेनाध्यायचतुष्टयार्थं सूचितवान् । निखिलपूर्णगुणैकदेहमिति समन्वयं सूचयति । निर्दोषमित्यविरोधं । अखिलैः सुवाक्यैराप्यतममिति साधनं । अस्योद्भवादिदमिति फलं । अनेनैवाधिकारिविषयप्रयोजनसंबंधान् शास्त्रारंभेऽपेक्षितान्सूचयति । सन्नमामीत्यधिकारिणं सूचयति । नारायणमिति विषयं । आप्यतममिति प्रयोजनं । उद्भवादिदमिति विषयप्रयोजनयोर्दातृदेयलक्षणसंबंधं । नारायणशब्दश्च व्याक्रियते निखिलपूर्णेत्यादिना श्लोकेन । नाराणां गुणानामयन-

त्वात् । अराणां दोषाणामयनं न भवतीति नारायण इत्याद्यूहनीयं । एवं शास्त्रप्रतिपाद्यं नारायणं नमस्कृत्येदानीं तमेव शास्त्रकर्तारं वेदव्यासं प्रणमति ग्रंथारंभं च प्रतिजानीते ॥ तमेवेति । शास्त्रप्रतिपाद्यरूपेण नमस्कृतस्यैव शास्त्र-प्रवक्तृरूपेण प्रणामस्तत्प्रीत्यतिशयार्थः । तं शास्त्रप्रभवं प्रणम्य परमाख्यविद्याया ब्रह्मसूत्रात्मिकाया व्याख्यामन्वपि करोमीत्यन्वयः । अनुव्याख्याया अन्येन कर्तुमशक्यत्वादहमेवेत्याह । अंजसैव जगद्गुरूणां गुरुमिति मुख्यगुरुत्वमभिप्रैति । मुख्यगुरुत्वं च भगवतो जनकत्वेन पोषकत्वेन विघ्ननिवारकत्वेन चित्तप्रेरकतया चाचार्यादिसंपादनद्वारा ज्ञानदातृत्वात् । विशेषतो म इति स्वस्य साक्षाद्भगवान्व्यासो गुरुरित्याह । शास्त्रप्रभवमित्युक्तं विवृणोति ॥ प्रादुर्भूत इति । न विद्यते उत्तमं शास्त्रं यस्मात्तदनुत्तमं । ननु सूत्राणां प्रामाण्ये सिद्धे सिद्धं व्याख्येयत्वं । तच्च कथमित्याशंक्याह ॥ गुरुर्गुरूणामिति । गुरूणां ब्रह्मादीनां ज्ञानप्रदाता महाभारतादिशास्त्राणां कर्ता बादरायणो यतोऽतोऽजादिभ्यः श्रोतृभ्योऽर्थायोक्तं । संशयविप-र्ययादिरहितत्वात् । ब्रह्मसूत्राख्यं शास्त्रं प्रमाणं । ननु पौरुषेयवाक्यानामाप्तोक्तत्वेन प्रामाण्यमवधृतं । आप्तोक्तत्वं च कथमित्यत आह ॥ वक्तृश्रोतृप्रसक्तीनामिति । इदमेव ह्याप्तोक्तत्वं यद्वक्तृश्रोतृप्रसक्त्यानुकूल्यं । वक्त्रानुकूल्यं तावद्भगवता वेदव्यासस्य वक्तृत्वादस्त्येव सूत्राणां । श्रोत्रानुकूल्यं च ब्रह्मादीनां श्रोतृत्वात् । प्रसंगानुकूल्यं चाज्ञाननिर्हरणार्थेन प्रवृत्तेः । तत्रैकैकानुकूल्याभावेऽप्यनाप्तत्वं । यथा जैनवाक्येषु वक्त्रानुकूल्याभावादाप्तिशून्यत्वं । यथा श्रोत्रानुकूल्याभावादाप्तिशून्यत्वं बुद्धवाक्येषु । यथा च प्रसंगानुकूल्याभावादाप्तिशून्यत्वं नर्मादिवाक्येषु । तच्चोक्तं भारते । न नर्मयुक्तमनृतं हिनास्ति न स्त्रीषु

राजन्न विवाहकाले प्राणात्यये सर्वधनापहारे पंचानृतान्याहुरपातकानीति । न केवलमाप्तोक्तत्वात्प्रामाण्यमपि तु श्रुतिमूल-त्वाद्युक्तिमूलत्वाच्च । अतस्त्रिविधं प्रामाण्यं ब्रह्मसूत्राणां जैमिन्यादिवाक्येषु त्वेकैकधा प्रामाण्यं । अतो ब्रह्मसूत्रसदृशं न प्रमा-णतममस्त्यतः प्रमाणतमत्वाद्व्याख्येयं । यद्यपि भाष्यरूपेण व्याख्यातमिदं शास्त्रं । तथाऽप्यस्पष्टस्पष्टीकरणाय व्याख्यायत इत्यदोषः । तत्र व्याख्येयस्य शास्त्रस्येदमादिसूत्रं ॥ ॐ अथातो ब्रह्मजिज्ञासेति । तत्रोंकारश्चाथशब्दश्च मंगलार्थत्वादादितः प्रयोक्तव्यौ । ॐकारस्तु स्रवत्यनोंकृतं ब्रह्मेत्यादिवचनात्प्रत्यधिकरणावर्तमानत्वात्पृथगुच्चारितो वेदितव्यो नात्राथशब्दवत्सूत्रो-पनिबद्धः । इदानीमोंकाराद्याखिलवेदार्थभूतशास्त्रस्य विषयं दर्शयितुमाह ॥ ॐतत्त्ववाचीति । ॐकारार्थो विष्णुरेव गुणबृंहितो बृहत्वाद्ब्रह्मशब्दार्थः । स एव नारायणो गुणानामयनत्वान्नारायणपदोदितः । स एव गायत्रीप्रतिपाद्यो भरणगमनयोगाद्भर्ग-शब्दार्थः । भूरादिव्याहृतीनां तिसृणां भूमत्वाद्भावयितृत्वात्स्रष्टृत्वेन वृत्तेः स एवार्थः । स एव पुरुषसूक्तप्रतिपाद्यः । पूर्णगुण-त्वात्पुरुषः । स एवोंकारादिपंचरूपाणां वेदानामर्थः। एवंभूतो नारायणः सर्ववेदार्थोऽपि तत्तत्कुबुद्धिभिरन्यथाप्रतिपन्नत्वाज्जिज्ञास्यो विधीयते । एवं तावत्प्रतिपाद्यस्वरूपमुक्त्वा मुमुक्षोरधिकारिणस्तज्जिज्ञासाप्रयोजनं महायाससाध्यत्वेन प्रमितमेव प्रवृत्त्यंगकार-णामिति सप्रमाणकमाह ॥ ज्ञानीति । ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति मामिति भगवद्वाक्याद्भगवतस्तत्स्थत्वात् । तमेव विद्वानमृत इह भवति । यमेवैष वृणुते तेन लभ्यः । श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिश्रुतिबलाच्च । जिज्ञासातो ज्ञानं ज्ञानादेव विष्णुप्रसादस्तस्मान्मोक्षो ज्ञानिनः । ननु ज्ञानस्वभावादेव बंधनाशो ज्ञानाग्निः सर्वकर्माणि

भस्मसात्कुरुते तथेति वाक्यात्स्यात् । किं तत्प्रसादेनेत्याशंक्य तत्प्रसादैकलभ्यो मोक्ष इति सप्रमाणकमाह ॥ द्रव्यं कर्म-चेत्यादिना । न ऋते त्वत्क्रियते किंच नार इत्यादिना ज्ञानस्वभावादेव मोक्षः कस्यापि न स्याद्धरिं विना । भो इंद्रियगणपते हृषीकेश आरे दूरेऽपि त्वदृते किंचन न क्रियत इत्यर्थः । एवं तावच्छास्त्रारंभेहेतुभूतविषयप्रयोजनाद्युक्त्वा परकृतापव्या-ख्यानमुक्तदार्ढ्याय दूषयितुमाह ॥ अज्ञानामित्यादिना । भगवत्प्रसादसाध्यत्वोक्तेर्न मुक्तिर्बंधमिथ्यात्वमपेक्षते । राजादि-प्रसादस्य सत्यशृंखलादिबंधनिवर्तकत्वदर्शनात् । ज्ञाननिवर्त्यत्वानभ्युपगमान्न मिथ्यात्वं बंधस्य । किंच सत्यस्यापि ज्ञानेन निवृत्तिर्दृष्टा । यथा गरुडध्यानेन विषस्य । प्रत्यक्षादिविरुद्धं च बंधमिथ्यात्वं दुःख्यहमित्याद्यनुभवात् । यदि दुःखादिबंधस्य मिथ्यात्वं तर्हि तत्प्रतिपादकस्य वाक्यस्य मिथ्यात्वं स्यादेवोभयसंमतेः । तदा बाधकाभावाद्बंधस्य सत्यत्वं सेत्स्यति । ननु मिथ्याभूतमपि वाक्यं मंत्रमिव स्वप्नोपदेशो बंधमिथ्यात्वं बोधयत्वित्याशंक्याह ॥ मिथ्याया इति । उभयसिद्धस्य हि साधनस्य साधकत्वं । न च मिथ्याभूतस्य साधकत्वमुभयसंमतं । रज्जुसर्पादिज्ञानमपि सदेव भयकंपादिजनकं । अन्यथा रज्जुसर्पोऽपि दंशेत् । अतो न कुत्रापि मिथ्याभूतस्य साधकत्वं दृश्यते । मिथ्याभूतस्य साधकत्वं साध्यते चेत्केन प्रमाणेन । सता वा मिथ्याभूतेन वा । यदि सताऽऽत्मेतरेण तर्हि द्वैतासिद्धिः स्यात् । नाप्यसता । विप्रतिपन्नत्वात् । न च वाच्यं सतोऽपि साधकत्वं मया नांगीकृतमिति । साक्षिणैव सता जडासिध्यंगीकारात् । तच्च निर्विशेषस्य साक्षिणः साधकत्वं साध्यं यदि तदपि साध्यते केन प्रमाणेन सविशेषेण वाऽविशेषेण वा । अविशेषेण चेत्तस्यापि साधकत्वमविशेषांतरेण

साध्यमित्यनवस्था । सविशेषेण चेत्तस्य मिथ्यात्वांगीकारान्न साधकत्वमुभयसंमतं । अस्माकं पक्षे तु सविशेषत्वात्साक्षिणः साधकत्वमुपपन्नमेव । किंच विश्वस्य सत्यत्वमनंगीकुर्वतां साधनाद्यभावाद्वादित्वस्य चाभावान्न पक्षांतरनिराकरणसिद्धिः । अतो वा बाधकाभावाद्धानादिव्यवहारः सत्य एव स्यात् । तद्विषयोऽपि घटादिस्तत एव सत्यभूतोऽवसीयते । न ह्यसति हानादिव्यवहारो दृष्टः । नन्वसतः साधकत्वाभावेऽपि व्यावहारिकसत्वस्य साधकत्वं स्यादित्याशंक्य पूर्वोक्तमेव तत्साधकं प्रमाणं विकल्प्य दूषयितव्यमित्याह ॥ व्यवहारसत इति । प्रातीतिकं व्यावहारिकं पारमार्थिकं च सदिति सत्त्रैविध्ये किं प्रमाणमिति च प्रष्टव्यं । न तावत्प्रातीतिकं व्यावहारिकं प्रमाणं विप्रतिपन्नत्वात् । सदसद्विलक्षणं नाम न वस्त्वंतरं सिध्यति । यदि सद्विलक्षणत्वे सत्यसद्विलक्षणत्वमुच्यते विश्वस्य तर्हि सदसद्भ्यां ब्रह्मखपुष्पाभ्यां विश्वस्य भेदांगीकाराद्भेदवादिनो नेदमनिष्टं । सद्वैलक्षण्यं नाम सर्वसद्वैलक्षण्यं विवक्षितमिति चेन्न । सद्धेतुत्वापत्तेः । न च यत्किंचित्सद्विलक्षणत्वमित्यपि वाच्यं । ब्रह्मवैलक्षण्यांगीकारेणापि तस्योपपत्तेः । किं च सदसद्वैलक्षण्येऽपि सदसद्वैलक्षण्यमस्ति न वा । यद्यस्ति तत्रापीत्यनवस्था । यदि नास्ति तर्हि सदसद्वैलक्षण्यं किं सद्वाऽसद्वा । नाद्यः । द्वैतापत्तेः । नोत्तरः । विश्वस्य सदसद्वैलक्षण्यानापत्तेः । सदसच्चेद्विरोधोऽपसिद्धांतश्च स्यात् । नापि ज्ञानबाध्यत्वं विश्वस्य शुक्तिरजतादेरिव साध्यं । शुक्तिरजतेऽपि तस्यासिद्धत्वात् । कस्तर्हि बाध इति चेत् । अन्यथाविज्ञातस्याधिष्ठानस्य सम्यग्विज्ञानमेवेति ब्रूमः । न पुनः कस्यचिदर्थस्य नाशोऽसत्वात् । असतः प्रतीत्यभावात्कथं भ्रमविषयतेति चेन्न । असतः प्रतीत्यभावेऽसद्वैलक्षण्यस्यापि ज्ञातुमशक्यत्वात् ।

नन्वसतोऽसत्वेन ख्यातिरस्त्येव। सत्वेन ख्यातिः क्व दृष्टेति चेत्। उच्यते। अन्यस्यान्याकारत्वमविद्यमानमेवास्तीति भ्रांतौ प्रतीयत एव। न च तदस्तित्वमनिर्वचनीयमेव प्रतीयत इति वाच्यं। भ्रांतिप्रतीतिदशायां सत्वेनैव प्रतीयमानत्वात्। अन्यथा तदप्येवमित्यनवस्थाप्रसंगात्। अविद्यमानस्याप्रतीतावनिर्वचनीयत्वेनाभ्युपगते शुक्तिरजतेऽपि भ्रमतः प्रवृत्तिरेव न स्यात्। अर्थक्रियानर्हं तत्प्रतीतेरयथार्थत्वं स्यात्। तदेतदाह ॥ वैलक्षण्यं सदसतोरित्यादिना। तस्माद्बंधमिथ्यात्ववर्णनमनुपयुक्तमयुक्तं चेति सिद्धं। एवं बंधाध्यासं दूषयित्वा इदानीं विषयप्रयोजनाद्यसंभवं वक्तुमज्ञानासंभवं तावदाह ॥ निर्विशेष इत्यादिना। नात्मनोऽज्ञानमावरकं स्वयंप्रकाशत्वात्। न तद्विशेषस्य। ब्रह्मैक्यादेर्निर्विशेषत्वांगीकारात्। न चाध्यस्तविषयस्यापि तत्संभवति। प्रागज्ञानासिद्धेस्तदसंभवात्। न चेदृशमस्त्यावरकमज्ञानं जडस्य सतोऽप्यप्रकाशस्वरूपत्वेनावरणवैयर्थ्यांगीकारात्। तस्मात्कथमपि ब्रह्मणोऽज्ञानासंभवाज्जिज्ञासारंभवैयर्थ्यं दुर्वारं मायावादिनः। अपि च किमज्ञानमज्ञानांतरकल्पितमुताकल्पितं। नाद्यः। तदप्यज्ञानमज्ञानांतरकल्पितमित्यनवस्थाप्रसंगात्। न चाज्ञानद्वयमेव परस्य परकल्पितमितरेतराश्रयत्वप्रसंगात्। नोत्तरः। अद्वैतभंगात्। न चाज्ञानं स्वेनैव कल्पितमात्माश्रयत्वप्रसंगात्। अदृष्टत्वाच्च। तथाविधजीवस्य तात्त्विकाज्ञानाभ्युपगमेनानवस्थादिदूषणावकाशः। तात्त्विकस्यापि सुवर्णमलवन्निवृत्तिः संभवत्येवाज्ञानस्य। तथा दुःखादेरपि। बालत्वस्येव वार्धके। स्वयंप्रकाशस्यापि जीवस्याज्ञानं स्वविशेषालंबनं च युक्तमेव। यद्यविद्याया दुर्घटत्वस्य भूषणत्वांगीकारान्नोक्तदोषावकाश इत्युच्यते। तर्हि तत एव निरधिष्ठानस्यासाक्षिकस्याविद्याध्यासस्यापि संभवादात्माऽपि दुर्घटः स्यात्। अविद्याया एवा-

त्मत्वं दुर्घटमपि भूषणत्वेनापाद्यते। अतो नाज्ञानस्य दुर्निरूपत्वादज्ञानवतोऽधिकारिणोऽज्ञातविषयस्याज्ञाननिवृत्तिफलस्य तत्संबंधस्य दुर्घटत्वात्तदुज्झितसर्वप्रमाणविरुद्धत्वादनंतदोषदुष्टं मायिमतं। अतो नारंभणीयं किं तु हेयमेव सद्भिः। एवं सामान्यतो निराकृतमपि परोक्तब्रह्मात्मैक्यं शास्त्रविषयं निष्प्रमाणकत्वेन विशेषतो निराकरोति ॥ सत्यत्वादित्यादिना। न तत्त्वमस्यादिवाक्यं जीवस्य ब्रह्मत्वप्रतिपादकं दुःखादिग्राहकप्रत्यक्षविरोधात्तस्य च पूर्वोक्तप्रकारेणायथार्थत्वात्। यथा यजमानः प्रस्तर इति वाक्यं प्रत्यक्षविरोधान्न प्रस्तरस्य यजमानत्वाभिधायकं। किंच सर्वज्ञत्वादिविशिष्टेश्वरं जीवविलक्षणं सदेवेत्याद्युपक्रमासिद्धं तत्पदेनाभिधीयते। तेन जीवस्यैक्यं बोधयद्वाक्यं स्फुटमुपजीव्यश्रुतिविरुद्धमेव। अपि च जगत्स्वातंत्र्यादिपरत्वेनैक्यवाक्यस्य सावकाशत्वान्न जीवेश्वरस्वरूपाभेदपरत्वं। यथा वशीकृतग्रामं पुरुषमधिकृत्यायं ग्रामः स्वयमेवेति स्वातंत्र्येऽभेदप्रयोगो दृष्टः। यथा विद्यादिविशिष्टभूसुरमधिकृत्यास्मिन्ग्रामे ब्राह्मणः सर्वेऽप्ययमेवेति वैशिष्ट्ये च। यथा च गोष्ठ एकीभूता गाव इति स्थानैक्ये च। यथा पूर्वं परस्परविरुद्धा ब्राह्मणा इदानीमेकीभूता इति मत्यैक्ये च। यथाऽग्निर्माणवक इति सादृश्ये च। तथैव भगवत्स्वातंत्र्ये भगवद्वैशिष्ट्यालंबनत्वेन सावकाशं सर्वं खल्विदं ब्रह्मेत्यादिजीवजडाभ्यामभेदवचनं ब्रह्मणः। परेऽव्यये सर्व एकीभवंति। परमं ब्रह्म वेद। ब्रह्मैव भवतीति मुक्तैरभेदवचनं भगवतः स्थानैक्यमत्यैक्यसादृश्यैक्यालंबनत्वेन सावकाशमित्यर्थेऽभेदवाक्यं यथेष्टतः सावकाशं स्वरूपाभेदमंतरेणापि द्वा सुपर्णा सयुजेत्यादिभेदवाक्यं तु निरवकाशं। जीवपरमभेदमंतरेण स्वयंप्रकाशे चिन्मात्रेऽज्ञानसंभवस्य प्रागेवोक्तत्वान्नाज्ञानकल्पितभेदविषयमिति वक्तुं युक्तं। अतः प्रमाणांतरावि-

रेऽपि प्रवृत्तिदर्शनान्नेष्टसाधने प्रवृत्तिरिति । नैतत्साधु । अनिष्टस्येष्टप्रतिबंधकत्वात्पारंपर्येणापीष्टसाधनत्वात्तत्परिहारस्य । सीधुपानादेरपि तात्कालिकेष्टसाधनकत्वेऽपि महानिष्टसाधनत्वान्न विधेयत्वमित्यलमतिप्रसंगेन । तस्मादिष्टं तत्साधनं च कार्यमित्युच्यते । नार्थांतरं । एवं सतीष्टदेवता भगवान् श्रीपतिरेव मुख्येष्टसाधनं । अनपेक्षिताशेषपुरुषार्थतया निर्मलमनसामिष्टो वेदार्थो भवितुमर्हति । इष्टत्वं च भगवतस्तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्माच्च सर्वस्मादंतरतरं यदयमात्मेति श्रुत्यादिसिद्धं । न श्रद्धामपि कुर्वंति कुशलाः स्वात्मदर्शनाः । अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा । प्राणबुद्धिमनःस्वात्मदेहापत्यधनादयः । यत्संपर्कात्प्रिया आसंस्ततः को न्वपरः प्रिय इत्यादिभगवद्वाक्यैश्च । तस्मादाकांक्षायोग्यतासंनिधिबलाद्भगवानेवेष्टो वेदार्थः । ननु व्युत्पत्तिवशाद्वाक्यार्थावबोधः । व्युत्पत्तिश्च व्यवहारतत्कार्य एव संभवति । गामानय गां बधानेत्यादिषु बालस्य व्युत्पत्तिदर्शनात्कथं वाक्यस्येत्यत आह ॥ इष्टे व्युत्पत्तिरिष्यत इति । इष्ट एव शब्दस्य व्युत्पत्तिरभ्युगंतव्या । अत्यपूपांस्तव भ्रातेत्यादिवाक्येष्वावापोद्वापाभ्यां पदार्थानां वर्तमानत्वात् । अंगुल्यादिनिर्देशाच्चाकांक्षादिबलाच्च बालस्य व्युत्पत्तिदर्शनात् । ननु गामानयेत्यादिषु लिङादियुक्तवाक्येषु व्युत्पत्तौ गामानयतीत्यादावेवोक्तप्रकारेण व्युत्पत्तिसंभवात् । तत्रैष्यद्गवानयनादिदर्शनपर्यंतप्रतीक्षणोपयोगाभावाद्व्युत्पत्त्यर्थं बालस्य वर्तमानार्थपदे व्युत्पन्नो ज्ञातशक्तिकगवादिपदसमभिव्याहारादानयेत्यादिवाक्यत उत्तमवृद्धादिष्टमध्यमवृद्धानीयमानगवादिकं दृष्ट्वाऽनंतरं व्युत्पत्तिर्भविष्यति । एवं च सिद्धव्युत्पत्त्यनंतरभावित्वादमुख्यार्थांगीकारेऽपि कार्यस्य । किंच सर्वं हि

वस्तु वर्तमानमतीतं भविष्यदाकांक्षादिवशात्स्फूर्जितं जनपदचयेनावसीयते । अतः कालत्रयावच्छिन्नो विधिरित्येतदपास्तं । यस्मादानीयमानगवादिकं दृष्ट्वा तदन्वितेष्वानयेत्यादिषु व्युत्पन्नस्यानंतरमाकांक्षावशादानयिष्यतीत्यादिभविष्यदर्थेषु व्युत्पत्तिः । अतो वर्तमानार्थेषु प्रथमतो व्युत्पत्तिस्तदनंतरमतीतपदार्थेषु तदनंतरं भविष्यदर्थेषु पदेषु च । अतः कालत्रयानवच्छिन्नमेव शब्दावगम्यं । अपि च सर्वोऽपि जंतुरिष्टमाकांक्षते । तदर्थत्वेन तत्साधनं च न तु व्यापारमात्रं । अतः कार्यविधानेऽनाकांक्षिताभिधानं स्यात् । इष्टसाधनं चापरोक्षं परोक्षं वा ज्ञानमेव न तु कर्म । साक्षाद्व्यापारस्तु क्वचिज्ज्ञानार्थः स्यात् । यथा चर्वणनिगीरणादिव्यापारो रसवेदनार्थः । रसवेदनं सुखार्थं । यथा पुत्रस्ते जात इति वाक्योत्थपरोक्षज्ञानादपि सुखं दृष्टं । एतादृशवाक्येष्वपि व्युत्पत्तिः संभवति । तथा हि । पुत्रस्ते जातः केनचिदुक्तवाक्यश्रवणाद्धृष्टस्य पितुर्मुखविकासादिना हर्षमनुमाय तन्निमित्तमनेनोक्तमित्यध्यवस्यति बालः । तच्च निमित्तं पुत्रजन्मव्यतिरेकेणान्यदनाकलयन्पुत्रजन्मनेति निश्चिनोति । एवमेवापोद्वापाभ्यामेतद्वाक्यगतपुत्रादिपदविभागार्थं जानात्येवेति किमनुपपन्नं । प्रसिद्धपदसमाभिव्याहारादप्रसिद्धपदार्थावगतिश्चातीवप्रसिद्धा कार्यानुप्रवेशमंतरेणापि पिकः कोकिल इत्यत्र प्रसिद्धपदसमाभिव्याहारादप्रसिद्धपिकशब्दार्थावगतिदर्शनात् । अतः प्रसिद्धपरत्वं सर्ववाक्यानां व्युत्पत्तिबलादेव सिद्धं । अपि च कार्यैकपरत्वे वेदस्य स्रुक्स्रुववन्ह्यादिकारकेष्वतात्पर्यं स्यात् । तथा च सति यत्किंचित्कर्मणो भस्महोमादिलक्षणस्यावहनीयादिरहितस्य यज्ञता स्यात् । अथ यागादिकार्यार्थत्वेन स्रुक्स्रुवादिषु तात्पर्यमस्तीत्युच्यते । हंत तर्ह्यत्राप्युपासनत्वेन ब्रह्मणि तद्गुणेषु सत्यकामत्वादिषु तद्वद-

स्तीति परेण पदार्थोऽपि तात्पर्यमभ्युपगम्यतामविशेषात् । ननूपासनाकर्मत्वेन न ब्रह्मणः सिद्धिः । अविद्यमानस्यापि ध्यातुं शक्यत्वादुपासनावाक्यस्य ब्रह्मेत्युपासीतेत्यध्याहृतेतिशब्दवतस्तत्र तात्पर्याभावाच्च । मनो ब्रह्मेत्युपास्त इत्यादिवाक्यस्यैव । मैवं । एवं सति व्रीहीनिति प्रोक्षति आहवनीय इति जुहोतीति सर्ववाक्येष्वितिशब्दाध्याहारः स्यात् । तथा सत्यग्न्यादीनां स्मरणेनैव होमाद्यन्वयो न स्वरूपत इति स्यात् । मनो ब्रह्मेत्युपास्त इत्यादेर्मन आदिषु ब्रह्मोपासनमेवार्थ इति चतुर्थे वदामः । यथाऽऽहवनीये जुहोतीत्यादावितिशब्दाश्रवणान्नाग्न्यादिस्मरणमात्रमित्युच्यते तर्ह्यात्मानमेव लोकमुपासीतेत्यादावितिशब्दाभावात्तथैवाभ्युपगम्यतां । यदि क्वचिदुपासनावाक्येष्वितिशब्दश्रवणात्तत्राप्यध्याहारः क्रियते। तर्हि नागिरागिरेति ब्रूयादित्यादियागप्रकरणेष्वितिशब्दश्रवणादग्नौ जुहोतीत्यादावध्याहारः स्यात् । अतो विधिविशेषत्वेनापि सिद्धार्थे तात्पर्यमवश्यमभ्युपगंतव्यं । तथा हि । वेदांतवाक्यान्युपासनाख्यकार्येऽधिकृतविशेषणभूतफलत्वेन दुःखासंभिन्नदेशविशेषरूपस्वर्गादिवद्रात्रिसत्रप्रतिष्ठादिवदवगुरणशतयातनासाध्यसाधनभावादिवच्च कार्योपयोगितयैव सर्वं बोधयंति। तथा हि । ब्रह्मविदाप्नोति परमित्यत्र ब्रह्मोपासनाख्यकार्याधिकृतफलत्वेन ब्रह्मप्राप्तिः श्रूयते । परप्राप्तिकामो ब्रह्म विद्यादिति । अत्र प्राप्यतया प्रतीयमानब्रह्मस्वरूपं तद्विशेषणं सर्वं कार्योपयोगितयैव सिद्धं भवति । तदंतर्गतमेव जगत्सृष्ट्यादिकं संहर्तृत्वमाधारकत्वमंतरात्मत्वमित्याद्युक्तमनुक्तं सर्वमिति न किंचिदनुपपन्नं । एवं च सति मंत्रार्थवादगता अविरुद्धा अपूर्वार्थाश्च सर्वे विधिशेषतयैव हि सिद्धा भवंति । तथा हि । सर्वोऽप्यर्थवादभागो देवताराधनभूताद्यागादेः सांगस्याराध्यदेवतायाः श्रेष्ठानुगुणान्सहस्रशो वदन्कर्माणि प्राशस्त्य-

बुद्धिमुत्पादयंति। तेषामसद्भावे प्राशस्त्यबुद्धिरेव न स्यादिति कर्मणि प्राशस्त्यबुद्ध्यर्थं गुणसद्भावमेव बोधयंतीत्यनयैव दिशा सर्वमंत्रार्थवादगता ह्यनथासिद्धाः। न च प्रत्यक्षानुपलंभबाधः। तेषामस्मदाद्यक्षायोग्यत्वात्। अन्यथा तन्न्यायेन वेदार्थमात्रापन्हवः स्यात्। अपि च सिद्धे शब्दस्य प्रामाण्यानभ्युपगमे ब्राह्मणो न हंतव्य इत्यादेर्निषेधवाक्यस्याप्रामाण्यं स्यात्। अकार्यत्वान्निषेधस्य तत्रापि किंचित्कार्याभ्युपगमे नञः पर्युदास एवार्थो न प्रतिषेधार्थः स्यात्। तथा च निशेधशास्त्राभावप्रसंगः। द्वितीये कार्यपदस्य वैय्यर्थ्यमापद्येत। कार्यस्य कार्यान्वयाभावात्।सिद्धार्थे शक्त्युपगमे पदार्थानामेव परस्परान्वयसंभवान्न किंचिदनुपपन्नं। अतः कार्यानुप्रवेशमंतरेणापि सिद्धार्थबोधकत्वसंभवाद्युक्तं सर्ववेदपदस्य परमतात्पर्येण ब्रह्मावबोधकत्वं कमकांडस्य भगवच्छेषभूतकर्मप्रतिपादनद्वारा भगवत्येव तात्पर्यं। कर्मण्येव तात्पर्याभ्युपगमे वाक्यभेदः स्यात्। किं च सर्ववेदैर्महागुणत्वेनावबुद्धस्य भगवतो मोक्षलक्षणमहाफलदातृत्वात्तत्रैव परमतात्पर्यं युक्तं कर्मकांडस्य। न त्वल्पफलसाधनभूतकर्मणि ब्रह्मकांडस्य। फलसंबंधिनः प्राधान्यं दृष्टं। ज्योतिष्टोमादौ महाफलसंबंधिनो महाप्राधान्यं तन्न्यायेनांगीकर्तव्यमेव। ननु ब्रह्मणि कर्मादिषु च पृथक् पृथक् तात्पर्याभ्यपगमे गौरवमिति चेत्। हंत तर्हि कल्पनागौरवादेव स्रुक्स्रुवादिपदार्था न भूयासुः। प्रत्यक्षादिपरेणसिद्धाः कार्यपदा न स्युरिति चेन्न। तात्पर्याणामुक्तरित्या प्रमाणसिद्धत्वेन निराकर्तुमशक्यत्वात्। तस्मात्पदार्थेषु वाक्यार्थेषु च तात्पर्यमभ्युप गंतव्यं। शब्दस्य वाक्यैकवाक्यता चांगीकर्तव्या। व्रीहीभिर्यजेतेत्यादिवाक्ये प्रतिपादितयज्ञादीनां तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति। यज्ञेन दानेन तपसा नाशकेनेति परमात्मज्ञानांगत्वोक्तेः। एवं सत्यर्थवादे विधिवाक्येन वाक्यैक-

वाक्यत्वं न प्राशस्त्यमात्रलक्षकत्वेन पदैकवाक्यत्वमिति सिध्यति । तथा सत्यं ज्ञानमनंतमित्यत्र ब्रह्मपदेन सत्यादिपदानां समस्तव्यस्तान्वयसिद्धिः । अवांतरवाक्यानां बहुत्वेऽपि महावाक्यस्यैकत्वान्न वाक्यभेददोषावकाशः स्यात् । अन्यथाऽरुणया पिंगाक्ष्यैकहायिन्या गवा सोमं क्रीणातीत्यत्र गवा क्रीणात्यरुणया क्रीणातीति कारकपदानां प्राधान्यस्यापेक्षितस्य पृथक् पृथक् क्रियापदेनान्वयस्य परेणाप्यंगीकृतत्वाद्वाक्यभेददोषापत्तेः । अरुणादिपदानां गोपदेन पार्ष्टिकान्वयो योग्यतावशादंगीकृतः । ननु गंगायां घोषः प्रतिवसतीत्यादिषु गंगादिपदार्थस्य प्रत्यक्षादिविरोधादर्थांतरान्वयासंभवात्कथं पदार्थे तात्पर्यं शब्दस्योक्तमिति चेन्मैवं । तत्र मुख्यार्थाभावेऽपि गौणलाक्षणिकार्थसंभवात् । तथा विरोधे तात्पर्याभ्युपगमे विरोधाभावादित्यनवद्यं । यस्माज्ज्ञानस्यैवेष्टसाधनत्वं दृष्टं तत्साधनत्वं च कर्मणस्तस्माद्भगवतो ज्ञानर्थान्येव यागादिकर्माणि विविदिषंति यज्ञेन दानेनेति श्रुतेर्ज्ञानमेव तस्य प्रसादजनकं । तच्च जिज्ञासयैव भवति । करणभूतस्य वेदस्य जिज्ञासालक्षणेतिकर्तव्यताभावे ज्ञानजनकत्वासंभवात् । अतो ब्रह्मजिज्ञासा कर्तव्या । तद्विजिज्ञासस्वेति प्रमाणभूतश्रुतिविहितत्वात् । श्रुतेश्च प्रामाण्यं स्वत एव न संवादाधीनं । यथा प्रत्यक्षस्य संवादाधीनं चेत्प्रामाण्यं तर्हि तत्संवादकप्रामाण्यमन्यसंवादाधीनं तत्राप्येवं तत्राप्येवमित्यनवस्था मूलक्षतिकरी प्रसज्येत । न चैवमप्रामाण्यं स्वतो ज्ञानस्य । तथा सति ज्ञानाविश्वासेन न क्वाप्यर्थेषु प्रवर्तेत दृष्टेषु । तस्मात्करणदोषबाधकप्रत्ययाधीनत्वात्परत एवाप्रामाण्यं ज्ञानस्य । अत एव मिथ्याज्ञप्तिविप्रलंभादिदोषसद्भावाद्वेदविरुद्धागमस्याप्रामण्यं पाशुपतादेः । शब्दस्य स्वतो दोषाभावेऽपि वक्तृदोषेण दोषवत्त्वमवधृतं । न चैवंविधदोषवत्त्वेनाप्रामाण्यं वक्तुं शक्यं

वेदस्यापौरुषेयत्वात् । तस्य च कर्तुरप्रसिद्धेः । किंचेश्वरकृतत्वे वेदस्य तस्माद्धर्मादिसिद्धिर्नस्यात् । विप्रलंभादिवक्तृदोषसंभवात् । यदिवेदस्य प्रामाण्यार्थमविप्रलंभकसर्वज्ञवीतरागेश्वरकृतत्वं कल्प्यते । तर्हि कल्पनागौरवं दुर्वारमापद्येत । न चेश्वरस्य सर्वज्ञत्वादौ तद्वाक्यमेव प्रमाणं । परस्पराश्रत्वप्रसंगात् । नाप्यनुमानं तत्र मानं । प्रत्यनुमानग्रस्तत्वात् । तथा हि । धर्मादिः कस्यचित्प्रत्यक्षः वस्तुत्वाद्घटवत् यस्य प्रत्यक्षः स ईश्वरो बुद्धो वेति तत्तद्वादिभिरुक्ते विमतो न धर्मदर्शी पुरुषत्वाद्देवदत्तवदिति वक्तुं शक्यत्वात् । अतोऽत्यंतातींद्रियार्थेषु न वाक्यस्य मानत्वमन्वयव्यतिरेकसमाधिगम्याप्तत्वस्य तत्र ज्ञातुमशक्यत्वात् । अतो धर्मादिसिध्यन्यथाऽनुपपत्त्याऽपि वेदापौरुषेयत्वमभ्युपगंतव्यं । यस्तु प्रत्यक्षैकप्रमाणवादी श्रेयःसाधनं धर्मो नास्तीति वदति तद्वाक्यं निष्फलत्वाद्धेयमेव । न च तेन लोकोपकारः प्रयोजनं । धर्माधर्माभावज्ञाने परस्परहिंसादिनाऽपकारस्यैव प्राप्तेः । न चोपकारेण तस्य प्रयोजनमदृष्टाभावात् । किं च धर्माभावोऽपि न प्रत्यक्षेणावसीयते । अनुमानेन चेदपसिद्धांतः । किंच प्रत्यक्षातिरिक्तप्रमाणाभावे धूमदर्शनादग्न्यर्थिनः पर्वते प्रवृत्तिर्दुर्घटा स्यात् । अतो धर्मब्रह्मादिकमस्ति नास्तीति वादिविवादाल्लोकस्य संशयोत्पत्तावस्त्येवेत्थंभूतब्रह्मादिकमिति निश्चायकं वेदवाक्यमेव भवेत् । यथा प्रत्यक्षदर्शनविगमेन यस्यकस्यचित्संधिग्धस्य । वेदश्च गुणक्रियादिविशिष्टमेवावबोधयति । तस्माच्छब्दानामाकांक्षितसन्निहितयोग्यार्थांतरान्विते वाचकत्वशक्तिरवसीयते लोकव्यवहारात् । अतोऽन्विताभिधायिनः शब्दा अभिहितान्वये कल्पनागौरवमनिवार्यं । तथा हि । पदैस्तावदनन्वितार्थानामभिधानं कल्प्यं । तदनंतरमभिहितानामर्थानामाकांक्षादिवशात्परस्परान्वयबोधकत्वमदृष्टं

कल्प्यमिति ततो वरमाकांक्षादिवशादन्वितार्थबोधकत्वं पदानामेव । न च पदानां वाचकशक्तिमंतरेण वाक्यार्थबोधकत्वं संभवति । घटोऽस्तीति वाक्यस्य पटसद्भावबोधकत्वप्रसंगात् । यदि पदानामेव स्वार्थबोधनद्वारा लक्षणया वाक्यार्थबोधकत्वं कल्प्यते । तर्हि तेषामेव द्विधाप्रवृत्तिकल्पनाप्रसंगात् । न ह्यचेतनस्य शब्दस्य विरम्यव्यापारः संभवति । अतो योग्यार्थांतरान्विताभिधायित्वेऽपि शब्दानामन्वितार्थविशेषस्तु वाक्यविशेषात्सिध्यतीति सर्वं निरवद्यं तदाह ॥ अतो ज्ञानेत्यादिना । एवं शास्त्रारंभोपयुक्तमर्थजातं युक्तिभिः समर्थितमप्यत्यंतं दृढीकर्तुं ब्रह्मतर्कोक्तमित्याह ॥ एतत्सर्वमिति । तर्कशास्त्रे ब्रह्मतर्क एव पूर्वोक्तयुक्तिजातस्य विस्तरेणोक्तत्वादत्र प्रथमसूत्रे संक्षेपेण सूचनं कृतं सूत्रकृता । तर्कशास्त्राद्व्युत्पाद्यभेदमीमांसाशास्त्रस्य विद्यांतरत्वान्न प्रपंचितं । अत्र सूत्रारूढमेव पूर्वं विचारितं सर्वमित्याशयः । तर्कमीमांसयोर्व्युत्पाद्यभेदमाह ॥ प्रमाणेति । प्रत्यक्षादिप्रमाणानामन्वयव्यतिरेकलक्षणन्यायस्योद्देशविभागलक्षणपरिक्षारूपेण तर्कशास्त्रे सम्यङ्निरूपणं क्रियते । तद्व्युत्पादितागमादिप्रमाणन्यायैर्ब्रह्मधर्मादिप्रमेयविचार एव मीमांसेत्यर्थः । तर्कशास्त्रं च नाक्षपादादिऋष्याभासप्रणीतं किंतु ब्रह्मतर्क एव भगवत्प्रोक्त इत्याशयवानाह ॥ ब्रह्मतर्कमिति । नारायणमूर्त्या स्वेनैव कृतात्पंचाशात्कोटिविस्ताराद्ब्रह्मतर्कादुद्धृत्य यतः पंचसहस्रग्रंथं कृतवान् बादरायणः । अतोऽपेक्षितार्थस्य तत्रैवोक्तत्वादत्यंतसंक्षेपेण प्रथमसूत्रगतातःशब्देन हेत्वर्थवाचिनाऽसूचयत् । अथानुभवत एव पूर्वोक्तहेतुकलापस्य सिद्धत्वं मीमांसारंभहेतुभूतमत इत्युक्तं । ननु तर्कशास्त्रोक्तमतःशब्देन किमित्युपजीव्यते तद्विनाऽप्यत्रैव किं नोच्यत इत्याशंक्याह ॥ देवैरिति । यतो देवैः प्रार्थितो दुर्गमार्थेषूपनिपत्सु व्यापृतोऽन्यत्रोक्तस्य तर्कस्य न

विस्तृतिं चकार व्यासः । किंच ब्रह्मजिज्ञासारंभप्रतिपक्षगता युक्तयस्तुच्छत्वादवज्ञातव्या इति प्रदर्शयितुं भगवता न कंठोक्त्या निराकृताः । प्रतिपक्षस्यावज्ञेयत्वं कथमित्यत आह ॥ प्रत्यक्षेति । यो हि सर्वलोकप्रसिद्धप्रत्यक्षप्रवृत्तमपि ज्ञातुं न शक्नोति । अयथार्थत्वांगीकारात् । सोऽत्र दुर्गमार्थे वेदे प्रतिपाद्यत्वेन कं पक्षमभिवीक्षेत । तस्मादयुक्तमतत्वान्मोक्षशास्त्रे तत्प्रवृत्तोऽपि प्रतिपक्ष्युपेक्षितव्य एव न तु तत्प्रकारेणैतच्छास्त्रार्थो ग्राह्यः । अतो निःशंकत्वान्मुमुक्षुभिर्विष्णुजिज्ञासा कर्तव्येत्यभिप्रायः । ननु ब्रह्मशब्दस्यार्थांतरेऽपि प्रयुक्तत्वात्कथं ब्रह्मजिज्ञासेत्यत्र विष्णुजिज्ञासा प्रतिज्ञातेत्याशंक्याह ॥ स्वयमिति । देवताकांडस्यांते स विष्णुराह हि तं ब्रह्मेत्याचक्षते तं ब्रह्मेत्याचक्षत इति पूर्वमेव सूत्रकृतोक्तं । यद्यपि देवताकांडस्य मध्यमभागः शेषपैलाभ्यां कृतस्तथाऽप्याद्यंतभागौ वेदव्यासेन कृतावतो निरंतरकांडस्यांते तेनैव ब्रह्मशब्दस्य विष्णावेव प्रयुक्तत्वेन तस्यैव प्रस्तुतत्वाच्च ब्रह्मजिज्ञासापदेन विष्णुजिज्ञासामेव सूत्रकृदसूचयदित्यर्थः । यद्यपि निखिलवेदविचाराधिकारत्वाद्ब्रह्मकांडस्यैव कांडांतरासंभवः । तथाऽपि कर्मदेवतामीमांसयोर्ब्रह्ममीमांसया संक्षेपेण विचारितार्थानामेव तदुपयुक्तानां विस्तृतविचाराधिकारत्वाच्छास्त्रांतरत्वमित्यदोषः । अपि च मुख्यतया नारायणशब्दार्थवाचित्वाद्ब्रह्मशब्दस्तत्पर एवेत्याह ॥ दोषारेति । यतो दोषारछिद्रशब्दा नातिभिन्नार्था अतस्तद्विरुद्धासंख्येयकल्याणगुणवान्नारायणशब्दार्थः । ब्रह्मशब्दस्य गुणबृंहितवाचित्वात्स एवार्थः । अतो नारायणस्यैव जिज्ञासाऽत्र विधीयत इत्यर्थः । इतोऽपि ब्रह्मशब्दस्य विष्णुपरत्वं श्रुतिसंसिद्धत्वादित्याह ॥ सिद्धत्वादिति । अस्यार्थः । अंभस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयानिति नारायणा-

नुवाकोपक्रमवाक्ये प्रतीयमानो जलशायित्वलिंगान्नारायणपदार्थ एव भवेत् । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति व्यासोक्तेः । यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधामिति कामतो विधिरुद्रादिपददातृत्वेनोक्तया श्रिया लक्ष्म्या स्वकारणभूतनारायणस्यैव मम योनि-रप्स्वंतः समुद्र इति अप्स्वंतरीरितत्वाच्च वेदांतरे सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा विधर्मिणि इत्यैतरेयश्रुता-वाज्ञाधृतमहदादिदेवतासमूहत्वेन प्रसिद्धस्य विष्णोरत्रापि तैत्तिरीयश्रुतौ यस्मिन्निदं संच वि चैधि सर्वं यस्मिन्देवा आधिविश्वे निषेदुरीति सर्वदेवाश्रयत्वमुक्त्वा समुद्रेऽतः कवयो विचक्षते मरीचीनां पदमिच्छंति वेधस इत्यस्य क्षीराब्धिशायित्वेनोक्तस्य विष्णोरत्रापि यमंतः समुद्रे कवयो वयंतीति समुद्रस्थानमुक्त्वा ऋचो अक्षरे परमेव्योमन्नित्यत्राक्षरनामत्वेन सिद्धस्य विष्णोरेवा-त्रापि यदक्षरे परमे प्रजा इत्यक्षरनाम चोक्त्वा मम योनिरप्स्वंतः समुद्र इति प्रकृतिकारणत्वेनोक्तस्यात्रापि यतः प्रसूता जगतः प्रसूतिरिति जगत्कारणत्वं च यदोषधीभिः पुरुषान्पशूंश्च विवेश भूतानि चराचराणीति विष्णुशब्दप्रवृत्तिनिमित्तं चोक्त्वा तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति वाक्यशेषगतेनांभस्य पार इति समुद्रशायिनमेवास्य वामस्येत्यादिसूक्तांतरेषु विष्णु-संबंधित्वेन प्रसिद्धनामलिंगैर्निर्दिष्टं तच्छब्देन परामृश्य ब्रह्मशब्देन ब्रह्मत्वं विदधाति तैत्तिरीयश्रुतिः । एवकारादन्ययोगव्यव-च्छेदार्थाद्ब्रह्मांतरनिवृत्तिः सिध्यति । अतो नारायणजिज्ञासाविधायकं प्रथमसूत्रमिति सिद्धं ॥ ❁ ॥ ❁ ॥

॥ ॐ जन्माद्यस्य यतः ॐ ॥ जिज्ञासा विहिता । तज्जिज्ञासा इतः परं क्रियते । तत्र लक्षणप्रमाणसाधनफलजिज्ञासया सहिता ब्रह्मजिज्ञासाऽभिप्रेता सूत्रकारस्याप्रधानानुयायित्वाद्गुणस्य । लक्षणसाधनादिकमंतरेण ब्रह्मजिज्ञासाया अनिराकांक्षत्वाच्चातो मुमुक्षोरधिकारिणो ब्रह्मजिज्ञासाविधाने सति किं लक्षणकं ब्रह्म केन साधनेन प्रसीदति प्रसन्नं च किं फलं ददातीत्याकांक्षोदेति । निगमनिरुक्तादिना व्युत्पन्नपदपदार्थस्य मीमांसाधिकारित्वाद्बृहत्त्वगुणयोगेन स्वरूपमात्रं ब्रह्मपदादेव प्रतीतमित्यस्य वामस्येत्यादिसूक्तैरंभस्य पार इत्याद्युपनिषद्भिरन्यैश्चागमैः प्रतिपादितं जगज्जननीप्रादुर्भावकारणं समुद्रशायिब्रह्म जिज्ञास्यमित्युक्तं । तज्जन्माद्यस्य यत इति सूत्रोक्तजगज्जन्मादिकारणत्वेन स्वेतरसमस्तवस्तुभ्यो व्यावर्तत इत्यर्थः । अस्य प्रत्यक्षादिपरिदृश्यमानप्रपंचस्य यतो जन्मादि । तद्ब्रह्मेति शेषः । एतच्च सूत्रं श्रुतिसिद्धस्य जन्मादिकारणत्वस्याभिधायकं न कार्यत्वहेत्वनुमितस्येत्याशयवानाह ॥ स्राष्टिरिति । जन्मादिर्यस्योत्पत्त्याद्यष्टकस्य तदिदं जन्मादीति तद्गुणसंविज्ञानबहुव्रीहिसमासस्य विवक्षितत्वात् । सूत्रगतजन्मादिपदेन सृष्ट्यादयो मोक्षांता भावविकारा उपात्ताः । लब्धजन्मनो हि वस्तुनः स्थित्यादिरिति जन्मन आदित्वं च युज्यते । ते च जन्मादयो हरेरेव सकाशान्नारायणानुवाकोक्ताः । तथा हि । यतः प्रसूता जगतः प्रसूतिः सर्वे निमेषाजज्ञिरे विद्युतः पुरुषादधीतिकालसृष्ट्यभिधानेन सर्वसृष्टिरुक्ता तदधीनत्वादितरसृष्टेः । यस्मिन्निदं संच वि चैधि सर्वं यस्मिन्देवा अधिविश्वे निषेदुरिति स्थितिः । वेनस्तत्पश्यन्विश्वानि भुवनानि विद्वान्यत्र विश्वं भवत्येकनीलमिति ज्ञानं संहारश्च । वेनस्तदित्यस्यार्थः । यत्र विश्वमेकमनीडं लोकांतरनाशात् सूक्ष्मरूपेणैकस्थानं भवति तद्ब्रह्म पश्यन्वेनो

नाम ऋषिरस्तत्प्रसादेन विश्वानि भुवनानि विद्वानभवदिति प्रतीतेः । विवेश भूतानि चराचराणीति नियमनं । नियामकत्वेन ब्रह्मणश्चराचरप्रवेशप्रतीतेः । ऋतस्य तंतुं विततं विचृत्य तदपश्यत्तदभवत् प्रजास्वित्यज्ञानबंधौ । ऋतस्य ब्रह्मणोऽधीनं तंतुं प्रकृतिपाशं ज्ञानबंधकं प्रजासु विततं विचृत्य पृथक् पृथक् वेननामको हिरण्यगर्भोऽपश्यदिति प्रतीतेः । य एतद्विदुरमृतास्ते भवंतीति मोक्षः । ज्ञानान्मोक्षः श्रुतोऽप्यवांतरव्यापारमंतरेण न सिध्यतीति भगवत्प्रसादसाध्य इत्यवगतेः श्रौतमेवैतद्भगवतो लक्षणं जन्मकारणत्वं स्थितिकारणत्वं संहारकारणत्वं पृथक् पृथग्लक्षणमवगंतव्यं । अव्याप्त्यतिव्याप्तिशून्यत्वात् । यो देवानां प्रभवस्य विश्वाधिको रुद्रो महा ऋषिरित्यादितत्तच्छाखासु रुद्रादीनामपि जगत्कर्तृत्वादिलक्षणमुपलभ्यत इत्यत आह ॥ यन्नामानीति । नामानि सर्वाणि यमाविशंति तं वै विष्णुं परममुदाहरंति । यो देवानां नामधा एक एव संप्रश्नं तं भुवना यंतीत्यादिश्रुतेः सर्वाणि रुद्रादिनामानि विष्णावेव मुख्यानि रुद्रादिषु गौणान्येव । अतो मुख्ये संभवत्यमुख्ये मुख्यकल्पनायोगाद्रुद्रादीनां जगत्कारणत्वेन किंचिदालंबनं । सोमः पवत इति श्रुत्यर्थः । ननु सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्या जनिताऽग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत विष्णोरिति विष्णोरप्यन्यतो जन्मादिकं श्रूयते । तत्कथं तस्यैव जगज्जन्मादिकारणत्वमित्यत आह ॥ गुणाः श्रुता इति । गुणाः श्रुताः सुविरुद्धाश्च देवे संत्यश्रुता अपि नैवात्र शंका । चिंत्या अचिंत्याश्च तथैव दोषाः श्रुताश्च नाशैर्हि तथा प्रतीता इति वचनान्न काचिच्छ्रुतिर्हरिदोषप्रतिपादनपरा स्यात् । यत्तक्तं जनितोत विष्णोरिति तत्सोमादिशब्दवाच्यात्क्षीराब्धिशयनान्मूलरूपाद्विष्णुशब्दाभिधेयप्रादुर्भावरूपस्य व्यक्त्यपेक्षयोपपन्नमिति नान्यस्माद्विष्णुजनितत्ववाची ।

इतोऽपि कारणान्न विष्णोर्जननादिदोषपरत्वं श्रुतीनामित्याह ॥ प्रीत्येति। भगवतः प्रीत्युत्पादनद्वाराऽधिकारिणां मोक्षप्रतिपादनपरत्वात्सर्वेषां देवानां न तस्य दूषणे तात्पर्यं किंतु शाश्वतादिगुणत्वेन प्रीतिसाधनत्वाद्बाधस्यान्यथा भगवदप्रीतिसाधनदोषबोधोत्पादकत्वेन नरकावहत्वात्त्याज्यमेव भवेद्वेदस्य। अतो वेदानां भगवद्गुणोत्कर्ष एव महातात्पर्यं। ननु हरौ दोषावेदकत्वेनानर्थावहत्वाद्धेयोऽपि वेदः प्रमाणं स्यादेव दुर्गंधादिबोधजनकवदित्यत आह॥ उपक्रमादिवदिति। उपक्रमादिवत्फलमपि वाक्यतात्पर्यनिश्चायकत्वेनावगतं फलं च मुख्यं कैवल्यमेव। अतः फलवदर्थबोधकस्यैव वाक्यस्य प्रामाण्यं निश्चेतुं शक्यं। अन्यथा वाक्यतात्पर्यनिश्चयाभावाज्जरद्गवादिवाक्यवदप्रामाण्यं स्यादेवेत्याशयः। ननु लिंगपुराणादिषु रुद्रादेरेव जगत्कारणत्वं तदुपसर्जनत्वं विष्णोरुच्यत इत्यत आह ॥ न पुराणादीनि। रुद्रादेर्जगत्कारणत्वादौ न पुराणादिकं प्रमाणं श्रुतिविरोधात्। तदुक्तं जैमिनिना। विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति। न च लिंगपुराणादेः श्रुतिमूलत्वं। शैवान्पाशुपतांश्चक्रे इति दर्शनांतरमूलत्वोक्तेर्मोक्षधर्मे। किंच त्वं च रुद्र महाबाहो मोहशास्त्राणि कारयेति हर्याज्ञया दुर्जनमोहनार्थं रुद्रादिभिः प्रणीतत्वस्य वाराहोक्तत्वान्न शैवपुराणोक्तं ग्राह्यं। विष्णुमाहात्म्यादिकं तु तत्रोक्तमपि वेदाविरुद्धत्वाद्ग्राह्यं। इतोऽपि न रुद्रादेर्जगत्कारणत्वं सर्वनामवत्त्वाभावादित्याह ॥ न सर्वनामतेति। जगत्कर्तुर्हि मुख्यत इंद्रादिसर्वनामवत्त्वं भवेत्। न च तद्रुद्रादेः श्रुतं कुत्रचित्। प्रत्युत विष्णोरन्यत्र निषिद्धं। यो देवानां नामधा एक एवेत्यत्रैवकारेण। न चैतद्वाक्यं रुद्रादिविषयमिति वाच्यं। अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुरिति वाक्यशेषविरोधात्। ॥१०॥

अपि च लिंगात्पद्मनाभ एवोक्तः । किंच विष्णोर्नियमेनाज्ञानपारतंत्र्यादिदोषराहित्यश्रवणाद्वेदेषु तच्छ्रवणाच्चान्येषां न जगत्कारणत्वमित्याह ॥ अदोषवचनादिति । रुद्रादेरज्ञानादिमत्त्वं पाशुपताद्यधिकरणेषु श्रौतीकरिष्यत्याचार्यः । इदानीमुक्तार्थोपसंहारमुखेन जगज्जन्मादिकारणत्वं स्वलक्षणं न तटस्थलक्षणमित्याह ॥ जन्माद्यस्येति । एतच्च सूत्रकारेण श्रीभागवत उक्तं । ब्राह्मे मुहूर्ते चोत्थाय वार्युपस्पृश्य माधवः । दध्यौ प्रसन्नकरण आत्मानं तमसः परं । यत्तत्परंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषं । ब्रह्माख्यमस्योद्भवनादिहेतुभिः स्वलक्षणैर्लक्षितभावनिर्वृतिमिति । तदाह ॥अस्येति। अतः सूत्रकृदभिप्रायापरिज्ञानमूलं तटस्थलक्षणवर्णनं । किंच किं विशेषणं ब्रह्मेति विशिष्टस्याकांक्षितत्वाज्जन्मादिकर्तृत्वविशेषणमेव ब्रह्माभिधातव्यं न तु तदुपलक्षणं । अनाकांक्षाभिधानप्रसंगात् । अपि च यत्र काकस्तद्देवदत्तगृहमिति वैय्यधिकरण्येन प्रयोगो ह्युपलक्षणस्य दृष्टः । अत्र तु जगज्जन्मादिकारणं ब्रह्मेति सामानाधिकरण्येन प्रयोगादुपलक्षणत्वं प्रतीतिविरुद्धं । अतो लक्षणव्यावृत्त्यभावादद्वैतमते लक्षणसूत्रमनुपपन्नमित्याशयवानाह ॥ अत इति । यतो जगज्जन्मादिकर्तृत्वं ब्रह्मणो लक्षणमाह सूत्रकारोऽत एव जीवं व्यावर्तितवान् । न हि जगज्जन्मादिकर्तृत्वं जीवस्य संभवति। सर्वज्ञत्वसर्वशक्तिरहितत्वात् । अपि च जीवस्य स्वतंत्रकर्तृत्व इतरव्यपदेशाद्धिताकरणदोषप्रसक्तिरिति सूत्रकृता वक्ष्यमाणं दूषणं व्याहन्येत। किंच निर्विशेषत्वांगीकाराद्ब्रह्मणस्तल्लक्षणसूत्रं परमतेऽनुपपन्नमित्याशयवानाह ॥ निर्गुणत्वामिति । जगज्जन्मादिकर्तृत्वं वदता सूत्राकारेणैवार्थात्सर्वज्ञत्वसर्वेश्वरत्वादेरभ्युपगमात् । ब्रह्मणो निर्गुणत्वं निराकृतं । नन्वयो दहतीत्यत्र यथाऽग्नेर्दाहक-

त्वमयस्युपचर्यते एवं मायागतं कर्तृत्वं ब्रह्मण्यौपचारिकं किमिति न स्यादित्यत आह ॥ भेदेनेति। इदमत्राकूतं। सर्वकर्तृत्वादिब्रह्मादिधर्माणां स्वाभाविकत्वे तद्विरुद्धजीवधर्माणां च स्वाभाविकत्वे विरुद्धधर्माक्रांतत्वाज्जीवपरमयोरभेदो व्याहतः स्यात्। अतस्तत्सिध्यर्थं जगत्कर्तृत्वं ब्रह्मणो मुख्यं न संभवतीत्यौपचारिकं कल्पितं मायिना। न च तद्युक्तं। जीवेशयोर्भेदाभ्युपगमेन भगवद्धर्माणां स्रष्टृत्वादीनामग्निदाहकत्वस्येव मुख्यत्वसंभवादौपचारिकत्वानुपपत्तेः। मुख्यार्था-संभवे हि तत्संबंधाल्लक्षणा दृष्टा शब्दस्यार्थांतरे गंगायां घोषः प्रतिवसतीत्यादौ। न च साक्षी चेता केवलो निर्गुणश्चेति निर्गुणत्वश्रवणाद्ब्रह्मणः सर्वकर्तृत्वश्रुतेर्मुख्यार्थासंभवः। सत्त्वादिप्राकृतगुणराहित्यविषयत्वेन सावकाशत्वान्निर्गुणत्वश्रुतेः। अन्यथा साक्षी चेतेत्यादिपदानां प्रवृत्तिनिमित्ताभावेन वैयर्थ्यं स्यात्। न च निर्विशेषत्ववादिति ब्रह्मणः केनचित्संबंधो वक्तुं शक्योऽतः संबंधानुपपत्त्योरभावान्न लाक्षणिकं ब्रह्मणि जगत्कर्तृत्वादिपदकदंबकं। ननु जीवाद्भेदे हि ब्रह्मणः सर्वकर्तृत्वादिकं मुख्यं सिध्येत्स एव कथमित्यत आह ॥ कथमिति। दोषवतो जीवान्नित्यगुणस्य ब्रह्मणो भेद एव युक्तः। अन्यथा नित्यगुणवत्त्वव्याघातात्। अथैतद्विरोधपरिहाराय निर्गुणमेकं कल्पयित्वा तस्य जीवेनाभेद इष्यते तदा नित्यगुणवतो जगत्कारणत्वाद्ब्रह्मणो नित्यं भिन्नं स्यात् तन्निर्गुणमित्यद्वैतभंगः। न च जगत्कारणमेव ब्रह्माध्यस्तगुणतया निर्गुणमिति वाच्यं। अनिर्वचनलक्षणाध्यासस्य प्रागेव दूषितत्वात्। एवमपि निर्गुणत्वं चेदपेक्षितं तत्सकलकल्याणगुणाकराद्ब्रह्मणो व्यावृत्तं परिशेषान्निखिलदोषवद्धर्मतयाऽसुरत्वमेव स्यादित्यर्थः स्यात्। स्यादेतत्। यदेतज्जगज्जन्मादिकर्तृत्वलक्षणं ब्रह्मणोऽभिहितं

तर्त्कि तद्वतो भिन्नमुताभिन्नं भिन्नाभिन्नं वा। यदि भिन्नं तर्ह्यपसिद्धांतः। नाप्यभिन्नं। लक्ष्यलक्षणभावव्याकोपात्। न च भिन्नाभिन्नं। विरोधात्। अतो जगत्कर्तृत्वादिधर्माणां निर्वक्तुमशक्यत्वाद्भेदकाभावेनैक्यमेव जीवपरयोरिति। नैतत्साधु। ऐक्यस्यापि वक्तुमशक्यत्वात्। तथा हि। ऐक्यमपि किं तद्वतो भिन्नमुताभिन्नमाहोस्विद्भिन्नाभिन्नं। यद्यभिन्नं न तर्हि शास्त्रेण प्रतिपाद्यं। स्वरूपस्य स्वयंप्रकाशमानत्वात्। यदि भिन्नं यद्भिन्नं तन्मिथ्येत्यभ्युपगमात्। ऐक्यस्य मिथ्यात्वेन जीवब्रह्मणो-र्भेदस्य पारमार्थ्यं स्यात्। परस्परविरुद्धयोरेकतरनिषेधस्यान्यतरविधिनियतत्वात्। नापि भेदाभेदौ। ऐक्यतद्वतोस्तयोरपि भेदाभेदाभ्यां भेदाभेदांतरापेक्षयाऽनवस्थापातात्। नन्वैक्यस्य स्वयमेव निर्वाह्यनिर्वाहकरूपत्वान्न भेदादिकल्पनावकाशोऽस्येति चेन्नैतत्साधु। विकल्पासहत्वात्। तथा हि। निर्वाह्यनिर्वाहकशब्दावेकार्थौ किं भिन्नार्थौ वा। न प्रथमः। पर्यायत्वेन सहप्रयोगानु-पपत्तेः। नोत्तरः। परस्परप्रतियोगितया निर्वाह्यात् निर्वाहकस्य भेदोऽनिर्वाहकान्निर्वाहकस्य भेदस्तयोरपि भेदयोरन्यौ भेदौ तयोरप्येवं तयोरप्येवमित्यनेकमुखानवस्थापातात्। तस्मादैक्यप्रतिबंदीपराहतत्वान्न लक्षणखंडनं संबोभवीति। तदाह॥ लक्ष्येति। एवं तावज्जन्मादिकारणत्वस्य तटस्थलक्षणत्वं निराकृत्येदानीं सत्यज्ञानादिपदानामखंडार्थत्वं दूषयति॥ सत्येति। सत्यं ज्ञानमनंतं ब्रह्मेत्यत्र सत्यादिपदानामेकार्थत्वे पर्यायत्वप्रसंगः। न च सत्यत्वादिविशेषाभावेऽपि ब्रह्मण्य-सत्यादिव्यावृत्तिद्वारा पर्यायत्वं। व्यावर्तकविशेषाभावे ब्रह्मण्यसत्यादिव्यावृत्तेरसंभवाद्वैयर्थ्याच्च। असत्यादिपदार्थापेक्षया सत्यादिपदार्थावगतिः सत्यादिपदार्थापेक्षयाऽसत्यादिपदार्थावगतिरित्यन्योन्याश्रयप्रसंगात्। बौद्धराद्धांतापत्तेश्च। ब्रह्मविदा-

म्रोति परमिति उपक्रमे किं लक्षणकं ब्रह्मेत्याकांक्षायां सत्यं ज्ञानमनंतं ब्रह्मेत्युत्तरवाक्यं स्वरूपमात्रपरं चेत् । प्रश्नाननुगुणत्वादवगतार्थत्वाच्चानर्थकं स्यात् । विशेषराहित्यादिविशेषवत्त्वान्निर्विशेषं ब्रह्मेत्युक्तेरहं मूक इतिवत्स्वव्याघातकत्वं स्यात् । न च कुत्रचिच्छब्दो निर्विशेषार्थः । एकस्यापि पदस्य प्रकृतिप्रत्ययभेदेन संख्यादिविशिष्टार्थत्वात् । सत्यादिपदानामखंडार्थत्वं खंडितं बोद्धव्यं । अतः सत्यज्ञानादिगुणकमेव ब्रह्म सत्यादिपदार्थ इत्यभ्युपगंतव्यं । गुणगुणिनोर्भेदस्यानवस्थादिदुष्टत्वेनानुभवविरुद्धत्वेनाभावेऽपि विशेषबलादेव गुणगुणिभावः सिध्यति । सविशेषस्तद्यथा नीलं मुखं घटस्य शौक्ल्यमित्यादि । एवंविधा विशेषाः प्रतिद्रव्यमनंताः स्वनिर्वाहकतया युक्ताः परस्परविशेषणविशेष्यभावेन प्रतीयमानाः संति । परस्परविशेषणविशेष्यभावश्च शुक्लो घटो घटस्य शौक्ल्यमित्यादिरवगंतव्यं । तस्मात्पक्षांतरासंभवाद्विशेषबलादेव स्वगतभेदवर्जितमपि ब्रह्म सत्यज्ञानानंतादिगुणं भण्यते । श्रुतिनिकरैर्गुणानां ब्रह्मणा भेद एवंधर्मान्पृथक् पश्यंस्तानेवानुविधावतीत्यादिश्रुतिसिद्धः । तदेवं स्वगतभेदवर्जितस्य भगवतः स्वनिर्वाहकविशेषबलात्सिद्धो लक्ष्यलक्षणभावः ॥ ❁ ॥ ❁ ॥

॥ ॐ **शास्त्रयोनित्वात्** ॐ ॥ इदानीमनुमानाद्रुद्रादेरपि जगज्जन्मादिकारणत्वमाशंक्य तत्परिहारत्वेन शास्त्रयोनित्वादित्येतत्सूत्रं विवृणोति ॥ **शैवादित्यादिना** । रुद्रस्य जगत्कारणत्वप्रतिपादके शैवाद्यागमः प्रमाणं रुद्रप्रोक्तत्वात् प्रत्यक्षफलकर्मविधायकशैवाद्यागमवदिति चेत् । नैतत्साधीयः । विमतागमोऽप्रमाणं रुद्रप्रोक्तत्वात् फलव्यभिचारिकर्मविधायकशैवाद्यागमवदित्यपि वक्तुं शक्यत्वात् । विवादपदं सकर्तृकं कार्यत्वात् । यः कर्ता स च रुद्र इत्यनुमानांतरं रुद्रस्य

जगत्कारणत्वे मानमिति चेन्न । विमतो जगत्कारणं न भवति चेतनत्वाच्चैत्रवदित्यनुमानपराहतत्वात् । न चैतदनुमानमन्य-तराश्रयासिद्धत्वादिदोषयुक्तं । अतिप्रसंगरूपत्वात् । एवमुक्तेन न्यायेन प्रमाणांतरासंभवाच्छास्त्रप्रमाणकत्वं जगत्कारणस्या-वश्यमभ्युगंतव्यं । अनुमानागम्यत्वं चेशस्य नावेदविन्मनुते तं बृहंतं सर्वानुभूमात्मानं सांपराये । नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठेत्यादिश्रुतिसिद्धं । किं च कार्यत्वहेतोः पक्षधर्मताबलान्न सर्वज्ञस्यैकस्य सर्वकर्तुः सिद्धिः । लौकिक कर्त्रनपेक्षोत्पत्तिकवनकर्ता किंचित्कर्ता च पुंस्त्वात्संमतवत् । प्रसिद्धकर्त्रनपेक्षोत्पत्तिकवृक्षस्य कर्ता तस्यैव न साकल्येन ज्ञाता पुंस्त्वात्समतवदित्यनुमानकुंठितशक्तित्वान्नानुमानमीशज्ञापनसमर्थं । बहुतरातिप्रसंगानुमानपराहतं चेशानुमानं । तथा हि । तुरगः शृंगी खपुष्पवत् वंध्या पुत्रवती वस्तुत्वात्संमतवत् । षष्ठो रसो रसत्वात्प्रथमरसवत् । न च वस्तुत्वादित्यस्य हेतो-र्घटादौ व्यभिचारः शंकनीयः । पक्षतुल्यत्वात् । न च प्रत्यक्षबाधितविषयत्वं वस्तुत्वहेतोः । ईशानुमानेऽपि तुल्यत्वात् । ईशस्य दृष्ट्ययोग्यत्वं चेत्तुरंगशृंगादेरपि तुल्यं । तस्मादतिप्रसंगादिदूषणपराहतत्वान्नानुमानं जगत्कारणस्य साधकं ॥ ❁ ॥

॥ ॐ तत्तुसमन्वयात् ॐ ॥ नन्वस्तु वेदैकवेद्यत्वं जगत्कारणस्य तद्विष्णोरेव कथमित्याशंक्य परिहारत्वेन तत्तु समन्वया-दित्येतत्सूत्रं विवृणोति ॥ उपक्रमादीत्यादिना । एवं तावत्स्वतंत्रानुमानस्य परवस्तुन्ययोग्यत्वादुपक्रमोपसंहारादिन्यायैरेव वेदानां ब्रह्मण्यन्वयकारणैः करणव्युत्पत्त्याऽन्वयनामभिः सम्यगालोचने सर्ववेदमुख्यार्थो विष्णुरेवेति सेत्स्यति नापर इत्यर्थः । इत ऊर्ध्वमाध्यायपरिसमाप्त्योरेतस्यैवार्थस्य समर्थनं भविष्यति । अन्वीयंत एभिरिति करणव्युत्पत्त्याऽन्वयविरुद्धत्वात्कथमि-तरेषां सर्ववेदवेद्यत्वं ॥ ❁ ॥ ❁ ॥

॥ ॐ ईक्षतेर्नाशब्दं ॐ ॥ ननु यतो वाचो निवर्तंते यद्वाचानभ्युदितमेतदप्रमेयं ध्रुवमित्यादिवाक्यविरुद्धत्वात्कथं सर्ववेद-
वेद्यत्वं ब्रह्मण इत्याशंक्य परिहारत्वेनेक्षतेर्नाशब्दमित्यादिसूत्रं विवृणोति भगवानाचार्यः ॥ ईक्षणीयत्वत इत्या-
दिना। आत्मन्येवात्मानं पश्येत् । आत्मा वा अरे द्रष्टव्यः । तरति शोकमात्मवित् । परात्परं पुरिशयं पुरुषमीक्षत
इत्यादिवचनैरीक्षणीयो विष्णुः प्रतीयते। न च प्रत्यक्षादिनेक्षणीयत्वं तस्य । तं त्वौपनिषदं पुरुषं पृच्छामीत्यौपनिषदत्वावगतेः ।
अतो वेदवाच्यत्वं एवेक्षणीयत्वं सिध्यति ब्रह्मणः । न च वाच्यत्वाभावेऽपि लक्षणयेक्षणं लक्षणं तस्य । यत्किंचिच्छब्दवाच्य-
स्यैव वस्तुनः शब्दांतरलक्ष्यत्वनियमदर्शनात् । गंगायां घोषः प्रतिवसतीत्यादौ न हि गंगापदलक्ष्यं तीरं तीरपदेनाप्यवाच्यं
भवति । तथा हि । सति किं तत्तीरपदलक्ष्यमित्याकांक्षायामन्यत्पदं वक्तव्यं । तेनापि किं लक्ष्यमित्यनवस्थाप्रसंगात् । न हि
तीरपदलक्ष्यं तीरमेवेति भवति । तथा सति गंगापदलक्ष्यस्यापि गंगात्वप्रसंगात् । अतो वाच्यत्व एव लक्ष्यत्वं ब्रह्मणः
सेत्स्यति । नान्यथा । अवाच्यत्वश्रुतेरर्थमुत्तरत्र वक्ष्यत्याचार्यः । नन्वीक्षणीयत्वेन न वाच्यत्वं ब्रह्मणः सिध्यति ।
नैतत्साधु । इक्षुमाधुर्यं क्षीरमाधुर्यं गुडमाधुर्यमित्यादिशब्दैर्माधुर्यविशेषशब्देन च वाच्यत्वात् । विशदं क्षीरमाधुर्यं स्थिरमा-
ज्यस्य तीक्ष्णकं । गुडस्य पनसादीनां निर्हारीत्यभिधीयत इति सूदशास्त्रोक्तेश्च । ननु नद्यास्तीरे पंच फलानि संतीत्यत्र
नदीतीरफलसंबंधो वाक्यर्थः । न चासावेकैकपदवाच्यः । तद्वद्ब्रह्मावाच्यमिति चेन्नैवं । वाक्यार्थपदवाच्यत्वाद्वाक्यस्य ।
अतो नावाच्यं नाम यत्किंचित्प्रामाणिकं । न च यतो वाचो निवर्तंत इत्यादिश्रुतेर्यतः शब्दानिर्दिष्टाद्ब्रह्मणः सर्वशब्दनिवृत्तिरि- ॥१३॥

त्यर्थः । अहं मूक इतिवत्स्वव्याहतत्वात् । किं च यः शब्दैर्लक्ष्यत्वमेव ब्रह्मणो वदति स लक्ष्यशब्दवाच्यत्वं कथं परिहरेत् । तेनाप्यवाच्यत्वेऽलक्ष्यताप्रसंगात् । अपि च सर्ववेदांतेष्वेकस्यापि पदस्य ब्रह्मणि मुख्यवृत्तिं प्रतिपादयितुमसमर्थस्य वादिनस्तन्मार्गवर्तिनां च मीमांसकाभिमानो लज्जाकर इत्याह ॥ एकस्येति ॥ ❁ ॥ ❁ ॥

॥ ॐ गौणश्चेन्नात्मशब्दात् ॐ ॥ ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ ॥ नन्वीक्षणीयत्वेन वाच्यत्वं मायाशबलस्य ब्रह्मणो न शुद्धस्येत्याशंक्य परिहाररूपत्वेन तावद्गौणश्चेन्नात्मशब्दात्तन्निष्ठस्य मोक्षोपदेशादिति सूत्रद्वयं विवृणोति ॥ आत्मेत्यादिना । आत्मानं पश्येदित्यादिषु द्रष्टव्यत्वेनोदित आत्मा न मायावच्छिन्नः । आततत्वेनापरिच्छिन्नत्वात् । पूर्णमेव ब्रह्म जिज्ञास्यत्वेन प्रतिज्ञातं । तदेव जगज्जन्मादिकारणत्वेन लक्षितं । तदेव शास्त्रप्रमाणकमुक्तं । तत्रैव श्रुतिसमन्वयः प्रतिज्ञातः । अतः श्रुतिसूत्रासंगतेर्वंध्यापुत्रोपमं मायाशबलं वाच्यं शुद्धं ब्रह्म लक्ष्यमित्ययं विभागो श्रुतिसूत्रबहिर्भूतः । किं चात्मब्रह्मादिशब्दावाच्यत्वे ब्रह्मणोऽनात्मत्वादिकं स्यात् । किं च तरति शोकमात्मविदिति आत्मशब्दवाच्यस्य ज्ञानान्मोक्षः श्रूयते । एतच्च लक्ष्यज्ञानान्मोक्षं वदता परित्यक्तं स्यात् । अतः श्रुतपरित्यागोऽश्रुतकल्पनं च बहुतरवाक्येषु तस्य स्यातां । स्वपरसंवादेन यद्यसाविदं दूषणं द्वयमपि प्रत्येकाकारेण लोकनिंदितं स्वस्य भूषणमिति ब्रूयात् । तर्ह्येतादृशबहुतरदुर्घटभूषणैरलंकृतो वस्त्रहीनालंकारस्यानुचितत्वादंधंतमो नित्यदुःखं चोत्तरीयप्रधानवस्त्रत्वेन स्वीकुर्यात् । इदमेव वसनद्वयमात्मशब्दोदितं भगवंतमनंगीकुर्वतां निर्गुणवादिनां भविष्यतीत्यत्र प्रमाणमाह ॥ अनंदा इत्यादिना ॥ ❁ ॥ ❁ ॥

॥ ॐ हेयत्वावचनाच्च ॐ ॥ इतश्च न मायावच्छिन्न आत्मशब्द इत्याह ॥ हेयत्वेति । तमेवैकं जानथात्मानमित्यहेयत्वश्रवणान्नात्मशब्दवाच्योऽस्ति गुणयुक्तः । अन्या वाचो विमुंचथेति गुणशब्दस्यामुख्यस्यात्मनो हेयत्वं श्रूयते । त्रिगुणयुतस्यापि ब्रह्मादेर्भगवत्परिवारतया ग्राह्यत्वेऽपि प्रधानतया हेयत्वमस्तीत्यदोषः ॥ ❁ ॥ ❁ ॥

॥ ॐ स्वाप्ययात् ॐ ॥ इतश्च न मायावच्छिन्न एव शब्दवाच्य इत्याह ॥ पूर्णस्येत्यादिना । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इत्यात्मशब्दार्थस्य ब्रह्मणो मूलरूपस्यावताररूपस्य च पूर्णत्वं श्रूयमाणं मायावच्छिन्नत्वे व्याहतं स्यादित्यर्थः ॥ ❁ ॥ ❁ ॥

॥ ॐ श्रुतत्वाच्च ॐ ॥ इतश्च न शब्दावाच्यं ब्रह्मेत्याह ॥ एवं चेत्यादिना । श्रुतत्वाच्चेत्यत्र सूत्रार्थप्रतिपादनपरेण च साक्षी चेता केवलो निर्गुणश्चेत्यत्र निर्गुणपदवाच्यं त्रिगुणातीतब्रह्मणोऽन्यन्न किंचन गौणं भवितुमर्हति व्याहतत्वात् । यदि गुणाभावद्वारा निर्गुणशब्देन ब्रह्मोपलक्षितमित्युच्यते । तर्हि गुणाभावोपलक्षितपदवाच्यं स्यात् । यदि गुणाभावोपलक्षितद्वारा तत्पदेनापि ब्रह्मोपलक्षितं तर्हि तत्राप्येवं तत्राप्येवमित्यनवस्थादिदूषणाकरत्वेन निर्गुणवादिमतं महाजनैरत्यंतहेयं स्यात् । तदुक्तं कैश्चिदीक्षतेर्नाशब्दमित्यादिश्रुतत्वादित्यंतसूत्रसंदर्भेण जगतः प्रधानकारणत्ववादिमतं निराक्रियत इति तदयुक्तमित्याह ॥ न चेत्यादिना । यदि प्रधानस्य जगत्कारणत्वमत्र निषिध्यते तर्हीक्षतेर्न प्रधानमिति सूत्रं स्यात् । न हीक्षतेर्नाशब्दमिति । न ह्यशब्दपदस्य प्रधाने रूढिरस्ति । स शब्दरहितत्वयोगश्चेदसिद्धः । सांख्यैस्तदनभ्युपगमात् । नाप्यश्रौतत्वमेवाशब्दपदोक्तं ।

प्रधानस्याजामित्यादिना श्रूयमाणत्वेनाश्रौतत्वस्याभावात् । किंच यावच्छब्दावाच्यत्वं यद्वाचानभ्युदितमिति श्रुतिप्राप्तं न परिहीयते ब्रह्मणि न तावद्वेदानां समन्वयप्रतिज्ञानंतवेदार्थत्वेन निराकांक्षा । अतो ब्रह्मणः शब्दगोचरत्वप्रतिपादनमेवात्र पूर्वाधिकरणसंगतं न तु प्रधानस्य जगत्कारणत्वनिषेधः । स चेक्षतिकर्मव्यपदेशात्स इत्यादौ करिष्यते । अपि च यदि वेदवाक्यानां सर्वेषामपि लाक्षणिकत्वं ब्रह्मणि स्यात् । न तर्हि समन्वयप्रतिज्ञा घटेत । न ह्यमुख्यार्थे समीचीनोऽन्वयो वाक्यस्य । समन्वयश्च जगत्कारणे ब्रह्मणि सूत्रकृता प्रतिज्ञातः । तदेव विज्ञास्यत्वेन प्रतिज्ञातं । तस्मादथातो ब्रह्मजिज्ञासेत्यादिसूत्रेषु न निर्गुणस्यावकाशः संभवति । न च लाक्षणिकत्वेनावकाश इति वाच्यं । मुख्यपरित्यागे कारणाभावात् । न च वेदांतावेद्यस्यापि निर्गुणस्य वस्तुनो मानांतरेण सिद्धिर्वाच्या । अवाच्यत्वादज्ञेयत्वान्निर्विशेषत्वाच्च । न ह्यवाच्यत्वादिलक्षणं किंचिन्मेयं दृष्टं । किंचाप्रमेयत्वान्निर्गुणस्य लक्षणावृत्तिरपि शास्त्रस्य तस्मिन्न स्यात् । न ह्यप्रमेयं किंचित्क्वचिल्लाक्षणिकं दृष्टं । तस्माच्छास्त्रेण प्रतिज्ञास्यं गुणपूर्णं वासुदेवाख्यमेव युक्तं । यदि विज्ञेयत्वादिशून्यं निष्प्रमाणकमपि निर्गुणमवश्यमभ्युपगम्यते । अभ्युपगम्यतां नाम मनस्येव । किं त्वेतच्छास्त्रप्रतिपाद्यमिति नोच्यतां । यद्यशब्दं वेद्यत्वेनांगीकृतमप्येतच्छास्त्रवेद्यमित्युच्यते तर्हि स्वोक्तिविरोधादेतच्छास्त्रापहारमात्रं स्यात् । न त्वर्थसिद्धिः । तर्हि ब्रह्मणोऽवाच्यत्ववचनस्य का गतिरित्यत आह ॥ अद्भुतत्वादिति । अतः सिद्धं शास्त्रगोचरत्वं ब्रह्मणः ॥ ❁ ॥ ❁ ॥

॥ ॐ आनदंमयोऽभ्यासात् ॐ ॥ वृत्तवर्त्तिष्यमाणयोः संगतिमाह ॥ एवमिति । पूर्वं सामान्येन शास्त्रसमन्वयो ब्रह्मणि व्युत्पादितः । तमेव संप्रति विभज्य प्रतिपादयति । आनंदमय इत्यादिनाऽध्यायशेषेण सूत्रकार इत्यर्थः । तत्र तावदर्थांतरेषु निरूढशब्दानामित ऊर्ध्वमापादपरिसमाप्तेर्विष्णौ समन्वयः प्रतिपाद्यत इत्याह ॥ तत्रेति । तत्रापि प्रथमाधिकरणस्यैकत्रानि· रूढत्वेन गुणिसामान्यवाचिनामानंदमयादिशब्दानां गुणवाचिनामानंदादिशब्दानां ब्रह्मणि समन्वयः प्रतिपाद्यत इत्याह ॥ गुणिसामान्येति । तैत्तिरीयके श्रूयते । स वा पुरुषोऽन्नरसमयः तस्माद्वा एतस्मादन्नरसमयादन्योंऽतर आत्मा प्राणमयस्तस्मात्प्राणमयादन्योंऽतर आत्मा मनोमयस्तस्माद्वा एतस्मादन्नमयादन्योंऽतर आत्मा विज्ञानमयस्तस्माद्वा एतस्माद्विज्ञानमयादन्योंऽतर आत्मा आनंदमय इति । तत्र संशयः । किमन्नमयादयः कोशाः किं विष्णुरिति । न विष्णुः । कुतः । विकारात्मकत्वात् । तथा हि । श्रुत्यंतरे पठिता अन्नमयप्राणमयमनोमयविज्ञानमयानंदमया मे शुद्ध्यंतामिति । अत्रोच्यते । विष्णुरेवानंदमयादयः । येऽन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते आनंदं ब्रह्मणो विद्वान् विज्ञानं ब्रह्म चेद्वेदेति ब्रह्मशब्दालंबनतया प्रतीयमानत्वात् । तदेव ब्रह्म परमिति श्रुतेर्ब्रह्मशब्दस्तु विष्ण्वेकविषयः । यदुक्तमानंदमयादिशब्दानां कोशार्थत्वं श्रुत्यंतरे उक्तं तन्न । तत्र ब्रह्मशब्दाभावात् । त्वक्चर्मादिविकारप्रायपठितत्वाच्छुद्ध्यंतामिति शुद्धिप्रार्थनालिंगाच्च । यत्र यत्र शाखासु ब्रह्मशब्दसामानाधिकरण्येन शब्दाः पठ्यंते तत्र तत्रानेनैव न्यायेन तैर्हरिरेवोच्यते । अयमेवाभ्यासो ब्रह्मशब्दस्य यः प्रत्यन्नमयादिशब्दमेकस्य पाठः । न च वाच्यमानंदमयोऽभ्यासादिति सूत्रकारेणानंदमयस्यैव विष्णुत्वमुक्तमिति । आनंद-

मयशब्दस्य तुल्यन्यायतयाऽन्नमयाद्युपलक्षणार्थत्वात् । एवमाकाशस्तल्लिंगादित्याद्यधिकरणेषु आकाशादिशब्दानां स्वतुल्यन्याय-शब्दांतरोपलक्षणत्वमवगंतव्यं । सर्वशाखाविनिर्णयविषयत्वात्सूचकत्वात्सूत्राणामल्पाक्षरत्वान्न बहुशब्दपाठस्तेषु । न च वाच्यमानं-दमयशब्देनैव ब्रह्मणि सर्वशाखासमन्वयस्योपलक्षयितुं शक्यत्वादुपरितनाधिकरणवैय्यर्थ्यमिति। युक्त्यंतरेण श्रुत्यंतरेषु ब्रह्मसमन्वया-क्षेपे तत्परिहारायाधिकरणांतरारंभात् । किंच सर्वे वेदा यत्पदमामनंतीति श्रुतेर्विष्णौ सर्ववेदसमन्वयस्यावश्यकत्वात्सूत्रेषु यावदुक्त-मात्रपरिग्रहानुपपत्तेर्युक्तं शब्दांतरोपलक्षणत्वमानंदमयपदस्य । ननूपलक्षणत्वेनानंदमयस्य ब्रह्मत्वप्रतिज्ञानं कस्मात्कृतं । अन्नमयस्य किं न स्यादित्यत आह ॥ आनंदमयेति । अन्योऽतर आत्मा आनंदमयः तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरःपक्ष आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठेति पुच्छस्यैव ब्रह्मत्वोक्तेः । आनंदमयस्यावयविनोऽब्रह्मत्वशंकापरिहारायानंदमयस्य ब्रह्मत्वोक्तेः । आनंदमयस्यावयविनोऽब्रह्मत्वशंकापरिहारायानंदमयस्य ब्रह्मत्वं प्रतिज्ञातं सूत्रकारेणेत्यर्थः । तस्मादानंदमयादिपंचकस्य विष्णुत्वं ब्रह्मशब्देनाभ्यस्तत्वात् । भगवदवयवस्यापि ब्रह्मत्वाद्ब्रह्मपुच्छमिति वचनमविरुद्धमित्याशयवानाह ॥ ब्रह्मेति । एवं संस्तूयमानस्तु भगवान्परमेश्वरः । उज्जहारात्मनः केशौ सितकृष्णौ महामुने । उवाच च सुरानेतौ मत्केशौ वसुधातले । अवतीर्य भुवो भारो क्लेशहानिं करिष्यत इति विष्णुपुराणे । एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः । दर्शयामास पार्थाय परमं रूपमैश्वरं । अनेकवक्त्रनयनमनेकाद्भुतदर्शनमिति च भारते । यथा भगवत्कृष्णकेशस्य कृष्णावतारत्वेन प्रादुर्भूतस्य ब्रह्मत्वं दृष्टं । एवमा-नंदमयस्य भगवतः पुच्छत्वेऽपि ब्रह्मत्वमविरुद्धं निःशीमाचिंत्यशक्तित्वादित्यर्थः । ननु यदुक्तं विष्णोरेव नियतत्वाद्ब्रह्मशब्दस्य

तत्समानाधिकृतानामानंदमयादिशब्दानां विष्णुपरत्वमिति तन्न युज्यते । यत्कारणमृतं सत्यं परं ब्रह्मेत्यत्र श्रुत्यंतरे रुद्रेऽपि ब्रह्मशब्दः श्रूयत इत्याशंक्य तच्छ्रुतेर्भगवत्परत्वमाह ॥ ऋतं सत्यमिति । ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं । ऊर्ध्वरेतं विरूपाक्षं शंकरं नीललोहितमिति तापनीयवचनस्य पूर्वार्धोक्तं विष्ण्वाख्यं परं ब्रह्मोद्दिश्योत्तरार्धेन विरूपाक्षाख्यमपरं ब्रह्मोर्ध्वरेतस्त्वादिवृत्तित्वमुच्यते । अत्र पूर्वोत्तरार्धयोः सामानाधिकरण्यांगीकारे नीललोहितपदस्य कृष्णपिंगलपदेन पौनरुक्त्यं स्यात् । क्षीरोदार्णवशायिनं नृकेसरिणं योगिध्येयं परमपदं जानीयामित्युपक्रमविरोधश्च स्याद्रुद्रस्य परब्रह्मत्वे । तथा तद्वाक्यशेषे श्रूयमाणस्य ब्रह्मादिपदस्य स्वरितब्रह्मशब्दांतवतो ब्रह्माधिपतिर्यस्य रुद्रस्येंद्रशत्रुशब्दस्य स्वरितेंद्रशब्दांतवत इंद्रः शत्रुर्हंता यस्य स तथोक्त इति बहुव्रीहिरेव समासः । अन्यथा तस्मादस्येंद्रः शत्रुरभवदिति वाक्यशेषविरोधात् । तथा च शिक्षाकारेणोक्तं । मंत्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति । यत्र समस्यमानपदयोः पुल्लिंगयोः पूर्वपदमंतःस्वरितं भवति तत्र बहुव्रीहिसमासविधायकमहाव्याकरणसूत्रं दर्शयति ॥ पूर्वांतेति । तस्माद्वाक्यशेषानुगुण्यादृतं सत्यमिति वचनस्यायमेवार्थ इत्याह ॥ ऋतं सत्यमिति । एतमेवार्थमाथर्वणवेदस्थनीलग्रीवश्रुत्या दृढयति ॥ ऋतं सत्यमिति । तस्मात्सर्वश्रुतिसंगत्या विष्णुरेव परं ब्रह्म । कथमन्यथा तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुतिरुपपद्येत । जगत्कारणत्वेन विष्णोरेव परब्रह्मत्वं वाक्यांतरेण दृढयति ॥ एको नारायण इति । तस्माद्यत्रकुत्रचित्पुराणेषु विष्णोरपि जननवचनमवताराभिप्रायमित्याहुर्विष्णोरुत्पत्तिरवतारगेति ।

अतो विष्णावेव ब्रह्मशब्दस्य मुख्यत्वात्तत्समभिव्याहृतान्नमयादिशब्दोऽपि तत्परोऽगीकर्तव्यः । किंच ब्रह्मविदाप्नोति परमिति मुख्यं ब्रह्मोपक्रांतमतो येऽन्नं ब्रह्मेत्यादेरर्थांतराभ्युपगम उपक्रमविरोधः स्यात् ॥ ❁ ॥ ❁ ॥

॥ ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ । न च वाच्यं ब्रह्मादेरपीषद्बृहत्वाद्ब्रह्मशब्देनात्र ग्रहणं किं न स्यादिति । मुख्ये संभवत्यमुख्यकल्पनायोगात् । नन्वन्नमयादिशब्दानां ब्रह्मपरत्वे कथं मयट्प्रत्ययो युज्यते । तस्य मृन्मयो घट इत्यादौ विकारार्थत्वदर्शनात् । नैष दोषः । अत्र मयट्प्रत्ययस्यान्नादिप्राचुर्यार्थत्वेनाविरोधात् । प्रकाशमयो रविरित्यादौ प्राचुर्येऽपि मयट्प्रयोगदर्शनात् । तदेतदाह ॥ प्राचुर्येति । नन्वन्नमयशब्दस्य विष्णुपरत्वेऽद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत इत्यत्राद्यत्वं प्रसिद्धान्नलिंगं कथं युज्यत इत्यत आह ॥ भोग्यत्वमिति । किं चान्नमयशब्दस्य प्रसिद्धान्नविषयत्वे भूतात्तृत्वं प्रसिद्धब्रह्मलिंगमयुक्तं स्यात् । इदानीमन्नमयादिशब्दान्विष्णौ निर्वक्तुमाह ॥ महाभोक्तेति । अत्तृत्वगुणयुक्तं तथोपजीव्यत्वलक्षणाद्यत्वगुणयुक्तमन्नमयशब्दवाच्यमन्नमयशब्दस्य तत्प्राचुर्यवत्त्वादत्तृत्वप्रचुरस्तदुपजीव्यप्रचुरश्च वाच्यः । स च जगदत्तृत्वात्पोषणादिकर्तृत्वेन जगदुपजीव्यत्वाद्विष्णुः । अन चेष्टायामिति धातोश्चेष्टाप्रचुरः प्राणमयो बोधप्रचुरो मनोमयो विज्ञानप्रचुरो विज्ञानमयः । नन्वन्नरसमयादन्योऽतर आत्मा प्राणमय इत्यादिष्वन्नशब्दः कथं स्वगतभेदवर्जिते विष्णौ युज्यत इत्यत आह ॥ अभिन्न इति । इतश्चान्नमयादिरूपेण पंचधा प्रतिपादितमानंदवल्ल्यां ब्रह्मावगम्यते । तस्योत्तरत्र भृगुवल्ल्यां भृगवे वरुणेन ब्रह्मत्वेनोपदेक्ष्यमाणत्वात् । नन्वेवं प्राण इत्यादौ मयटोऽश्रवणान्नान्नमयादिशब्दवाच्यमानंदवल्ल्युक्तं वरुणेनोपदिष्टमिति चेत् ।

नैतत्साधु । एतस्यैवोपक्रमोपदिष्टस्यान्नादिशब्दवाच्यस्यैतमन्नमयमात्मानमुपसंक्रम्यैतं प्राणमयमात्मानमुपसंक्रम्येत्यादिवाक्यशेषे प्राप्यतया मयडंतान्नादिशब्दैरन्नमयादिशब्दैश्च वाच्यमित्यभ्युपगंतव्यं ॥ ❁ ॥ ❁ ॥

॥ ॐ **तद्धेतुव्यपदेशात्** ॐ ॥ इतश्चानंदमयो विष्णुरित्याह ॥ मह्यानंदत्व इति । अन्योंतर आत्माऽऽनंदमय इति पूर्वनिर्दिष्टस्य विष्णोरानंदमयत्वे हेतुरुच्यते । को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यादिति वाक्यशेषेणैतदेव श्रुत्यंतरेण स्फुटीकरोति ॥ श्रुत्यंतर इति । यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति यो वै भूमा तत्सुखं नाल्पे सुखमिति । श्रुत्यंतरोक्तं प्रकृतोपयोगितयोपपादयति ॥ यत्प्रवृत्तिरिति । अस्यायमर्थः । चतुर्विधा हि लौकिकी चेष्टा दृश्यते । सुखोद्रेकान्नृत्यगानादिरूपा । दुःखोद्रेकाद्रोदनोदरताडनादिरूपा । सुखप्राप्त्यर्था भोजनादिरूपा । दुःखनिवृत्त्यै औषधसेवनादिरूपा । कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य सर्वशक्तेर्विष्णोर्दुःखादिनिबंधनचेष्टाऽसंभवात्सुखमेव लब्ध्वा करोतीति श्रुत्योक्तं । अतो जीवचेष्टान्यथाऽनुपपत्त्या तत्प्रवर्तकस्य विष्णोरानंदोद्रेकसिद्धिः । किं चैष एवानंदयतीति अन्येषामानंददातृ-त्वश्रुतेरानंदमयत्वं विष्णोरेवावगम्यते । योऽन्येषामानंदं ददात्यसौ प्रचुरानंद इति लोके प्रसिद्धं । अतो मयटश्चात्र प्राचुर्यमेव विवक्षितं वाक्यशेषबलात् ॥ ❁ ॥

॥ ॐ **मांत्रवर्णिकमेव च गीयते** ॐ ॥ इतश्चानंदमयादिशब्दवाच्यं परं ब्रह्मेत्याह ॥ ब्रह्मवादित्यादिना । सत्यं ज्ञानमनंतं ब्रह्मेत्यत्र यत्सत्यत्वं ब्रह्मविशेषणमुक्तं तदुत्तरत्राकाशादिसृष्टिवाक्येनान्नमयप्राणमयपदाभ्यां विव्रीयते । यदनंतत्वं

ब्रह्मविशेषणमुक्तं तदानंदमयपदेन विवृतं । एतदेव विवृणोति ॥ सद्भावमित्यादिना । जगतः सद्भावं यापयति प्रापयतीति सत्यशब्दो निरुक्तः । आत्मन आकाशः संभूत इत्यादिवाक्येन जीवनविशीर्णत्वे सच्छब्देनोच्येते तदुभयं यापयतीति सत्यशब्दो निरुक्तो जीवनप्रदत्वान्नकर्तृत्ववाचिनाऽन्नशब्देन जीवनं । षद्लृविशरणगत्यवसादनेष्विति धातोर्गतिश्च सच्छब्देनोच्यते । तदुभयं यापयतीति सत्यशब्दो निरुक्तः । प्राणयतीति प्राण इति जीवनगतिप्रदत्ववाचिना प्राणशब्देनोच्यते । मनु अवबोधन इति धातोर्बोधप्राचुर्यवाचिना मनोमयशब्देन विज्ञानमयशब्दो विवृतः । आनंदप्राचुर्यवाचिनाऽऽनंदमयशब्देनानंतत्वमुपपादितं । ब्रह्मणः पूर्णानंदस्य परिच्छिन्नस्थित्ययोगात् । अतस्तदेषाभ्युक्ता सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तार्थस्य प्रपंच्यमानत्वादानंदमयादिवाक्यैरितरत्कोशादिकं न कथ्यते । न च वाच्यं प्रकृत्यादिरेव प्रतिपाद्यते । मम योनिर्महद्ब्रह्मेत्यादिवाक्येषु तत्रापि ब्रह्मशब्दप्रयोगात् । ब्रह्मविदाप्नोति परं यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता । आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन । विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुत इत्यादिमोक्षश्रुतिविरोधात् । न च प्रकृत्यादिज्ञानादपि मोक्ष इति वाच्यं । तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यत इति श्रुत्यंतरविरोधात् । न चैतद्वचनमन्यविषयं । सहस्रशीर्षेत्यादिपुरुषशब्दश्च विष्ण्वेकविषय इत्यत्र श्रुतिमाह ॥ पुरुष इत्यादिना ॥ ❁ ॥ ❁ ॥

॥ ॐ नेतरोऽनुपपत्ते ॐ ॥ इतश्चात्रान्नमयादिशब्दो विष्णुपर इति प्रतिपादयितुमाह ॥ ब्रह्मशब्देत्यादिना । य उपक्रमे ब्रह्मशब्देन निर्दिष्टो विष्णुः स एवात्मशब्देन च । तस्मादाकाशशब्दवाच्यचतुष्टयसृष्टिरुच्यते । आत्मन आकाशः संभूत इत्येवमेवाकाशाद्वायुरित्यादाववगंतव्यं । तच्चतुष्टयमाह ॥ भूतमिति । आकाशादिशब्दानां कथं हरिवाचकत्वमित्यत आह ॥ आसमंतादित्यादिना । भूततदभिमानिन्यादीनां सृष्टिप्रकारमाह ॥ क्रियेत्यादिना । एवमुक्तप्रकारेणांतर्यामित्वेनाकाशादिषु प्रविश्यान्नजन्यदेहपर्यंतमागतमात्मशब्दोक्तं हरिमेवान्यपरित्यागेन निष्कृष्य निर्दिशति । तस्यैवान्नमयादिपंचरूपत्वं विधातुं स वा एष पुरुषोऽन्नरसमय इति श्रुतिः । रसशब्दो रसान्नमिति कर्मावद्येनेति भागवतोक्तिवद्विपरीतसमासेन लौकिकव्यावृत्त्यर्थः ॥ ❁ ॥ ❁ ॥

॥ ॐ भेदव्यपदेशाच्च ॐ ॥ ॐ कामाच्च नानुमानापेक्षा ॐ ॥ दृष्टश्च समासो भूतपूर्वशब्दे तस्येदमेव शिर इत्यादिना भगवदवयवानां प्रत्यक्षनिर्देशः कथमित्यत आह ॥ आदित्य इति । यदा ह्येष एतस्मिन्नदृश्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते । स यश्चायं पुरुषो यश्चासावादित्य इत्यधाराधेयभावेन भेदोपदेशान्न ब्रह्मादिजीवराशीनां विष्णोरभेदः । विमतानि शरीराणि मद्भोगायतनानि शरीरत्वान्मच्छरीरवदित्यनुमानादैकात्म्यसिद्धिरिति चेन्न । प्रत्यक्षादिप्रमाणविरुद्धेनातिप्रसंगित्वात् । तथा हि । चेतनमचेतनं भवितुमर्हति वस्तुत्वाद्घटवत् । अचेतनं वा चेतनं भवितुमर्हति प्रमेयत्वादात्मवत् । आकाशं मूर्तं भवितुमर्हति भूतत्वात्पृथिवीवदिति । ननु नेतरोऽनुपपत्तेः । भेदव्यपदेशाच्च । कामाच्च नानुमानापेक्षा इत्यत्र

जीवपरयोर्भेदो निरूपितः । स एव भेदव्यपदेशाच्चान्यः । अनुपपत्तेस्तु न शारीरः । शारीरश्चोभयेऽपि हि भेदेनैनमधीयत इत्यादौ निरूपयिष्यते च । तस्मादेतेषां सूत्राणां पौनरुक्त्यमिति चेन्न । प्रकारांतरेण तत्र तत्र भेदाक्षेपे श्रुत्यंतरेण च न्यायांतरेण च समाधानात् । पृथगुपदेशादित्यत्र सर्वशंकोद्धारेण जीवपरमभेदस्य समर्थितत्वात् । अत ऊर्ध्वं न शंका न चोत्तरं ॥❁॥

॥ ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ ॥ इतश्च नान्नमयादयः कोशा इत्याह ॥ योगमित्यादिना । स य एवं वित् । अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानंदमयमात्मानमुपसंक्रामतीत्यानंदवल्यामस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रम्येत्यादिना भृगुवल्यामप्यपरोक्षज्ञानिनोऽन्नमयादिरूपाणां प्राप्तिः फलत्वेनोच्यते । अतःकोशत्वाभिधानमतिसाहसं । न चोपसंक्रामतीत्यस्यातिसंक्रमण इत्यर्थः । श्रुतपरित्यागाश्रुतकल्पनाप्रसंगात् । उपसंक्रम्यैतत्साम गायन्नास्त इत्यनतिक्रमोक्तेश्च । किं चास्माल्लोकान्प्रेत्येत्यनेनैव मुक्तिवचनेनान्नादिविकारात्मकं कोशातिक्रमणस्य सिद्धत्वान्न पुनस्तदतिक्रमणं युज्यते । येऽन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासत इत्यादिना अन्नं ब्रह्मेति व्यजानादित्यादिना चान्नमयादीनां ब्रह्मत्वेनोपास्तिं विधाय तदुपासकस्यान्नमयमात्मानमुपसंक्रामतीत्यादिनाऽन्नमयादिप्राप्तिं प्रतिपादयंत्योरानंदवल्लिभृगुवल्ल्योरपलापिनां तत्कोपेनानर्थो भवतीत्याह ॥ ये अन्नमित्यादिना । इदानीं भृगुवल्यामन्नमयादिरूपब्रह्मप्रतिपादनपरत्वं विवृणोति ॥ अधीहीत्यादिना । भृगुर्वै वारुणिर्वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । यतो भृगुणा ब्रह्म पृष्टो वरुणोऽन्नादिरूपं ब्रह्मोपादिशति ।

अतः कथमेतत् । ब्रह्म न स्यात् । न चात्र शाखाचंद्रन्यायेनान्नादिकं ब्रह्म प्रतिपत्तिद्वारमुपदिष्टमित्याह ॥ द्वारमिति । न हि चंद्रदर्शनार्थिनः शाखाचंद्र इत्युपदिश्यते । किं तर्हि शाखां पश्यत उपरि चंद्रमित्येपोपदिश्यते । तस्माद्ब्रह्मप्रश्नस्य तद्वारोत्तरत्वमसंगतमेव । न च प्रसिद्धान्नादेर्ब्रह्मप्रतिपत्तिद्वारत्वं घटादेरिव किंचिदुपलभ्यते । तस्मादत्रान्नादिशब्दो ब्रह्मपर एव । इदानीमन्नमनःप्राणशब्दानां पूर्वं निरुक्तेर्दर्शितत्वाच्चक्षुःश्रोत्रत्वक्शब्दानां ब्रह्मणि निरुक्तिमाह ॥ चष्ट इति । यद्यप्यत्र पूर्वोक्तविज्ञानानंदादिद्वारेण चक्षुःश्रोत्रवाचा वाऽन्नादिषड्रूपमेव ब्रह्मोपदिष्टं तथाऽपि विज्ञानानंदसहितान्नादिरूपस्य ब्रह्मणो वाधूलशाखायां प्रतिरूपं सृष्ट्यादिलक्षणलक्षिततत्वेन प्रतिपादितत्वात् । न हि विज्ञानानंदयोरब्रह्मत्वमाशंकनीयं । यस्मादावापोद्वापतः शाखाः परं पदं प्रतिपादयंति । एतच्चान्नादिरूपं ब्रह्म यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति सृष्ट्यादिलक्षणलक्षिततत्वेन वरुणेनोपदिष्टं शिष्येण पश्चात्तपसैवापरोक्षितमब्रह्म कथं स्यात् । न हि प्रसिद्धान्नादिकं तपसाऽपरोक्षितव्यं । न च वाच्यमन्नादीनां ब्रह्मत्वे स तपोऽतप्यत स तपस्तप्त्वाऽन्नं ब्रह्मेति व्यजानादित्यन्नावगत्या ब्रह्मणोऽवगतत्वात् । पुनरपि स तपोऽतप्यत स तपस्तप्त्वा प्राणो ब्रह्मेति व्यजानादित्यादिवैयर्थ्यमिति । उपदिष्टान्नादिपंचरूपस्य ब्रह्मण एकरूपापरोक्षरूपांतरापरोक्षीकरणापेक्षया पुनर्ध्यानादिलक्षणतपसो वैयर्थ्यात् । तद्विज्ञाय पुनरेवं वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विज्ञाय पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विज्ञाय जिज्ञासस्वेत्यावर्तनं । प्रतिरूपापरोक्षसा-

धनेऽपि गुर्वनुज्ञाप्राप्त्यर्थं । अब्रह्म । तथा पूर्वपूर्वरूपस्य परित्यागश्चात्राश्रुतकल्पनाकल्पितः । अन्नं ब्रह्मेति व्यजानादित्यादिना ब्रह्मत्वमेव श्रुतमन्नादीनां । किं चान्नाद्ध्येव खल्विमानि भूतानि जायंतेऽन्नेन जातानि जीवंत्यन्नं प्रयंत्यभिसंविशंतीत्यादिना प्रतिरूपब्रह्मलिंगदर्शनादपि पंचरूपं ब्रह्मैव । एतच्चाब्रह्मेति ये वदंति तेषां श्रुतहान्यश्रुतपरिग्रहाववि-नाभूताविति तन्मतानुवादस्य लज्जाकरत्वादुपरम्यते । एवं वादवदस्मिन्नस्य च तद्योगं शास्तीति सूत्रं कोशनिराकरणपरत्वेन वर्णयित्वा जीवपराभेदनिराकरणस्यापि प्रस्तुतत्वात्तत्परत्वेनापि वर्णयति ॥ समीप इति । एवं पंचकोशादिमतं निराकृत्य चतुःकोशादिमतं निराकरोति ॥ एतेनेति । अन्नादिचतुर्षु मयटो विकारार्थत्वमानंदमये प्राचुर्यार्थत्वमिति कल्पने प्रायपाठ-परित्यागः स्यात् । इदानीमधिकरणार्थमुपसंहरति ॥ अत इत्यादिना । तस्मादन्नमयादिपंचरूपो विष्णुरिति सिद्धं । ननु जगज्जन्मादिकारणत्वमात्रं प्रतिज्ञातत्वात्प्रतिपादयितुं युक्तं ब्रह्मणो न तु पूर्णानंदादिगुणजातमपीत्यत आह ॥ जन्मेत्यादिना । जगज्जन्मादिकर्तृत्वलक्षणोक्त्यैव ब्रह्मणः सार्वज्ञ्यादिनिखिलगुणानामर्थोक्तत्वात्तत्प्रतिपादनं संगतमेव । सर्वगुणसंपूर्तिश्च विष्णौ न कतिपयवाक्यैरवगंतुं शक्या । किं त्वेष सर्वज्ञ एष सर्वेश्वर एषोऽतर्याम्येष योनिः सर्वस्येत्यनंतवैदिकपदावगम्या । यत एवेंद्रादिशब्दानामशेषाणामपि तस्मिन्मुख्यवृत्तिः सिध्यति । न पुनरिंद्रादिषु । इदिपरमैश्वर्ये इत्यादिधातोः परमैश्वर्यादिकमे-वेंद्रादिशब्दप्रवृत्तिनिमित्तं मुख्यमत्रगतं । तच्च न विष्णोरन्यत्र संभवति । अतः परमेश्वरादन्यत्रेंद्रादिशब्दप्रयोग ऐश्वर्यादिनि-मित्तत्वादौपचारिकः । यदल्पमैश्वर्यादिकं पुरंदरादिष्वपि इंद्रादिशब्दप्रवृत्तिनिमित्तं तद्भगवद्दत्तमेव । अतोऽपींद्रादिशब्दो

विष्णावेव मुख्यः । यथाऽयसोऽपि दाहकत्वकारणेऽग्नौ दहतीति शब्दो मुख्यः । न केवलमिंद्रादिशब्दानां मुख्ययोगवृत्तिः किंतु मुख्यरूढिरप्यवगंतव्या । स ब्रह्म स हरिः स शिवः सेंद्र इत्यादिना बहुशः प्रयोगात् । इयं तु विद्वद्रूढिरुच्यते । यो वेदेतिहासादिषु विदुषामेव शब्दार्थः प्रसिद्धो योगवृत्त्युपेताया तु निरुक्त्यज्ञानामपि ज्वलनादिषु प्रसिद्धिः । अग्न्यादिशब्दानां साऽविद्वद्रूढिस्तत्र वेदानुकूल्या विद्वद्रूढिरेव बलवती । तस्माद्यौगिकत्वाच्च शब्दजातस्य विष्णुरेव मुख्यार्थ इत्यभिप्रेतं समन्वयं प्रतिपादयितुं सूत्रकारस्येत्यर्थः ॥ ❁ ॥ ❁ ॥

॥ ॐ अंतस्तद्धर्मोपदेशात् ॐ ॥ तत्र तावदेतस्यैवार्थस्याक्षेपसमाधानरूपेणांतस्तद्धर्मोपदेशादित्यधिकरणं विवृणोति ॥ देवानामित्यादिना । इदमाम्नायते । ब्रह्मेंद्रमग्निं जगतः प्रतिष्ठां दिव आत्मानं सवितारं बृहस्पतिं चतुर्होतारं प्रदिशोनुकॢप्तं वाचो वीर्यं तपसाऽन्वविंददिति । तत्रेंद्रादिशब्दानां पुरंदरादिष्वेव लोकरूढत्वाद्योगस्य च संभवात्तत्परत्वमिति प्राप्तेऽभिधीयते । इंद्रादिशब्देन विष्णुरेव ग्राह्यः । ब्रह्म तपोलभ्यत्वजगत्प्रतिष्ठात्वादिलिंगात् । अंतः समुद्रे मनसा चरंतमित्यादिसन्निहितवाक्यावगतक्षीराब्धिशायित्वादिलिंगाच्च । तस्येंद्रादिष्वसंभवाल्लोकरूढिबाधाद्युक्त इंद्रादिशब्दस्य कश्यपो देवराडिंद्र इत्यादिभगवन्नामसु प्रयोगाद्विद्वद्रूढ्या महायोगेन च विष्णावतिमुख्यत्वात्स एवात्र प्रतिपाद्यः । न चेंद्रादिशब्दानां भगवति प्रयोगेण लोकसिद्धेंद्राद्यभेदो भगवतोऽत्र विवक्षित इति वाच्यं । इंद्रस्यात्मा निहितः पंचहोता वायोरात्मानं कवयो निचिक्युः । अंतरादित्ये मनसा चरंतं देवानां हृदयं ब्रह्मान्वविंददित्यादिसन्निहितवाक्येष्विंद्रांतर्यामितया भेदव्यपदेशात् । अतो विष्णुरेवात्र प्रतिपाद्यत इति सिद्धं ॥ ❁ ॥ ❁ ॥

॥ ॐ आकाशस्तल्लिंगात् ॐ ॥ इदानीमाकाशस्तल्लिंगादित्यधिकरणं विवृणोति ॥ चेष्टा हीत्यादिना । छांदोग्ये श्रूयते । अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यंत्याकाशो ह्येवैतेभ्यो ज्यायानाकाशः परायणं । स एष परोवरीयानुद्गीथः स एषोऽनंत इत्यत्राकाशशब्देन भूताकाश एव ग्राह्यः । प्रथमपठितत्वात्प्रसिद्धत्वाच्च । तत्रैव वाक्यशेषो वर्णनीयः । प्रसिद्धाकाशस्यापि किंचिद्भूतकारणत्वादिसंभवात् । न च पूर्वन्यायेनात्राकाशशब्दो विष्णुपरो युक्तः । तत्रेंद्रादिशब्दानां भगवद्दत्तैश्वर्यादिमच्चेतनपरित्यागेन विष्णुपरत्वं । न हि जडाकाशस्यावकाशस्यावकाशादिरूपं भगवद्दत्तं । तस्माद्भूताकाशपरमिदं वाक्यमतो जगत्कारणत्वे ब्रह्मणि सर्ववेदसमन्वयो न युक्त इत्यत्रोच्यते । आकाशशब्देन विष्णुरेवोच्यते । परोवरीयस्त्वादिलिंगात् । अत्र तच्च महतो महीयानित्यादिना विष्णोरेवावगतं । न च भूताकाशस्य सर्वभूतोत्पत्तिकारणत्वं युज्यते । विरोधात् । आसमंतात्काशत इति योगेन विद्वद्रूढ्या चाकाशशब्दाद्विष्णोरेव प्रतीतेरनंतशब्दविरोधाच्च लोकसिद्धाकाशस्य परित्यागो युक्तः । यदुक्तमाकाशशब्दस्य विष्णुपरत्वे कारणत्वं विवरादिभावस्यानन्याधीनत्वं तदसिद्धं । नभो ददाति श्वसतां मार्गं यन्नियमादद इत्यादिवाक्यैर्नभसोऽपि विवरादिभावस्य भगवदधीनत्वश्रवणात् । तस्मान्मुख्याकाशो हरिरेवात्र प्रतिपाद्यत इति सिद्धं ॥ ❁ ॥ ❁ ॥

॥ ॐ अत एव प्राणः ॐ ॥ इदानीमधिभूताकाशशब्दसमन्वयन्यायेनाध्यात्मगतप्राणशब्दस्य हरौ समन्वयप्रतिपादकमत एव प्राण इति सूत्रं व्याचष्टे ॥ अध्यात्ममित्यादिना । इदमाम्नायते । तद्वै त्वं प्राणोऽभवः महान्भोगः प्रजापतेर्भुजः

करिष्यमाणो यद्देवान्प्राणयो न वेति। तत्र प्राणशब्दस्य वायौ प्रसिद्धत्वात्तत्परत्वं तावत्प्राप्यते। न च नवदेवशब्दोदितेंद्रियगणनेतृत्वलिंगाद्धृषीकेशपरत्वं। इंद्रियप्रवृत्तिनिवृत्त्योरन्वयव्यतिरेकाभ्यां मुख्यप्राणाधीनत्वदर्शनात्। तल्लिंगस्य वायावप्युपपन्नत्वादत्राभिधीयते। प्राणपदोक्तो विष्णुरेव। यतो मुख्यं तस्यैवेंद्रियप्रेरकत्वलिंगमुपपन्नं। कतरः स आत्मा येन वा पश्यति येन वा शृणोति इत्यादिवचनात्। प्राणहृषीकेशप्रेर्यत्वश्रवणात्। न मुख्यस्य प्राणमित्यादौ पंचवृत्तिप्राणस्य प्रेरकत्वं। न च मुख्ये संभवत्यमुख्यं युज्यते। किं च श्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे इत्यादिसंनिहितवाक्योक्तश्रीपतित्वलिंगात्। अन चेष्टायामिति धातोः प्रकृष्टचेष्टायोगेन विद्वद्रूढ्या च प्राणशब्दो विष्णावेवेति सिद्धं ॥ ❀ ॥ ❀ ॥

॥ ॐ छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनं ॐ ॥ इदानीं ज्योतिश्चरणाभिधानादित्याधिकरणं तात्पर्यतो विवृणोति ॥ नित्यत्वादादिति। इदमाम्नायते। अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति। तत्र ज्योतिःशब्दस्य तेजोधातौ प्रसिद्धत्वात्कश्चित्तेजोधातुरर्थः स्यात्। तस्यैषा दृष्टिर्यत्रैतस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानातीति वाक्यशेषे तेजोविषयलिंगश्रवणात्। अथवा द्योतकरणत्वलिंगेन गायत्रा ज्योतिःशब्दाभिधेया। तस्या एव गायत्री वा इदं सर्वमित्यादिनोपक्रमात्। न च गायत्र्या विष्ण्वायत्तत्वात्तच्छब्देन विष्णुरभिधीयते। नित्यत्वेनान्यानधीनस्वभावत्वात्तस्याः। वाग्वै गायत्री सैषा चतुष्पदेत्यादिप्रसिद्धशब्दानुगुण्याद्गायत्रीप्रतिपादनमत्र युक्तं। एवं प्राप्तेऽभिधीयते। विष्णुरेव ज्योतिःशब्दाभिधेयः। विमे कर्णा पतयतो विच-

क्षुर्वीदं ज्योतिर्हृदय आहितं यदित्यादौ तस्यैव ज्योतिःशब्दार्थत्वेन प्रसिद्धत्वात् । न चैतत्प्रसिद्धाग्निपरं वाक्यं । वैश्वानरमृत आजातमग्निमित्युपक्रमादिति वाच्यं । अनूनमग्निं पुरुधासु चंद्रं । अग्निनाऽग्निः समिद्ध्यत इत्यादिश्रुते-रहमग्निरहं हुतमित्यादिभगवद्वचनाच्च विष्णोरेव मुख्यतोऽग्निशब्दार्थत्वात् । न ह्यग्नेः कर्णादिदूरत्वं च संभवति । परिच्छेद्य-प्रकृतस्य । किं चोत्तमेष्वनुत्तमेषु लोकेष्वित्युक्तनिरतिशयस्थाननिवासो यद्गत्वा न निवर्तंते तद्धाम परमं ममेत्यादौ भगवतो विष्णोरेव प्रसिद्धः । यदुक्तमग्निलिंगमुष्णिमानं विजानातीति तदग्नेरौष्ण्यनियामकांतर्यामिप्रदर्शनपरतयोपपन्नं । न च गाय-त्र्युपक्रमाद्गायत्री ज्योतिःशब्दार्थः । गायति च त्रायति च तस्माद्गायत्री नामेति वचनात् । गायत्रीशब्देन विष्णोरत्र विव-क्षितत्वात् । अस्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयंत इति निरतिशयत्वादितल्लिंगश्रवणाच्च । यद्वैतद्ब्रह्मेति तदेतत्पू-र्णमप्रवृत्तिपूर्णामप्रवर्तिनीं श्रियं लभते य एवं वेदेत्यादिवाक्यशेषगतब्रह्मादिशब्दश्च गायत्रीशब्दस्य विष्णुपरत्व एवोपपद्यते । न च गायत्र्या अनन्याधीनस्वरूपतया गायत्रीशब्दो विष्णुपर इति वाच्यं । यो वाचमंतरो यमयतीति शब्दमात्रस्य तच्छक्तिनियम्यत्वश्रवणात् । त्रिपादस्यामृतं दिवीति निर्दिष्टवस्तुनोऽन्यदुच्यते । अथ यदतः परो दिवो ज्योतिरिति यदिति प्रकृतिपरामर्शविरोधात् । प्रकाशात्मकत्वेन दिवीति निर्देशो वैकुंठस्य युज्यते । तस्मात्स्वर्गादेः परतो दीप्यमानो ज्योतिः-शब्दार्थः । सर्वं खल्विदं ब्रह्मेति उपरितनवाक्यबलाद्विष्णुरिति सिद्धं ॥ ❁ ॥ ❁ ॥

अ०टि० ॥ ॐ प्राणस्तथाऽनुगमात् ॐ ॥ इदानीं प्राणस्तथाऽनुगमादित्यधिकरणं तात्पर्यतो व्याचष्टे ॥ बाहुल्य इत्यादिना ।
ऐतरेयके श्रूयते । ता वा एताः शीर्षञ्छ्रियः श्रिताश्चक्षुःश्रोत्रंमनोवाक्प्राण इति । येन श्रुतिलिंगबाहुल्यन्यायेन ज्योतिर्वि- स० र०
॥२२॥ ष्णुरित्युक्तं । पूर्वत्र तन्न्यायेनात्र तावत्प्राणो मुख्यप्राणो भवितुमर्हति । चक्षुरादिप्रायपठितत्वात् । तस्यैव प्राणस्येंद्रियैः सह प्र० प्र०
विवादश्रवणात् । ता अहिंसंताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन् । हंतास्माच्छरीरादुत्क्रामाम । तद्यस्मिन्नुत्क्रांत इदं
शरीरं पत्स्यतीत्यादौ प्राणस्य हींद्रियैर्विवादः प्रसिद्धः । अथ ह प्राणा अहं श्रेयसि व्यूदिर इत्यादिशाखांतरेषु । अपि च
प्राण उदक्रामत्तत्प्राणे उत्क्रांते पद्यत प्राणः प्राविशत्तत्प्राणे प्रपन्न उदतिष्ठत् । तदु ह मुख्यप्राणलिंगं तस्य हि निर्गमनप्रवे-
शाभ्यां शरीरनिपातोत्थानप्रसिद्धेः । तथोत्तरत्रापि प्राणलिंगं श्रूयते । प्राणवंश इति स्थविरः शाकल्यस्तद्यथा शालावंशे सर्वेऽन्ये
वंशाः समाहिताः स्युरेवमेतस्मिन्प्राणे चक्षुःश्रोत्रंमनोवागिंद्रियाणि शरीरं सर्वमात्मा समाहित इतीदमेव जीवसहितदेहेंद्रियाधार-
त्वमन्यत्राप्युक्तं । मुख्यप्राणस्यैव तान्वरिष्ठः प्राण उवाच । मा मोहमापद्यथाऽहमेवैतत्पंचधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य
विधारयामीत्यारभ्य अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितमिति । अथवा जीवोऽत्र प्राणो भवितुमर्हति । एष इमं लोकमभ्यार्चत्
पुरुष य एष तपति तं शतं वर्षाण्यभ्यार्चत् तस्माच्छतंवर्षाणि पुरुषायुषो भवंतीत्युत्तरत्र शतायुष्ट्वलिंगेन जीवस्य प्राणताऽव-
गम्यते । जीवस्य हि शतायुष्ट्वमन्यत्र सिद्धं । शतायुर्वै पुरुषः शतवीर्यः शतेंद्रिय इति । यद्वेंद्रोऽत्र प्राणः स्यात् । तस्याप्युत्त-
रत्र प्राणत्वश्रवणात् । तमिंद्र उवाच । ऋषे प्रियं वै मे धामोपागाः वरं ते ददामीति । स होवाच । त्वामेव जानीयामिति । ॥२२॥

तमिंद्र उवाच । प्राणो वा अहमस्मीति । एवं प्राप्तेऽभिधीयते । विष्णुरेवात्र प्राणशब्दवाच्यः । प्राणशब्दस्योत्तरत्र तस्मिन्ननुगमात् । सर्वं हीदं प्राणेनावृतं । स एषोऽसुः स एष भूतिश्चाभूतिश्च तं भूतिरिति देवा उपासांचक्रिरे ते बभूवुः । ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात् । अथ देवरथस्तस्य वागुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनःसंगृहीता तदयं प्राणोऽधितिष्ठतीति । एतच्चान्यत्र विष्णो-रेव प्रसिद्धं । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । मध्ये वामनमासीनं विश्वे देवा उपासते । सर्वे वेदा यत्पदमामनंति । आत्मानं रथिनं विद्धि शरीरं रथमेव तित्यादौ । तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषमिति ब्रह्मोप-क्रमाच्च । प्राणशब्दश्च परमात्मपरस्तस्य वाक्तंतिर्नामानि दामानि तस्येदं वाचा तंत्या नामभिर्दामभिः सर्वं सितं । अथातो विभूतयोऽस्य पुरुषस्य तस्य वाचा सृष्टौ पृथिवी चाग्निश्चेत्याद्युपरितनवाक्यबाहुल्याच्च । यदुक्तमिंद्रियाधारत्वादिप्राणलिंगं तद्विष्णोर्नेतुं शक्यं प्राणव्यापारस्य तदधीनत्वात् । यः प्राणमंतरो यमयतीति श्रुतेः । यदुक्तं जीवलिंगं शतं वर्षाण्यभ्यार्चदिति तज्जीवांतर्यामिविष्णुविषयमेव । स इदं सर्वं मध्यतो दधे यदिदं किंचेत्यादिवाक्यशेषात् । यदिदं वाक्यं प्राणो वा अहस्मीति तदपींद्राविष्टविषयमेव । प्राणस्त्वं प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति । स एतेन रूपेण सर्वा दिशोऽस्मीति वाक्यशेषात् । एतच्चोपपादितं पाद्मेऽपि । तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः । न क्वापि किंचिन्नामास्ति तमृते पुरुषोत्तममिति । तथा च प्रल्हादवाक्यं श्रीविष्णुपुराणे । सर्वगत्वादनंतस्य स एवाहमिति स्थित इति । न चेंद्रस्य सर्वगत-

त्वादिकं युक्तं जीवविशेषस्य । न चेंद्रं प्रत्यक्षेण पश्यतो ऋषेस्तज्ज्ञानवरप्रार्थनं युज्यते । तस्मादिंद्रवचनमंतर्यामिविषयं । अतोऽत्र मुख्यतः प्राणनामा भगवान्विष्णुः प्रतिपाद्यत इति सिद्धं । इदानीमानंदमयोऽभ्यासादित्यारभ्य प्रतिपादितमुपसंहरति ॥ तस्मादिति । नारायणवासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपो वासुदेवादिचतुर्मूर्तिर्वा भगवान्विष्णुः प्रत्यधिकरणं प्रतिसूत्रं प्रतिपदं प्रत्यक्षरं च तत्तन्मूर्तिषु प्रसिद्धनामवशान्निरुक्तिबलाच्च प्रतिपाद्योऽवगंतव्यः । शंकायनसंहितायां चेदं भगवान्वासुदेव आत्माऽव्यक्तं प्रकृतिः प्रधानं नित्यमनंतमित्यादिना वासुदेवादिमूर्तिषु नामविभागः प्रसिद्धः । निर्वचनभेदादेकस्यापि शब्द-स्यार्थभेदो ज्ञायते । अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत इत्यादौ । अधिकरणपंचावयवभेदात् । सूत्रस्य पदभेदात् । पदस्य चाक्षरभेदात् । अक्षरस्य स्वरव्यंजनसंधिसंधानभेदाच्च युक्तं चतुर्व्यूहादिविषयत्वं । प्रसिद्धं च वेदे । चतुर्धा पंचधा वा प्रतिपादनं चतुर्व्यूहाद्यभिप्रायेण । ता वा एताश्चतस्रश्चतुर्धा अथातः संहिताया उपनिषदं व्याख्यास्यामः पंचस्वधिकरणेष्वि-त्यादौ । सूत्राणामेवंविधार्थः श्रुतियुक्तिबलोपेतो बृहत्तंत्रेण व्याख्यातः । स च मनुष्याणां बहुतरज्ञानासामर्थ्यात्किंचिज्ज्ञा-नार्थं संग्रहेण व्याख्यातो भाष्यानुव्याख्यानाभ्यां । अतोऽर्थगंभीरत्वादेतयोरर्थातिशयेन बहुज्ञैरेव ज्ञातुं शक्यः । तस्मादस्मिन् शास्त्रे निखिलवेदविचाराधिकारेऽनंतधाऽनंतशब्दैर्भिन्नप्रवृत्तिनिमित्तवद्भिः प्रतिपाद्यमानत्वान्नारायणस्यानंतगुणत्वं सिध्यति । न हि सहोच्चारितपदानां पौनरुक्त्यमुचितं । तदेतदाह ॥ वासुदेवेत्यादिना ॥ ❁ ॥ ❁ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीमत्पद्मनाभतीर्थभट्टार-कविरचितायां प्रथमाध्यायस्य प्रथमः पादः ॥ १—१ ॥ ❁ ॥ ❁ ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥ अर्थांतरेषु निरूढानां लिंगबलात्समन्वयो निरूपितः पूर्वपादे । लिंगाभिधायकानां शब्दानां पौर्वापर्यपरामर्शेनार्थांतरपरत्वेन प्रतीयमानानां विष्णौ समन्वयो निरूप्यतेऽस्मिन्पादे । तत्र सर्वत्रप्रसिद्धोपदेशादिति प्रथमाधिकरणं । एतं ह्येव बह्वृचा महत्युक्थे मीमांसंत । एतमग्नावध्वर्यव एतं महाव्रते छंदोगा एतमस्यामेतं दिवीत्यादिवाक्यमुदाहृत्य सर्वगतत्वं प्रतिपाद्यते । जगतो बहिरेव स्थित्वा तत्प्रवर्तयितुं शक्तोऽपि लीलया सर्वत्र स्थित्वा सर्वशक्त्युद्बोधक इति ज्ञापयितुं नाकाशस्येव सर्वत्रस्थितिमात्रमत्र सर्वगतत्वं । तत्र चक्षुर्मयः श्रोत्रमय इत्यादिवाक्यशेषात्सर्वगतत्वेन प्रतिपाद्यत्वं जीवस्याशंक्य स एवमेतं संवत्सरसमानं चक्षुर्मयं श्रोत्रमयं छंदोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंसतीति शंसनक्रियायां सर्वगतत्वेन प्रतिपादितस्य परमात्मनः कर्मत्वेन व्यपदेशात् । एकस्यां क्रियायामेकस्य कर्तृकर्मभावविरोधात् । न जीवोऽत्र प्रतिपाद्यत इत्युक्तं ॥ कर्मकर्तृव्यपदेशाच्चेति सूत्रकारेणैव हि तत्र हि भिन्नाश्रयत्वमौत्सर्गिकं ज्ञातव्यं कर्मकर्तृभावस्य । क्वचिदेकस्यापि हि कर्मकर्तृभावश्च श्रुतः । तदात्मानमेवावेदहं ब्रह्मास्मीत्यादौ सर्वदर्शनसर्वश्रवणादिसामर्थ्याभिप्रायेण चक्षुर्मयश्रोत्रमयादिशब्दानां वाक्यशेषगतानां परमात्मन्युपपद्यमानत्वेन निरपवादोऽत्र कर्मकर्तृभावो भेदमेव जीवपरमात्मनोरापादयति । तदेतदाह ॥ लिंगात्मकानामित्यादिना । यदत्र प्रतिपादितं सर्वगतत्वं विष्णोस्तत्सर्वत्र स्थितिलक्षणं लिंगं । स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वाऽत्तीत्यादिवाक्यमुदाहृत्य यत्सर्वादनं विष्णोः प्रतिपादितं । अत्ता चराचरग्रहणादित्यत्र तत्क्रियालिंगं । ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टावित्यादिवाक्यमुदाहृत्य यच्छुभपानं विष्णोः प्रतिपादितं । गुहां प्रविष्टावा-

त्मानौ हि तद्दर्शनादित्यत्र तच्च क्रियालिंगं। य एषोंतराक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचेत्यादिवाक्यमुदाहृत्य यच्चक्षुराद्यंतःस्थित्युपेतं रमणं विष्णोः प्रतिपादितं। अंतरउपपत्तेरित्यत्र तत्क्रियाया भावलिंगं। यः पृथिवीमंतरो यमयतीत्यादिवाक्यमुदाहृत्य यत्पृथिव्याद्यंतःस्थित्युपेतनियमनं विष्णोः प्रतिपादितं। अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशादित्यत्र तच्च क्रियाभावालिंगं। यत्तदद्रेश्यमग्राह्यमिति वाक्यमुदाहृत्य यो दृश्यादिशब्दवाच्यवस्त्वंतरान्योन्याभावो विष्णोः प्रतिपादितः। अदृश्यत्वादिगुणको धर्मोक्तेरित्यत्र सोऽभावलिंगशब्दवाच्यः। वैश्वानरः साधारणशब्दविशेषादित्यत्र आत्मानं वैश्वानरमुपास्ते येनेदमन्नं पच्यत इत्यादिवाक्यमुदाहृत्य पचनादिबहुलिंगसहितवैश्वानरशब्दो विष्णोः प्रतिपादितः। तदेतदाह ॥ एतद्भावेत्यादिना। लिंगानामसाधारण्ये धर्मो धर्म्यभिन्नोऽभिप्रेतः। तत्र तावत्सर्वादनादिक्रियाणां भगवदाभिन्नत्वमाक्षिप्य समाधत्ते ॥ अनित्यत्वादित्यादिना। अदनपानादिक्रियाणां शक्तिरूपेण सर्वदाऽवस्थानान्नित्यता। क्रियातच्छक्तिरूपयोर्भगवता सह परस्परं चाभेदेऽपि विशेषबलादेव व्यवहारभेदः सिद्ध्यति। शक्तिरूपता नाम क्रियाया अव्यक्ततोच्यते। क्रियातच्छक्त्यादेर्भगवताऽभिन्नत्वं नित्यत्वं च परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति ज्ञानस्येव स्वाभाविकत्वश्रवणात्सिद्ध्यति। भगवतः क्रियानित्यत्वं ज्ञानं नित्यं क्रिया नित्येत्यादिपैंगिश्रुत्या च सिद्धं। अतः क्रियादीनां भगवत्स्वरूपत्वमविरुद्धं। जीवादौ तु-क्रियादेर्नित्यत्वमनित्यत्वं च ज्ञातव्यं। शक्त्यनाशानाशाभ्यां यतो यावच्छ्रवणादिशक्तिर्न नश्यति तावच्छ्रवणक्रियास्थायिनी जीवस्य कदाचिदाविर्भवति कदाचित्तिरोभवत्येवैव। तत्र व्यक्तिभेदः कल्पनागौरवान्नांगीकृतः। यदा ह्यत्यं-

तत्राधैर्यमेव भवति तदा श्रवणक्रिया विनष्टेत्यनुभूयते। एतत्सत्त्वसंमत्योपपादयति ॥ शक्तिसद्भाव इति। ऋतं पिबंताविति द्विवचनविषयत्वं द्विरूपत्वेन विष्णोरेकस्य युज्यंते। यः सेतुरीजानानामिति वाक्यशेषे य इत्येकवचनेन परामर्शात् ।अतो यदन्यैरुक्तमुपपादनं जीवधर्मश्छात्रिन्यायेन जीवपरयोरुपचर्यत इति तन्निरस्तं भवति। परमात्मसमन्वयप्रक्रमाविरोधात्। अंतः स्थित्वा रमणकृत्सूत्रगतांतरशब्देन निर्दिश्यते। योगवृत्त्या तथाविधस्य तत्रोदाहृतवाक्ये हि स्वस्यादेयमानंदमत्यनुभवतीत्यात्मशब्दार्थस्य प्रतिभानात्। स विष्णुरेव कं ब्रह्म खं ब्रह्मेति तस्यैव सुखविशिष्टस्य प्रकृतत्वात्। एतदमृतमेतदभयमेतद्ब्रह्मेति वाक्यशेषात् । अथ हैनं गार्हपत्योऽनुशशास य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मीति गार्हपत्यस्याप्यादित्यांतर्यामितया प्रकृतत्वादक्ष्यादित्ययोरैक्यात् स एवाक्षिस्थः पुरुषः किं न स्यादित्याशंक्य यत्परिहारत्वेनोक्तं भगवता सूत्रकारेण अनवस्थितेरसंभवाच्च नेतर इति तद्विवृणोति ॥ अन्योन्येति। अग्नेरादित्यादेश्च नियम्यनियामकभावः परमेश्वराज्ञाकृतोऽभ्युपगंतव्यः पूर्वपक्षिणाऽपि । यथा देशाधिकृतपुरुषस्य प्रजानां च नियम्यनियामकभावो राजाज्ञाकृतो जीवानां सुरनरादिरूपाणां नियम्यनियामकभावस्य स्वाभाविकत्वेनाकृत्रिमस्यापि भगवदधीनत्वमस्त्येव । यदि चेश्वराज्ञानिरपेक्षत्वेन गार्हपत्यादिजीवो जीवांतरनियामको भवेत्तर्हि तस्यापि जीवत्वादन्यो नियामकस्तत्रास्याप्यन्य इत्यनवस्थानादुभयोर्जीवत्वसाम्येन नियम्यनियामकभावासंभवश्च स्यात्। यद्यनवस्थापरिहारार्थं कस्यचिज्जीवस्य परेशो नियामक इत्यभ्युपगम्यते तर्हि स एव भगवानग्न्यादिषु मुख्यनियामकतया श्रुतिप्रतीतितः स्वीकार्यः। परित्यागे कारणाभावात् । यद्यक्ष्यादिनियामकत्वमग्न्यादेरेतन्नियामकत्वमेव हरिरिति

कल्पनं तन्निष्प्रमाणकं व्यर्थं च। सर्वाणि भूतानि योऽंतरो यमयतीत्यादिश्रुतिविरुद्धं च। यत्त्वग्निवचनं सोऽहमस्मीति तत्स्वांतर्याम्यभिप्रायेणोपपन्नं। लोके बहुव्यापारवतः क्लेशदर्शनात्। सर्वनियामकादिव्यापारवतो भगवतश्चित्तविक्षेपसंभवात्। कथं रमणकर्तृत्वं युज्यत इत्याशंक्य परिहरति ॥ रमणमिति। न हीच्छामात्रनियमितप्रपंचस्य हरेः प्राकृतपुरुषदृष्टांताच्चित्ता-दिविक्षेपेणारतिरापादयितुं शक्यते। यस्य यच्छक्त्यनियमितं तदेव तस्य चित्तादिविक्षेपकं दृष्टं। तस्मादानंदानुभवितृत्वेन श्रूयमाणः सर्वनियामकोऽक्षिस्थपुरुषो दिव्यदृग्गोचरो विष्णुरेवेति सिद्धं। अनेनांतर्याम्याधिकरणतात्पर्यमप्युक्तं ज्ञेयं। इदानी-मभावलिंगानामीश्वराभेदमाक्षिप्य समर्थयति ॥ गुणक्रियेत्यादिना। गुणक्रियेत्यादीनां विधिमुखेनप्रतीयमानानामभेदो युज्यतां नाम ब्रह्मणा। अदृश्यत्वादीनां तु निषेधमुखेन प्रतीयमानानां कथमभेदो युक्तः स्यात्। निषेधमुखवेद्यस्य भावात्मक-त्वविरोधादिति। मैवं। न हि सर्वस्य निषेधमुखवेद्यस्याभावत्वमेवेति नियमः। तस्मादिदमन्यदित्यनुभूतस्यान्यत्वस्य भावरूपस्यापि तदिदं न भवतीति निषेधमुखवेद्यतादर्शनात्। न चान्यः स्वस्यावधिनिरूप्यत्वेन नञर्थत्वाभाव इति वाच्यं। अवधिनिरूप्यस्यापि नञर्थत्वदर्शनात्। ब्राह्मणादन्यविवक्षयाऽब्राह्मण इति प्रयोगो निषेधमुखवेद्यस्य गुणत्वं च युक्तं। अरोगत्वादीनां पुरुषगुणत्वप्रसिद्धेः। अत एवोक्तं भगवता ॥ अदृश्यत्वादिगुणको धर्मोक्तेरित्यदृश्यत्वादीनां भगवद्गुणत्वं। अतस्तस्यैव तन्निषेधमुखवेद्यत्वं विरुद्धं। यथा घटो न घट इति विरुद्धं न पुनर्घटो न पट इति। यत्तु पृथक्त्वं नाम गुणोऽन्यः अन्योन्याभावोऽन्यः पदार्थानां स्वरूपलक्षणो भेदोऽन्य इति वदंति तान्प्रत्याह ॥ पृथक्त्वेति। न हीदस्मात्पृथक् इदं न

भवतीति विषयभेदेन पृथग्व्यवहारो दृष्टः। तस्मादशुक्लो न भवतीति व्यवहारात्। गुणक्रियादेरिवाभावधर्माणां धर्म्यभेदः सविशेषो युक्तः। यथैकः समवाय इति समवायैकत्वयोरभेदेऽपि विशेषः। यथा च धर्मधर्मिणोर्भेदाभेदाविति भेदाभेदयोर्धर्म्यभेदेऽपि विशेषोऽभ्युपगंतव्यः समवायवादिना भेदाभेदवादिना च। अन्यथा शब्दपौनरुक्त्यादिकं स्यात्। अतः प्राक् समवायादिकल्पनाद्धर्मधर्मिणोः सविशेषाभेदांगीकारः साधीयान्। कल्पनालाघवात्। निर्विशेषपक्षस्त्वत्यंतमयुक्तः। विचारासहत्वात्। तथा हि। किं सत्यपदेनासत्यव्यावृत्ततया यावदुक्तं ब्रह्मज्ञानादिव्यावृत्तया तावदेवोच्यते। ततोऽतिशायितं वा। आद्ये पक्षे सत्यस्वरूपेणैव ब्रह्मस्वरूपस्यावगतत्वात्। तस्यैव जिज्ञासितत्वाच्च। ज्ञानादिपदवैयर्थ्यं स्यात्। द्वितीये निर्विशेषत्वभंगः स्याद्ब्रह्मणः। अतः सिद्धमदृश्यत्वादिगुणकत्वं विष्णोः। इदानीं क्रमप्राप्तत्वाद्वैश्वानराधिकरणतात्पर्यमाह ॥ बहुलिंगेत्यादिना। यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इत्यत्रात्मशब्दसामानाधिकरण्याद्वैश्वानरशब्दस्य विष्णुरेवार्थः। विगतमानत्वलिंगाच्च। को न आत्मा किं ब्रह्मेति तस्यैव जिज्ञास्यत्वेनारंभात्। न च तस्य ह वा एतस्यात्मनो वैश्वानरस्य उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयस्तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमित्यादिवाक्यशेषेऽग्निलिंगश्रवणात्प्रसिद्धाग्निरेवोच्यत इति वाच्यं। यस्माद्यज्जायते चांगाल्लोकवेदादिकं हरेः। तन्नामवाच्यमंगं तद्यथा ब्रह्मादिकं मुखमिति नारदीयवचनादाहवनीयादिशब्दानां भगवदंगविषयतयोपपन्नत्वात्। किंच मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मेत्यादिना हि पुरुषसूक्तोक्तस्य विष्णोः

प्रत्यभिज्ञानात् । तस्माद्वैश्वानरशब्दस्याविद्वद्रूढ्याग्निविषयस्यापि बलीयस्याविद्वद्रूढ्या विश्वनराश्रयत्वयोगेन च विष्णुविषयत्वमेव युक्तं । एतेनैव न्यायेन शाखांतरेष्वर्थांतरविषयत्वेन प्रसिद्धैर्बहुलिंगसमायुक्तबहुरूढनामभिर्नारायण एवोच्यत इति सिध्यति । प्रायिकत्वेन हि पादाध्यायसमन्वितार्थव्यवस्था । अतो हि लिंगात्मकशब्दसमन्वयपादे रूढनामसमन्वयाभिधानं ब्रह्मणि युक्तं । ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यायां सन्न्यायरत्नावल्यां श्रीमत्पद्मनाभतीर्थभट्टारकविरचितायां प्रथमाध्यायस्य द्वितीयः पादः ॥ १—२ ॥ ❁ ॥ ❁ ॥

॥ श्रीगुरुभ्योनमः ॥ हरिः ॐ ॥ हरौ तदितरत्र चापाततः प्रतीयमानानां द्युभ्वाद्यायतनत्वादिलिंगानां भूमादिशब्दानां च हरावेव मुख्यवर्तनमस्मिन्पादे निर्धीयत इत्याह॥ तत्रेति । एतदेव दर्शयति ॥ विष्णावित्यादिना ॥ ॐ द्युभ्वाद्यायतनं स्वशब्दात् ॐ ॥ अथर्वणोपनिषदि श्रूयते । यस्मिन्द्यौः पृथिवी चांतरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मानमिति । तत्र तावद्द्युभ्वायतनत्वेनोच्यमानः शिवो भवितुमर्हति । कर्तारमीशं पुरुषं ब्रह्मयोनिमिति वाक्यशेषात् । प्राणानां ग्रंथिरसि रुद्रो मा विशांतकः प्राणेश्वरः कृत्तिवासा इत्यादिश्रुत्यंतराच्च । अथवा जीवस्य द्युभ्वाद्यायतनत्वेनोच्यमानत्वं । तस्यापि वाक्यशेषे स एषोंतश्चरते बहुधा जायमान इति प्रतिभासात् । अभिधीयते विष्णुरेव द्युभ्वाद्याश्रयः । तमेवैकं जानथ आत्मानमित्यात्मशब्दात्तस्य च विष्णोरेव मुख्यत्वोक्तेः । आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययं । न संभवंति यस्मात्तैर्नैवाप्ता गुणपूर्णतेति ब्रह्मवैवर्ते । अमृतस्यैष सेतुरिति वाक्यशेषश्च विष्णावेव युज्यते । स हि मुक्ताश्रयः । पूतात्मा परमात्मा च

मुक्तानां परमा गतिरिति भारतवचनाच्च । वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः । एक एवेश्वरस्तस्य भगवान्विष्णुरव्यय इति भागवतवचनाच्च । यदुक्तं वाक्यशेषादावीशादिशब्दाच्छिवो द्युभ्वाद्याश्रय इति । तन्न । ईशादिशब्दानां विष्णावेव मुख्यतयोपपादितत्वात् । रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः । ईशानादेव चेशानो महादेवो महत्त्वत इत्यादिना ब्रह्मांडे । यदुक्तं जीवलिंगं बहुधा जायमान इति तद्विष्णोरुपपद्यते । अजायमानो बहुधा विजायत इति श्रुतेः । यद्यत्र द्युभ्वाद्याश्रयो जीवः स्यात्तर्हि ततो भेदेन जीवनिर्देशो न स्यात् । जुष्टं यदापश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति वाक्यशेषे । तस्मात् द्युभ्वाद्याश्रयो विष्णुरेव ॥ ॐ भूमासंप्रसादादध्युपदेशात् ॐ ॥ इदमाम्नायते । यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति स भूमा प्राणो भवितुमर्हति । प्राणो वा आशाया भूयानित्याद्युपक्रमेऽथ यद्यप्येनानुत्क्रांतप्राणान् शूलेन समासं व्यतिषं दहेन्नैवैनं ब्रूयुः पितृहाऽसीति न मातृहाऽसीति तल्लिंगश्रवणात् । अत्रोच्यते । विष्णुरेव भूमा । तत्सुखमिति सुखात्मकत्वोपदेशात् । सुखं च मुख्यं हरेरेव प्रसिद्धं । एष ह्येव परमानंद इत्यादौ । किंच स एवाधस्तात्स उपरिष्टादित्यादिवाक्यशेषे सर्वगतत्वादिव्यपदेशो विष्णावेव युक्तः । यदुक्तं प्राणलिंगत्वेनोत्क्रमणं तद्विष्णावप्युपपद्यते । तमुत्क्रामंतं प्राणोऽनूत्क्रामतीति श्रुतेः । तस्माद्वाङ्नाम्नो भूयसीति आरभ्यैकैकस्मादेकैकमुत्तममुक्त्वा सर्वोत्तमत्वेनोपदेशाद्विष्णुरेव भूमा । इदानीं अक्षरमंबरांतधृतेरित्यत्र यदुदाहरणवाक्यात् तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमित्यादि तद्धरौ घटयति ॥ अत इत्यादिना । भगवतोऽवयवबहुत्वस्वकृतजडादिरूपवस्त्वंतरगतस्थूलत्वादिराहित्यादिविपर्यैवास्थूलमित्यादिश्रुतिः ।

न तु स्थूलत्वादिधर्ममात्राभावविषयाव्यवहारात् । सर्वधर्मा । अणोरणीयान्महतो महीयानित्यादिश्रुतिविरोधाच्च । युगपदेवात्र-
स्थानमणुत्वमहत्त्वयोर्विष्णौ युज्यते । यस्मिन्विरुद्धगतयोऽप्यनिशं पतंति । त्वत्पादयोर्विविधशक्तय आनुपूर्व्यादिति वचनात् ।
दृष्टश्चैवंविधः प्रभावो यशोदया गोविंदे । तथा हि भागवतवचनं । पीतप्रायस्य जननी सुतस्य रुचिरस्मितं । मुखं लालयती
राजन् जृंभतो ददृशे इदं । खं रोदसी इत्यादि । एकत्र युगपदणुत्वमहत्त्वविरोधस्तु प्राकृतत्वोपाधिकृतः । अतो भगवति
नाशंकनीयः । पदार्थानां विचित्रस्वभावत्वाच्च । इदानीं द्युभ्वाद्यायतनमित्यारभ्यापादपरिसमाप्तेः प्रत्यधिकरणं विषयपूर्वप-
क्षसिद्धांतयुक्तिजातं दर्शयति ॥ लिंगमित्यादिना । नन्वस्मिन्पादे द्विधा संदिह्यमानानां लिंगनाम्नां हरावेव समन्वयोऽ
भिधेयः । तं परित्यज्य कथं तदुपर्यपि बादरायणः संभवादित्यादिसूत्रसंदर्भेण देवानां ब्रह्मविद्याधिकारस्तदभावश्च
शूद्रस्य विचार्यत इत्यत आह ॥ अधिकार इति । यतो मनुष्यानधिकरोति शास्त्रं अतोऽङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि
तिष्ठतीति कठवल्लीषु पठ्यमाना श्रुतिः सर्वगतस्यापि परमात्मनो मनुष्यहृदयापेक्षयांऽगुष्ठमात्रत्वं श्रावयतीत्युक्तं । हृद्यपेक्षया
तु मनुष्याधिकारत्वादिति गताधिकरणेनैव तावता मनुष्याणामेव ब्रह्मविद्याधिकारः । किं तर्हि देवानामप्यस्ति । अर्थित्व-
सामर्थ्याद्विद्वत्तासंभवात् । मध्ये वामनमासीनं विश्वे देवा उपासत इति श्रुतेश्च । कर्मण्यप्यधिकारिणो देवाः । यज्ञेन यज्ञमयजंत
देवा इति इंद्रादिभिर्यज्ञशब्दवाच्यविष्णुयष्टृत्वश्रुतेः । न च रुद्रादीनामिव वैदिकानुष्ठाननिषेधोऽस्ति देवानां । असावादित्यो
देवमधु स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यतीत्यादौ मधुविद्याया वस्वादिपदं फलत्वेन

श्रूयते। तत्र लब्धत्वस्वादिपदानामनधिकार इति न वाच्यं। मोक्षे सुखातिशयार्थं तत्राप्यधिकारसंभवात्। यावत्सेवापरे तत्त्वे तावत्सुखविशेषतेति स्कांदवचनात्। न च सर्वज्ञत्वेनावगतपरमात्मतत्त्वानां देवानां स म आत्मेति विद्यादित्यादिविधिवैयर्थ्यं। सामस्त्येन भगवत्तत्त्वावबोधे प्रमाणाभावात्। अवगतभगवदंशेऽपि कदाचिद्विस्मरणसंभवात्। सहैव संतं न विजानंति देवा इति श्रुतेः। अतो देवानामप्यनवगतभगवदंशाभिप्रायेणात्मानमेव लोकमुपासीतेत्याद्युपासनाविधिसंभवः। तदेतदाह ॥ तत्फलाये-त्यादिना। एतेन मध्वादिष्वसंभवादनधिकारं जैमिनिः। भावं तु बादरायणोऽस्ति हीति सूत्रतात्पर्यं विवृतं भवति। यस्माद्विष्णोरेव परिपूर्णज्ञानं ब्रह्माणमारभ्यान्यदेवानां तु क्रमेण अंशितं ज्ञानमतो युक्तं तेषां भगवच्छ्रवणमननादिकं। अतः पुरुषेषु ज्ञानतारतम्याद्वेदव्यासजैमिनिमतयोस्तारतम्यव्यवस्थायोगोऽविरोधश्च ॥ ❁ ॥ ॥ ❁ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकवि-रचितायां प्रथमाध्यायस्य तृतीयः पादः ॥ १–३ ॥ ❁ ॥ ❁ ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ तत्तु समन्वयादिति सकलवेदगतवाक्यपदवर्णसमन्वयः प्रतिज्ञातो ब्रह्मणि। तत्र जगत्कर्तृत्वादिकल्याणगुणविषयवाक्यानामन्यपरत्वं प्रतिषिध्य विष्णुपरत्वं प्रतिपादितमतीतपादैः। पदवर्णादीनां भगवद्विष-यत्वायोग्यानामस्मिन्पादे विष्णुपरत्वं प्रदर्श्यते। तत्र तावद्दुःखिबद्धादिशब्दानां ब्रह्मपरत्वं प्रदर्शयति ॥ दुःखीत्यादिना। यथा भृत्यादीनां राजाधीनत्वात्तेषु पराजितेषु राजा पराजित इत्युच्यते। एवं जीवानां विष्णवधीनत्वात्तेषु दुःखितेषु बद्धेषु च

विष्णुर्दुःखी बद्ध इत्युच्यते । एतदेव विवृणोति ॥ स्वातंत्र्यमिति । दुःखित्वादिधर्मापादकत्वं दुःखित्वादिधर्माधिकरणत्वं च दुःख्यादिशब्दप्रवृत्तिनिमित्तं । तत्र दुःखित्वादिधर्मापादकत्वेन दुःख्यादिशब्दवाच्यत्वं विष्णोर्युज्यते । तदुक्तं वैष्णवश्रुतौ । स बद्धः स दुःखी स बंधयति स दुःखयतीति स जीवः स प्रकृतिः स जीवयतीति स प्रकरोतीति सोऽवरः सोऽनित्यः सोऽवरयतीति सोऽनित्ययतीति । यथा जगदीशापेक्षयाऽल्पस्वामित्वेनापि राजा जयीत्युच्यते भृत्येषु जयत्स्वपि स च जयिशब्दो राज्ञ्येव मुख्यो बहुशः प्रयुक्तत्वात् । भृत्ये तु न बहुशः प्रयुज्यते । एवं बद्धादिशब्दाश्च विष्णावेव मुख्याः सुतरां परमस्वामिनि । ननु यथा भृत्यजयेन राजा जयीत्युच्यते एवं भृत्यमरणादिना राजा बद्धो मृत इत्यादि किमिति न प्रयुज्यत इत्यत आह ॥ भृत्येति । किंच प्रयोगे सति निमित्तानुसरणं न तु निमत्तमस्तीति प्रयोगः । न हि सिंहगुणयोगात्सिंहशब्दे देवदत्ते प्रयुक्त इत्येतावता वृकेऽपि प्रयुज्यतामित्यापादनं संभवति । राज्ञीव विष्णावपि बद्धादिशब्दप्रयोगाभावः किं न स्यादित्यत आह ॥ गुणा इत्यादिना । न हि बद्धादिशब्दप्रयोगादपि बंधादिशंका स्याद्विष्णौ निर्दुःखो निरनिष्टो निरवद्य इत्यादिश्रुतेः । यथा बव्हाशीशब्दो लोके निंदितविषयोऽपि सर्वात्तरि विष्णौ गुणवाचकः । एवं बंधादिनियामके तस्मिन्नेव बद्धादिशब्दो मंगलात्मकः । कार्यकारणबद्धौ ताविष्येते विश्वतेजसावित्यादौ श्रुतः । इदानीं कर्मतदंगवाचकत्वेन प्रसिद्धानां वसंते वसंते ज्योतिषा यजेतेत्यादिवाक्यगतपदानां विष्णौ प्रवृत्तिं दर्शयति ॥ जातमित्यादिना । पकारः प्राण आत्मेति श्रुतेः पकारनामा हरिः । आसमंताद्युक्तेन इतः प्राप्तः । यजेतक्रियापदस्यापि कारकपदत्वं दृष्टं पचतेऽधी-

तमित्यादौ । विशिष्टत्वाद्विष्णुर्विश्वास्मिन् ज्ञानशक्तिबलैश्वर्यतेजोलक्षणषट्कवाचि वौषडिति । स्वीयमाहरतीति स्वाहा हारिः । ज्योतिःसमूहस्य स्वामिन् ज्योतिष्टोमेन । इत्थं सहस्रनामवत्प्रातिपदं विष्णुवाचकत्वमवगंतव्यं । एवमनेककर्मतदंगवाचकत्वेन प्रसिद्धपदैश्चापुनरुक्तगुणवाचकैरुच्यमानत्वादनंतगुणत्वं विष्णोः श्रुतिसिद्धं । उक्तबलाज्ज्योतिष्टोमादिशब्दा मुकुंदस्य गुणानेव ज्ञापयंति । न तु पुनः प्रसिद्धयागादिरूपजडानित्यवस्तुस्वरूपत्वं । न हि शाखिशब्दाभिधेयत्वमात्रेण पनसस्यापि पिचुमंदत्वं भवति । इदानीं प्रतिपदं सम्यक् समन्वयमवगंतुमसमर्थानल्पाधिकारिणो वेदगतवाक्यसमन्वयमाह ॥ अंगीकृतेऽपीति ॥ वाक्यसमन्वय इति । कर्मादेरंतःकरणशुद्धिद्वारा परमात्मज्ञानं साधयितुं शक्यं । विविदिषंति यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतेः । स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इति स्मृतेश्च । ननु सर्ववेदानां प्रतिपदं हरौ समन्वयो निरधिकारित्वेनासंभावित इत्यत आह ॥ कश्छंदासामिति । कश्छंदसां योगमावेद धीर इति श्रुतेरयमर्थः । छंदसां वेदानां प्रतिपदं भगवति योगवृत्तिं आ समंताद्ब्रह्मा वेद ततोऽन्यः को वेद तद्वदंतु न कोऽपीति । अत एवान्येषामीषदधिकारोऽस्ति प्रतिपदसमन्वये । ननु सकलपदपदार्थतत्संबंधं ब्रह्मैव जानातीति चेत् । एकस्य प्रतिभानं तु कृतकान्न विशिष्यत इत्यत आह ॥ तस्यापीति । ब्रह्माऽपि पूर्वमहाकल्पसिद्धमेव शब्दार्थसंबंधं सुप्तप्रतिबुद्धन्यायेन भगवद्दत्तया दृष्ट्या जगदादौ पश्यति । यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति श्रुतेः । तेने ब्रह्म हृदाय आदि कवय इति स्मृतेश्च । ब्रह्मदृष्टवेदानामेकदेशेषु क्वचिद्विद्वद्वामदेवादिदिव्यदर्शनसंवादश्च प्रतीयते । तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेत्यादिषु

यथा मनुष्यादिज्ञानातिशयितज्ञानमृष्यादिषु प्रतीयते तथा ब्रह्मणोऽपि युक्तमेव । अत एव युक्तं तस्य पूर्वमहाकल्पासिद्धसकल-पदपदार्थसंबंधज्ञानं जातिस्मृतिवत् । शब्दास्तावन्नित्या न प्रत्युच्चारणमुत्पद्यंते । एष एवायं गोशब्द इत्यभिज्ञाविरोधात् । उच्चारणविशेषाच्छब्दविशेषाभिव्यक्तिः । अर्थाश्च कूटस्थतया नित्याः । केचिज्जगत्सृष्टिप्रलयाभ्युपगमेऽपि प्रवाहरूपेण नित्यं । वसंतादिऋतुलिंगवत् । तथा हि श्रुतिः । नित्यो नित्यानां चेतनश्चेतनानां । सूर्याचंद्रमसौ धाता यथा पूर्वमकल्पयदित्यादिका । अतःशब्दार्थसंबंधो नित्यो भवितुमर्हति । तथा च स्मृतिः । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः । वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति । जैमिनिरप्याह । औत्पत्तिकस्तु शब्दस्यार्थेन संबंध इति । केनाचित्संकेतितत्वे शब्दानां तथाविधा प्रसिद्धिः स्यात् । षडित्यादिशब्दवत् । अतः शब्दानामर्थावबोधशक्तिः स्वाभाविकी । यथेंद्रियाणां । अतो युक्तमुक्तं नित्य योगोऽपि शब्दानामर्थैर्नैव निषिध्यत इति । इदानीं स्त्रीवाचिनामभाववाचिनां च शब्दानां त्वं पुमानित्यादौ श्रूयमाणानां पुरुषे भावरूपे घटमानानामपि प्रवृत्तिं दर्शयति ॥ स्त्रीशब्दा इति । सततरमणत्वाद्देहादेव चतुर्मुखादिप्रसूतिकारणत्वान्निमित्तात्स्त्री । भावयितुमयोग्यत्वाद्धटादिवद्व्यक्तत्वाभावाद्वाऽभावो हरिरित्याद्यूहनीयं ॥ आनुमानिकमप्येकेषामित्यारभ्यापरिसमाप्तेष्वधिकरणेषु यथाक्रमेण विषयान्पूर्वपक्षेषु हेतून्सिद्धांतहेतूंश्च सिंहावलोकन-न्यायेन संक्षिप्य दर्शयति ॥ विरोधीत्यादिना । नन्वन्यत्र प्रसिद्धानां शब्दानां हरौ साक्षादेव समन्वयप्रतिपादयितुमारब्धोऽयं पादः । तत्किमर्थमत्र केषांचिद्वाक्यानां कर्मप्रतिपादनद्वारा भगवति समन्वयोऽभ्यनुज्ञायते । अन्यार्थंतु जैमिनि-

रित्यादिसूत्रसंदर्भेणेत्यत आह ॥ अन्वय इति । स्वशिष्याणां जैमिन्यादीनामिति शेषः । जातमोतं हरौ यस्माज्ज्योतिरित्यादिना योगवृत्त्या सर्वशब्दा हरौ वर्तंत इत्युक्तं प्राक् । तन्नयुज्यते । ज्योत्यादिशब्दानां ब्रह्मव्यतिरेकेणार्थांतरानभ्युपगमे ब्रह्मणि सर्वसमघटेनोदकमाहरेत्यादिव्यवहारसिध्यर्थमर्थांतरेष्वपि शब्दानां प्रवृत्तिरंगीकृता । अतस्तदनुसारेण तद्यदस्येदं विश्वं मित्रमासीद्यदिदं किंच तस्माद्विश्वामित्र इत्यादिषु नियुक्तिकोपदेशात् । कः प्राण्याद्यदेष आकाश आनंदो न स्यादित्यादिलिंगात् । विश्वामित्राकाशादिशब्दानां विष्णौ वाचकत्वशक्तिरेवावसीयते । यत्र शब्दस्यार्थांतरपरत्वं विरुद्धं तत्र ब्रह्मपरत्वमेव। यत्राविरुद्धं तत्रार्थांतराण्यप्यमुख्यतयोच्यंते । यः सर्वज्ञः सर्वविदित्यादौ सर्वशब्देन रूढमप्यन्यदुच्यते । ब्रह्म तु सर्व इति योगवृत्त्योच्यते । सरसीति (सीदतीति) सत्य इत्यादिनिरुक्त्या सत्य इत्यादिशब्दाभिधेयत्वं ब्रह्मणोऽवगंतव्यं । अतोऽर्थांतरानुसारेण शब्दमात्रस्य ब्रह्मपरत्वाभिधानं तूक्तमेव । सकृदुच्चारितशब्दस्याप्यनेकार्थवाचित्वं दृष्टं । अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत इत्यादौ । ननु ब्रह्मणस्तद्व्यतिरिक्तानां च शब्दाभिधेयत्वमेकप्रकारं किं न स्यात् । शकटादीनामिव वाहशब्दाभिधेयत्वं । अत आह ॥ इतो हीति । यथाऽयो दहतीत्ययसो दाहकत्वमग्निदाहकत्वमुपजीव्य प्रयुज्यते । एवं घटत्वादिकं भगवतो गुणमुपजीव्यैव कलशादयोऽपि पद्धटकत्वादिना घटादय इति रूढ्या जाताः । मुख्यपूर्वकत्वादुपचारस्य । न हि सिंहमजानतस्तद्गुणयोगाद्देवदत्ते सिंहशब्दव्यवहारो भवति । तथा पाद्मे । परस्य वाचकाः शब्दाः समाकृष्येतरेष्वपि । व्यवह्रियंते सततं लोकवेदानुसारत इति । यद्यपि हरेरपि शब्दार्थत्वमन्यशब्दार्थत्वापेक्षं । यथा सर्वं जानातीति सर्वज्ञ इत्यन्यशब्दा-

र्थमपेक्ष्य सर्वज्ञत्वं भगवत उच्यते । तथाऽप्यन्यद्वस्तुशब्दवाच्यमपेक्ष्यैव स्वशब्दवाच्यत्वं व्यवह्रियतामिति हरीच्छयैवैतदित्यदोषः । न हि वाचकापेक्षया वाच्यमिति व्यवह्रियत इत्येतावता वाच्यममुख्यं भवति । तस्माद्विष्णौ परममुख्यवृत्तिरेव । शब्दस्यार्थांतरे तु मुख्यमात्रवृत्तिर्लक्षणावृत्तिर्गौणीवृत्तिरिति तिस्रो वृत्तयो भवंति । ननु परमेश्वरापेक्षया योऽर्थो मुख्यस्तत्र शब्दानां व्युत्पत्तिः कथं युज्यते । न ह्यग्निशब्दस्य माणवके व्युत्पत्तिरिति चेत् । मैवं । अग्निर्माणवक इति व्यवहारादज्ञाताग्निशब्दमुख्यार्थस्य माणवकेऽप्यग्निशब्दव्युत्पत्तिसंभवात् । सर्षपतैलादावप्यमुख्यार्थतैलशब्दस्य वृत्तिसंभवाच्च । एवमज्ञातेऽपि भगवति परममुख्यार्थे शब्दानां घटादिषु व्युत्पत्तिर्युज्यते । लोके परममुख्यवृत्तेर्लक्षणमाह ॥ प्रवृत्तीति । स्तंभकत्वघटकत्वादीनां वृत्तिहेतूनामाधिक्यं यत्र यस्मिन्नर्थे स्तंभघटादिशब्दा मुख्या भवंति । तत्रैव तेषां प्रयोगाधिक्येऽतिशयेन परममुख्यता । सर्वस्तंभकत्वसर्वघटकत्वादीनां वृत्तिहेतूनां हरावेव मुख्यत्वात् तस्मिन्नेव वेदेतिहासपुराणादिषु प्रयुक्तत्वात्स्तंभादिशब्दानां तैः परमयोगरूढ्या विष्णुरेवोच्यते । न चावयववृत्त्यखंडवृत्त्योरेकस्य शब्दस्यैकस्मिन्नर्थे विरुद्धत्वाद्योगरूढिर्नामवृत्तिर्नास्तीति वाच्यं । तस्याः पंकजादिशब्देषु दृष्टत्वात् । न हि पंकजशब्दस्य योगमिति वाच्यं । असत्यादिव्यावृत्तशब्देन वाच्यत्वप्रसंगात् । लक्ष्यत्वविशेषेण निर्विशेषत्वभंगाच्च । असत्यपदव्यावृत्तस्यापि लक्ष्यकत्वे तेन किं लक्ष्यमित्युक्ते ब्रह्मेति वक्तव्यं । ब्रह्मपदस्याप्यवाचकत्वे तेनापि किं लक्ष्यमित्युक्तेऽन्यत्पदं वक्तव्यं । तेनाप्येवमित्यनवस्थाप्रसंगः । ननु यदापादितमसत्यं न भवतीति सत्यमित्युक्ते सत्यव्यावृत्तिवैशिष्टयमायातं ब्रह्मण इति तदिष्टमेव ।

अतद्व्यावृत्तिधर्मकत्वेनांगीकारादित्याशंक्याह ॥ यद्यभावेति । अयमर्थः । सत्यादिपदवत्सर्वज्ञादिपदमपि ब्रह्मणि श्रूयत एव । अत्रासत्यं न भवतीति सत्यमित्यसत्यव्यावृत्तिं वदताऽसर्वज्ञं न भवतीति सर्वज्ञमित्यसर्वज्ञताव्यावृत्तिरपि ब्रह्मण्यंगीकार्यैव । अविशेषात् । ततश्च सर्वज्ञत्वं तस्मिन्सिध्येत् । नञ्द्वयोर्भावार्थत्वात् । यद्यसर्वज्ञत्वनिषेधेऽपि सर्वज्ञत्वासिद्ध्या ब्रह्मणो सर्वज्ञत्वं न व्यावर्त्यते । तर्ह्यनानंदनिषेधेऽप्यानंदो न व्यावर्त्येत । तथाऽसत्याज्ञानादिनिषेधेऽप्यसत्याज्ञानत्वादिकं च न व्यावर्त्येत । अविशेषात् । तथाऽसत्यसुखत्वासत्यत्वाज्ञानादिकं ब्रह्मणि स्यात् । यदि सत्यादिपदैरसत्यादिविरोधित्वेनोक्तत्वान्नासत्यादिकं ब्रह्मणस्तर्हीश्वरपदेनानीश्वरनिषेधत्वेनोक्तत्वान्नानैश्वर्यं दुर्निवारमित्युक्तमेव । अत एव निर्विशेषत्वखंडनेन गत्यंतराभावादखंडवादिनाऽनिच्छताऽपि ब्रह्मणि विशेषः स्वीकार्यः । तथा गुणगुणिनोरभेदवादिना भेदाभेदवादिना च स बहुमानं स्वीकार्यः । तेन विनाऽनिर्वाहादित्याह ॥ अखंडेति । अतो विशेषबलादेव गुणानां ब्रह्मणश्चात्यंताभेदेऽपि गुणगुणिभावं ॥ उभयव्यपदेशात्त्वाहिकुंडलवत् । प्रकाशाश्रयवद्वा तेजस्त्वात् । पूर्ववद्वेति सूत्रत्रयेण निदर्शनत्रयं प्रदर्श्य भगवान्सूत्रकारः प्रतिपादितवानित्याह ॥ निदर्शनेनेति । ननु ब्रह्मपदाभिहितस्य पदांतरपर्यालोचनया गुणान्वयो भवेत् । नतु ब्रह्मपदेनैव गुणान्वितमभिधीयते । ब्रह्मपदाभिधेयज्ञानमेव मुक्तिसाधनमुक्तं । ब्रह्मविदाप्नोति परमिति । ननु ब्रह्मगुणज्ञानं मुक्त्यनुपयोगित्वादेव ब्रह्मणो गुणत्वं श्रुतितात्पर्यतः सिध्यतीत्याशंक्य प्रतिषेधति ॥ तच्चेति । सामान्यतः सर्वगुणानामपि ब्रह्मपदेनैवोक्तेर्न तेन गुणान्वितं ब्रह्मोच्यते । तथाहि । ब्रह्म किमित्याकांक्षायां सत्यं ज्ञानमित्यादिविशेष उच्यते । तस्य च ब्रह्मपदेन सामान्यतोऽ-

प्रतिपत्तौ किमित्याकांक्षैव न स्यात् । धर्मिवाचकेन ब्रह्मपदेन सामान्यत उक्तानां सत्यज्ञानादिधर्माणां विशेषतोऽवगत्यर्थं हि सत्यज्ञानादिपदं प्रयुज्यते । धर्मिवाचकपदं धर्मानपि सामान्यतो विधातुं शक्नोत्येव । धर्म्यभिन्नत्वात्तेषां । अतः प्रथमो-च्चारितपदं सामान्यतोऽर्थांतरैरन्वितं स्वार्थमभिदधाति । प्रथमनिर्दिष्टानामर्थांतराणां विशेषतो विधायकानि पदांतराणीत्य-न्विताभिधानमेव युक्तं । यतः केनचिदर्थेनान्वित एव स्वार्थे शब्दोऽप्युत्पन्नोऽतस्तथाविधमेव प्रतिपादयति । अनेनैतदन्वित मिति पदांतरवशाज्ज्ञायते । अन्विताभिधानानभ्युपगमे दूषणमाह ॥ यदीति । अतोऽन्विताभिधानसामर्थ्यादेव वेदैरानंदाद्य-खिलगुणात्मक एव उत्तरेणान्वयः । विषण इति शब्देनाक्रियमाणं विष्णोः पूर्णबलं षशब्देनाक्रियमाणमुच्यमानं जगत्प्रणेतृत्वं देशतः कालतो गुणतश्चाततत्त्वं । वाशब्दोक्तमृचां संहितामनु तदर्थत्वेन वेदमक्षरद्वयसंयोगरूपतया संहिततयैतदेव सर्वत्रोच्यते इति स संपूर्णबलं सर्वप्रणेतृत्वशक्त्यादियुक्तं च विष्णुं वेद । वीत्युपसर्गस्य विशेषकत्वेन इकारस्य च ताच्छील्यार्थस्य धर्मवाचित्वेनोपसर्जनत्वान्न पृथक् तयोर्व्याख्यानमत्र कृतं । णशब्दस्यात्रोक्तात्मत्वेन विहितत्वात् । उग्रं वच इति सर्ववाच-मुपलक्षणं । अतः सर्ववेदेतिहासादिगतवर्णमात्रवाच्यो विष्णुः । उक्तार्थमुपसंहरति ॥ तस्मादिति । किंच ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव । सर्वे वेदा यत्पदमामनंति । इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः । यमिंद्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः । यो देवानां देवतमस्तपोजास्तस्मै त्वा तेभ्यस्त्वाः स प्रथमं संकृतिर्विश्वकर्मा स प्रथमो मित्रो वरुणोऽग्निः स

प्रथमो बृहस्पतिश्चिकित्वान् । तस्मा इंद्राय सुतमा जुहोमि । यो देवानां नामधा एक एवेत्यादिश्रुतिः समुद्रमेघादिघोषा अपि भगवद्विषयाः किमु सकलवेदगतवाक्यपदाक्षराणीत्याह ॥ घोषा इति । एतदेवोक्तं ॥ ॐ ज्योतिरुपक्रमात्तु तथा ह्यधीयत एक इति । निःशेषवेदसमन्वयं ब्रुवता सूत्रकारेणेत्याह ॥ तदेवेति । एवं तावदव्यक्तात्पुरुषः पर इत्यादिवाक्यगतानामव्यक्तादिशब्दानां प्रधानादिष्वमुख्यवृत्तिमंगीकृत्यैव विष्णौ परममुख्यवृत्तिरभिहिता । अधुना आनुमानिकमप्येकेषामित्यादिसूत्राणां परेण यदन्यथाव्याख्यानं कृतममुख्यतयाऽपि न प्रधानं श्रुत्यभिधेयमिति तद्दूषयति ॥ न शब्देति । अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयंतीं सरूपां । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः । सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवा इत्यादिश्रुतिस्मृतिवाक्येषु श्रूयमाणत्वान्न प्रधानं श्रुत्याद्यसिद्धं । यद्यत्र तेजोऽबन्नात्मकजगदुपादानं जडमनुमानादिसिद्धं भूतसूक्ष्मशब्दाभिधेयं वस्तूच्यत इत्युच्यते । तदस्तु तस्यैव प्रधानत्वात् । न हि नाम्नि विप्रतिपत्तिर्युक्ता । ननु प्रधानस्यापि श्रुत्यर्थत्वे कथं सर्वश्रुत्यर्थो विष्णुरेवेति पक्ष इत्यत आह ॥ अस्माकामिति । सकृदुच्चारितशब्दस्य परममुख्यार्थपरत्वं प्रमाणेनोपपादयति ॥ अर्थद्वयमिति । योगानां शब्दयोगवृत्तीनां परमां सिद्धिं परमेश्वरे हि शब्दयोगवृत्तयो मुख्यतः सिध्यंत्यत्रेति कारणं स्वीकारस्येति शेषः । अतः सर्वश्रुतीनां महायोगवृत्त्या विष्ण्वभिधायित्वे क्वचिद्रूढ्या प्रधानस्यापि प्रतीयमानत्वादजादिशब्दैर्बाधकप्रमाणाभावादजामेकामित्यादिका श्रुतिः प्रधानमपि प्रतिपादयतीति युक्तं । न च वाच्यमेकस्मिन्नेव शब्देऽनेकार्थविधानं न युज्यते वाक्यभेदप्रसंगादिति । अप्राप्तत्वाद्गुणभूतप्रधानविशिष्टब्रह्म-

विधानं युक्तमेव । यथा यदाग्नेयोऽष्टाकपाल इत्यादिकर्मविधौ कर्मणो गुणानां कपालादीनां वा प्राप्तत्वेन सर्वगुणविशिष्टं कर्म विधीयते । अपि च यतः सूत्रकारेणैव प्रधानं सप्रपंचं प्रतिपादितं भागवते । अतस्तदभावप्रतिपादनं सूत्रार्थत्वेन व्यामोहमात्रविजृंभितमित्याशयवानाह ॥ यत्तदिति । सदसदात्मकस्थूलसूक्ष्मरूपमविशेषं स्वयमन्यस्य विकारो न भवतीति । पंचभिर्भूतैः पंचभिस्तन्मात्रैश्चतुर्भिर्मनोबुध्यहंकारचित्तैर्दशभिरिंद्रियैर्विकारभूतैर्ब्रह्म बृंहितमित्यर्थः । ननु ब्रह्मैव जगदुपादानं । प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादिति सूत्रादित्यत आह ॥ न चेति । विकारित्वमेवोपादानत्वं । न तु ब्रह्मणो निर्विकारत्वान्नापि तद्धर्मस्य शक्त्यादेस्तस्यापि निर्विकारत्वश्रवणात् । सदैकरूपाविज्ञानबल इति विकारो द्विविधः । एकः पूर्वावस्थासंकोचेनावस्थांतरविशेषोऽन्याधीनः । यथा सुवर्णस्य कुंडलाद्याकारः । परोऽत्यंतापूर्वावस्थाप्रच्युत्यावस्थांतरभावः । यथा क्षीरस्य दध्याकारः । अयं द्विविधोऽपि विकारो ब्रह्मणो न बोभवीति । अनन्याधीनत्वात् । अप्रच्युतसर्वज्ञाद्यवस्थात्वात् । तदेतदाह ॥ पराधीनेति । अतः पुत्रोत्पत्तौ पितुरिव जगदुत्पत्तावपादानत्वमेव ब्रह्मणः । चेतनत्वात् । ऊर्णनाभेरपि यल्लालादिकं तदेवोर्णाकारेण परिणमते न तूर्णनाभिः । इदमेवोक्तं ॥ इच्छामात्रादिति । भाल्लवेयश्रुत्या स्वदेहादिति ब्रह्मतर्केण च यथा चेतनस्याचेतनस्याचेतनविकारत्वं । अदृष्टत्वात् । किंच यदि जगद्ब्रह्मणो विकारस्तर्हि नित्यसर्वज्ञत्वादिलक्षणात्तस्माद्विलक्षणतया नोपलक्ष्येत । न हि विकृतदशायां क्षीरस्येदं क्षीरमिदं दधीति पृथगुपलंभः । यदि जगद्ब्रह्मणोरस्तित्वादिसाधर्म्येण विकारविकारिभावः स्याल्लोके खर्वस्वर्णयोरपि । अपि च जगदाकारेण परिणतस्य ब्रह्मणो जगन्नाशादिना नाशित्वाद्यापत्तेर्नि-

त्यत्वादिश्रुतिव्याकोपः स्यात्। ननु न क्षीरवद्ब्रह्म साकल्येन परिणमते किंतु भागेन। अतो नोक्तदोष इत्याशंक्याह ॥ भागेनेति। परिणम्यमानापरिणम्यमानयोर्भागयोरभेदस्य विरुद्धत्वाद्भेद एव युक्तः। तत्रापरिणामभाग एवेश्वरः परिणामिभागः प्रधानमिति न नो हानिः। ननु सर्वभागसमूहो ब्रह्म न त्वेको भाग इत्याशंक्य परिहरति ॥ भिन्नानामिति। वृक्षसमूहस्य वृक्षोपादानत्ववत्। भागसमूहत्वे ब्रह्मणो जगदुपादानत्वं न स्यात्। न हि सर्वपदार्थसमूहः पदार्थोपादानं। ननु गोमयवृश्चिकादिवद्विकारिविकारभावेऽपि जगद्ब्रह्मणोर्वैलक्षण्यं युज्यतामित्यत आह ॥ शृंगादिति। यो गोमयभागे वृश्चिकरूपेण परिणतस्तस्य नवृश्चिकाद्वैलक्षण्यं दृश्यते। वृश्चिकरूपेणापरिणतगोमयभागस्य वृश्चिकं प्रत्यपादानत्वमेव युक्तं। तस्मान्निर्गतत्वाद्वृश्चिकस्य। एवं विश्वोत्पन्नावप्यपादानत्वमेव ब्रह्मणो युक्तं। ननु स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत। यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवदित्यादिश्रुतौ सत्त्यदादिशब्दवाच्यपंचभूतादिवाक्येन विकारः प्रतीयत इत्याशंक्य परिहरति ॥ सच्च त्यच्चेति। न हि कुत्रचिदुपादानकारणं किंचित्कार्यं दृष्ट्वेदं सर्वमसृजत् यदिदं किंच तत्सृष्ट्वा तत्प्रविश्य पश्चात्स्वयं भवतीति युज्यते। अन्यस्यान्यत्वविरोधात्। स तपोऽतप्यतेत्यद्यालोचनपूर्वकस्रष्टृत्वश्रवणान्नोपादानत्वं ब्रह्मणः। न हि कुत्रचिदुपादानस्य बुद्धिपूर्वकर्तृत्वं दृश्यते। तर्हि सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं तत्सत्यमभवदित्येषां पदानां कोऽर्थ इत्यपेक्षित इत्याह ॥ सत्वात्ततेरिति। पुरुषापेक्षया उपदेष्ट्रपेक्षया। एवं सति प्रकृतिश्चेति सूत्रार्थः क इत्यपेक्षिते आह ॥ तस्मादिति।

अत एव सोऽकामयत बहु स्यां प्रजायेयेति सच्चेत्यादिवाक्योपक्रमे श्रूयमाणः परमात्मनो बहुभावोऽपि विकारित्वं विनैव घटत इत्याह ॥ बहुस्यामिति । अनेकप्रादुर्भावरूपैस्तत्तत्पदार्थेषु प्रविश्य क्रीडितुं हि विष्णुर्जगत्सृष्टवानित्यर्थः । तस्मान्न जगदाकारेण हरिः परिणमत इति सिद्धं । एवं तावद्ब्रह्मपरिणामवादं निराकृत्याधुना ब्रह्मविवर्तवादमुपन्यस्य दूषयति ॥ यच्चेत्यादिना । भ्रांत्या ब्रह्मणि जगदध्यासश्चेत्कस्येयं भ्रांतिर्ब्रह्मणो वा तदन्यस्य वा । नाद्यः । सर्वज्ञत्वश्रुतिविरोधात् । न ह्यज्ञाननिमित्ता भ्रांतिः सर्वज्ञस्य संभवति । न द्वितीयः । अद्वैतभंगप्रसंगात् । अध्यासद्रष्टुरनध्यस्तत्वात् । प्रतीतत्वात्प्रपंचवत्सोऽप्यध्यस्त इति चेत् । मैवं । तत एव ब्रह्मणोऽप्यध्यस्तत्वापातात् । न हि सर्वथाऽप्रतीतस्याध्यासाधिष्ठानत्वं क्वचिद्दृष्टं । किंच न केवलमध्यासद्रष्टैवानध्यस्तः किंतु तद्देहेंद्रियादिकं सकारणमप्यनध्यस्तमेव स्यात् । तदभावे चाक्षुषादिभ्रमानुपपत्तेः । अपि चाज्ञानाधीनो हि सर्वभेदभ्रमः । अज्ञानमपि तन्मते परमार्थत्वाद्ब्रह्माधीनमित्यन्योन्याश्रयप्रसंगः स्यात् । किंच यदि सर्वमध्यस्तं तर्हि सर्वमध्यस्तमित्युक्तेरपि सर्वमध्यपतितत्वेनाध्यस्तत्वान्न स्वार्थबोधकत्वं युज्यते । ननु गगनकुसुमवदत्यंतासत्वं न प्रपंचस्य । किंतु बाध्यस्यापि व्यावहारिकसत्यत्वमस्त्येवातो बाध्यबाधकभावो युक्त इत्यत आह ॥ व्यावहारिकतेति । ज्ञानबाध्यत्वे प्रपंचस्यार्थक्रियाकारित्वं न स्यात् । तथाविधस्य मरीचिकाजलादेः पानादिसाधनत्वादर्शनात् । न च ज्ञानबाध्यस्याप्यर्थक्रियाकारित्वं स्वप्नसृष्टौ दृष्टमिति वक्तव्यं । तस्याः पूर्वदृष्टवस्तुवासनात्मकतया सत्यत्वात् । संध्यं तृतीयं स्वप्नस्थानमित्युपक्रम्याथवेशांताः पुष्करिण्यः स्रवत्यः सृजते स हि कर्तेत्यादिवचनेनेश्वर-

कर्तृत्वश्रवणाद्गगनादिवत्स्वप्नस्य सत्यत्वमत्रगम्यते । यत्तु तत्रासंभावितं जाग्रत्त्वादिकं प्रतीयते तदेवास्तु शुक्तिरजतादिवद्भ्रांतं । ननु सर्पादावपि यद्भयकंपादिकं जायते तत्कथं । असत्यवस्तुतोऽर्थक्रियाकारित्वं नास्तीत्यत आह ॥ सर्पेति । रजतभ्रमस्यापि विषयतया न रजतं कारणं किंतु सत्यरजतसादृश्ययुक्तशुक्तिरेवेंद्रियसंप्रयुक्ता यदिदं रजतमिति दृष्टं सा शुक्तिरेवेत्युत्तरकाले प्रतीतेः । ननु यथाऽसतोऽर्थक्रियाकारित्वं न दृष्टमेवं सतोऽपि न दृश्यते न च घटादौ दृष्टमिति वाच्यं । तत्सत्यत्वस्य विवादाध्यस्तत्वादित्यत आह ॥ ब्रह्मेति । परत उपाधितः । न प्रपंचमिथ्यात्वेऽनुमानादिकं साधनं प्रयोक्तुं शक्यं सर्वमिथ्यात्ववादिना । तस्य बाधासिद्धत्वेनासाधकत्वात् । अन्यतरासिद्धस्य साधकत्वे शब्दोऽनित्यः कृतकत्वादित्यादेरपि प्रयोगदर्शनात् । तदेतदाह ॥ अमुख्येति । उभयवादिसंप्रतिपन्नं प्रमाणं स्वमतेऽस्तीत्याह ॥ साधकत्वमिति । नन्वहं किमपि प्रमाणप्रमेयादिकं नांगीकरोमि । तत्कथमुभयं संप्रतिपन्नप्रमाणश-दवद्भिरुच्यत इत्याशंक्य परिहरति ॥ यदीति । यदि सर्वानंगीकारवादी सर्वानंगीकारमंगीकुर्यात्तर्हि सर्वानंगीकारं जह्यात् । सर्वानंगीकारस्यापि सर्वमध्यपतितत्वात् । अतः सर्वानंगीकारवादिनः सर्वानंगीकारान्मूकत्वापत्त्या प्रतिवादित्वाभावः स्यादित्यर्थः । एवं युक्त्या प्रपंचस्य मिथ्यात्ववादिनं परिभूय सत्यत्वमर्थक्रियाकारित्वं साधितं श्रुतिभिश्च साधयति ॥ विश्वमिति । विश्वं सत्यं मघवाना युवोरिदापश्च न प्रमिनंति व्रतं वां । यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता । प्रधान्वस्य महतो महानि सत्या सत्यस्य करणानि वोचं । कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्य इत्येतासां श्रुतीनामयमर्थः । हे मघवानौ इंद्रबृहस्पती युवयोरेव यद्विश्वं सत्यमेव नानिर्व-

चनीयं। वां युवयोर्यद्वृष्ट्यादिना विश्वपालनादिव्रतमापश्च देवताश्च न अपि प्रमिनंति जानंति तच्च सत्यं। अनेनेंद्रादिनामिनो विष्णोः सत्यभूतविश्वस्वामित्वमुक्तं भवति। स्पृहणीयस्य वसुनो द्रव्यस्य बल्यादिदैत्यस्थस्य जेता इंद्रादिभ्यश्च दाता विष्णुः। यश्चैतद्विश्वं चिकेत चकार तत्सत्यमेव न मोघं न मिथ्या। वोऽस्य विष्णोर्महिनः सत्यस्य महांति सत्यानि पारमार्थिकानि सृष्ट्यादिकर्माणि प्रवोचं प्रब्रवीमि। स्वयंभूः परमेश्वरः पदार्थान्याथातथ्यतः पारमार्थ्येन कदाचिदप्यनन्यथाभूतान्व्यदधादकरोदिति। किंच साक्ष्यनुभवविरुद्धं विश्वमिथ्यात्वमित्याह॥ सत्यत्वमिति। इंद्रियेष्विव कादाचित्कः काचादिदोषः साक्षिणि न संभवत्येव। अतः केवलसाक्षिवेद्यस्य मिथ्यात्वं न वक्तुं शक्यते। केवलसाक्षिवेद्यं हि सर्वस्य सार्वकालिकाबाध्यत्वं। तथाहि। कालस्तावत्केवलं साक्षिवेद्यः। सर्वेंद्रियकृत्युपरमदशायां सुषुप्तावपि प्रतीयमानत्वान्नानुमेयत्वं तस्य। अन्यथैतावंतं कालं सुखमहमस्वाप्समित्युत्तरकालीनस्मृतिर्न स्यात्। न ह्यननुभूतं स्मर्यते। न चानुमानमेव मानं काले। लिंगाभावात्। न च यौगपद्यविरहिप्रत्ययो लिंगं। तस्यैव कालविषयत्वात्। प्रत्यक्षविषयस्याप्रत्यक्षत्वे घटस्याप्यप्रत्यक्षत्वप्रसंगात्। एतदस्तीति प्रत्यक्षप्रतीतौ कालस्य सत्वविशेषणत्वेन प्रतीयमानत्वात्। अतीतानागतकालयोरप्रत्यक्षत्वे साध्यसाधनयोर्व्याप्तिग्रहणाभावेनानुमानोच्छेदप्रसंगः। यतो भूतभविष्यद्वर्तमानधूमानामग्न्यविनाभावं प्रत्यक्षेण निश्चितवतो हि धूमज्ञानादग्निज्ञानं जायते नान्यथा। अतो युक्तं भूतभविष्यद्वर्तमानकालेऽबाध्यत्वग्रहणं प्रत्यक्षेण प्रपंचस्य। न च वाच्यं रज्जुसर्पस्य त्रैकालिकाबाध्यत्वं किमिति न गृह्यत इति। परीक्षया निर्दोषत्वेनावधृतप्रतीतिविषयस्यैव साक्षी त्रैकालिकाबाध्यत्वं निश्चिनोतीति नियमात्। परीक्षा-

सम्यक्त्वं च परीक्षामंतरेणैव साक्षी गृण्हाति । न चैवं सति वस्तुतत्त्वमपि परीक्षां विनैव गृण्हीयादिति वक्तुं शक्यते । न हि दीपेन करणेन विना दीपो ज्ञायते चेद्घटोऽपि तथैव ज्ञायतामिति वक्तुं शक्यते । त्रैकालिकाबाध्यत्वस्य विश्वधर्मस्य साक्षिनिश्चितत्वानभ्युपगमे बाधकमाह ॥ अन्यथेति । अकस्मादिति बाधकंविनेत्यर्थः । इतः पूर्वविश्वप्रवाहस्यानिवृत्तत्वादुत्तरकालेऽप्यनिवृत्तिरित्यंगीकारेऽनादेः संसारस्य तत एवानिवृत्तिः स्यात् । तरति शोकमात्मविदिति श्रुत्या संसारबंधो निवर्तितुं योग्यः । बंधत्वाच्छृंखलाबंधवदित्यनुमानाच्च संसारनिवृत्तिः सिध्यति चेच्छ्रुत्यानुमानप्रामाण्यं कुतः सिद्धं । यदि प्रमाणांतरसिद्धं तत्प्रामाण्यमपि प्रमाणांतरादित्यनवस्था स्यात् । अतः स्वयंप्रकाशात्साक्षित एवैतच्छ्रुत्यनुमानप्रामाण्यमंगीकर्तव्यं । एवं सति प्रामाण्यं यथा साक्षी वर्तमानप्रकारेणैव स्थापितवान् अनन्यथाभूतत्वेन कालांतरेष्वपि स्थापयति । एवमेवासौ प्रत्यक्षादिप्रमाणसिद्धविश्वसत्यत्वं कदाऽप्यनन्यथाभूतत्वेन स्थापयतीत्यंगीकारे को दोषः । प्रत्यक्षस्य वर्तमानग्राहित्वं तत्तेदंताविशिष्टवस्तुविषयप्रत्यभिज्ञायामतीतज्ञानस्य यथार्थत्वावेदकबाधकप्रत्यये च दृष्टं । अतः प्रपंचत्रैकालिकाबाध्यत्वग्राहकेण साक्षिप्रत्यक्षेण विरोधाद्भविष्यद्बाधकविषयमनुमानादिकमुदेतुमेव न शक्नोति । अपि च यदि साक्षी विश्वस्य सर्वकालीनमनन्यथाभावं न गृण्हाति तर्ह्यद्वैतविषयानुमानादिकं भविष्यत्काले प्रमाणं द्वैतविषयं वा न भविष्यतीत्यत्र किं प्रमाणमिति प्रश्नो दुष्परिहरः स्यात् । न च स्वप्नदृष्टप्रपंचवदेकजीवाज्ञानपरिकल्पितं विश्वमिति वक्तुं युक्तं । बहुवर्धकिनिर्मितप्रासादादिवदनेकमरीच्यादिभिर्बुद्धिपूर्वं सृष्टमित्यपि वक्तुं शक्यत्वात् । ननु स्वप्नदृष्टानेकपुरुषवत्स्वव्यतिरिक्त-

पुरुषाणां स्वाज्ञानकल्पितत्वात्कथं तत्सृष्टं विश्वमिति चेत् । मैवं । स्वयमेव पुरुषांतराज्ञानकल्पितः किं न स्यादित्यपि वक्तुं शक्यत्वात् । स्वप्ने तूत्थानानंतरमन्येषामेवाभावात्स्वयमकल्पितामिति निश्चेतुं शक्यते । अत्र तु बहूनां परस्परं पश्यतामयमस्याज्ञानकल्पित इत्येकाज्ञानकल्पितत्वं कथमपि निश्चयो न घटते । यथा ह्युत्थितस्य स्वप्नपुत्रोपदेष्टृत्वं न घटते । अतः स्वाज्ञानपरिकल्पितः पर इति वचनं स्वानुभवव्वचनमेव व्यापयति । अपिच यस्तु स्वव्यातिरिक्तं सर्वमज्ञानकल्पितमित्यभ्युपगच्छति तस्य परं प्रति सर्वमज्ञानकल्पितमिति प्रतिपादनं न युज्यते । यथा ह्युत्थितस्य स्वप्नपुत्रोपदेष्टृत्वं न घटते । यथा दिङ्मोहस्याप्तवाक्यादिनाऽवधृतप्राचीदिक्त्वस्य प्रतीच्यां प्राचीदिक्त्वान्वेषणं न युज्यते । अथ यद्यसौ स्वाज्ञानपरिकल्पितमिति प्रतिपादयन्नेव न मया प्रतिपादनं कृतमिति ब्रूयात्तर्हि तस्य कशादिना ताडनमेवोत्तरं भवेत् । हिरण्यादिकमपहृत्य न मयाऽपहृतमिति ब्रुवतश्चोरस्येव । तदेतदाह ॥ एकेति । अधुना प्रपंचस्य मिथ्यात्वपरत्वेनोद्भावितां श्रुतिमुदाहृत्य सत्यत्वपरतया व्याचष्टे ॥ प्रपंचो यदीति । प्रपंचो यदि विद्येतेति श्रुत्यर्थः । प्रपंचो यदि विद्येत उत्पद्येतेत्यर्थः । न तु विद्यमानो भवेदिति । तथा सति यद्विद्यते तन्निवर्तत इति व्याप्त्यभावान्निवर्तेतेति प्रसंजनमयुक्तं स्यात् । अतो विविधभेदात्मको विकल्पो यदि केनचित्कल्पितः स्यात्तर्हि निवर्तेत विनश्येत् । यन्मोक्षव्यतिरिक्तत्वे सत्युत्पद्यमानं वस्तु तद्विनाशीति व्याप्तेः । न च विनश्यति तस्मादनादिरेवायं प्रपंच इत्येतदर्थः सिद्धः । विपर्यये पर्यवसायित्वात्तर्कस्य । ननु घटादिरूपप्रपंचस्योत्पत्तिविनाशौ स्त एव । तत्कथमनादिनित्यत्वं तस्येत्यत आह ॥ प्रपंचो भेदपंचक इति ।

भेदपंचकस्य नित्यत्वे श्रुतिं दर्शयति ॥ जीवेति । विनाशिनोऽपि घटादेर्धर्मरूपो भेदः परवाद्यभ्युपगतघटत्वादिजातिवन्नित्योऽवगंतव्यः । वस्त्वंतरापच्चयभावात् कालत्रयेऽपि । उपदेशादयं वादो ज्ञाते द्वैतं न विद्यत इत्यस्यार्थमाह ॥ द्वैतं न विद्यत इति ॥ तस्मादज्ञानिनां मतामिति । मायामात्रमिदं द्वैतमद्वैतं परमार्थत इत्यस्यार्थमाह ॥ मितं त्रातमित्यादि। अधुना प्रपंचस्य ब्रह्ममिथ्यापरिणामरूपत्वे परोद्भावितां श्रुतिं ब्रह्मणो जगत्प्राधान्यादिपरतया व्याचष्टे ॥ वाचारंभामिति । उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं । यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं लोहमणिरित्येव सत्यं । यथा सोम्यैकेन नखनिकृंतनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं कार्ष्णायसमित्येव सत्यं । एवं सोम्य आदेशो भवतीति छंदोगश्रुतावादिशतीत्याज्ञापयतीत्यादेशशब्दोक्तेनादेष्ट्रा विष्णुना ज्ञातेनान्यत्सर्वमज्ञातमपि विष्णुसदृशत्वेन विष्ण्वपेक्षयाऽल्पकालीनत्वेन विष्णुप्रधानत्वेन ज्ञातं भवतीत्यत्र यथा सोम्यैकेनेत्यादिदृष्टांतचतुष्टयमभिधीयते । तथाहि । वाचा वागिंद्रियेण मृदाद्यर्थेषु संकेतरूपेणारभ्यमाणं नामजातं विकारो विप्लुतं सत्यं नित्यं नामधेयं मृत्तिकेत्यादि संस्कृतमेव । सत्यशब्दस्य सदातनत्वयोगान्नित्ये प्रयोगः । उपरि दहरविद्यायामपि दृश्यते । ब्रह्मणि देहवधादिना हन्यमाने पदेन जरावाप्नोति प्रध्वंसते वा किं ततो विशिष्यत इति स ब्रूयान्नास्य जरयेतं जीर्यति न वधे नास्य हन्यत एतंत्सत्यं ब्रह्मपरमिति । एतदुक्तं भवति । यथा वेदादिषु प्रयुज्यमानत्वेन प्रधानभूतनित्यनामधेयानां परिज्ञानेन

तत्तद्देशीयसांकेतिकनामजातमपरिज्ञातमपि परिज्ञातमेव व्यपदेष्टुं शक्यते । ग्रामप्रधानपुरुषज्ञानेन ग्रामः सर्वो ज्ञातो भवतीति व्यवहारदर्शनात् । तथा नित्यप्रधानभूतेश्वरपरिज्ञानादप्रधानं विश्वं ज्ञातं भवतीति युज्यते । न हि विष्ण्वपेक्षयाऽल्पकालीनं विष्णूपसर्जनं विश्वमिति ज्ञानं विष्णुर्न तथाऽन्यलोहमयं विज्ञातं भवति । एवं भगवतो ज्ञानात्सत्वादिसादृश्यात्तत्प्रधानतया चान्यद्विश्वं ज्ञायते। भगवति तत्सदृशं तत्प्रधानकं विश्वमिति ज्ञातुं शक्यते। विष्णुप्रधानत्वेन विश्वस्य ज्ञानं हि फलवत् । स्वतंत्रत्वज्ञानं तु मिथ्याज्ञानत्वेन रज्जुसर्पज्ञानवदनर्थकारणं । एकविज्ञानेन सर्वविज्ञानं विकारविकारिभावेनोपपादयतीयं श्रुतिरित्यंगीकारे मृदादिलोहेन कृष्णायसेनेति वचनं स्यात् । एकपिंडमणिनखनिकृंतनशब्दानां वैयर्थ्यात् । न चोपादानस्य ज्ञानात्तद्विकारः सम्यक् ज्ञायते । तथा सति दृष्टमृदः पुंसो घटशरावादिजिज्ञासाभावप्रसंगात् । वाचारंभणशब्देन विकारस्य मिथ्यात्वमुच्यत इत्यंगीकारे वाचारंभणं विकारो मृत्तिकेत्येव सत्येति वचनं स्यात् । नामधेयेति शब्दाद्वैयर्थ्यात् । वाचारंभणशब्दस्य मिथ्यात्वे प्रसिध्यभावान्न मिथ्यात्वमर्थः । एकविज्ञानेन सर्वविज्ञानं तस्मिन्पक्षे न युज्यते । ब्रह्मव्यतिरेकेण सर्वस्यैवाभावात् । न हि शुक्तिकाशकलं पश्यता तत्र रजतं ज्ञायत इति युज्यते । अतः सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयं । तदैक्षतेत्यादिवाक्यशेषे बुद्धिपूर्वकत्वेन जगत्कर्तृत्वश्रवणाद्विष्णोर्निमित्तकारणत्वेनैव प्राधान्यात्तज्ज्ञानाद्विश्वं ज्ञातमिव भवतीति युक्तं । उक्तं ह्युपसंहरति ॥ तस्मादिति । अतो निखिलकल्याणगुणात्मके विष्णौ सकलवेदसमन्वय इति सिद्धं ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां प्रथमाध्यायस्य चतुर्थः पादः ॥ १—४ ॥ प्रथमाध्यायः समाप्तः ॥ १ ॥

|| अयं ग्रंथः खंडो रामचंद्र भिसे इत्यनेन "कर्नाटक प्रिंटिंग वर्क्स, धारवाड" मुद्रणालये मुद्रितः ।
सवणूरकुलोत्पन्नराघवेंद्रसुनुना गोविंदेन धारवाडग्रामे प्रकाशितश्च ||

॥ इति श्रीमदनुव्याख्यानटिप्पणी सन्न्यायरत्नावली समाप्ता ॥

॥ प्रथमाध्यायः ॥

॥ अथ श्रीमदनुव्याख्यानटिप्पणी सन्न्यायरत्नावली प्रारभ्यते ॥

॥ द्वितीयाध्यायः ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ जगत्कारणे विष्णौ मुख्यया वृत्त्या निखिलवेदानां समन्वयोऽभिहितः प्रथमेऽध्याये । द्वितीयेऽविरोधश्चिन्त्यते । समन्वयहेतुत्वेनाविरोधस्य प्रथमद्वितीयाध्याययोर्हेतुहेतुमद्भावसङ्गतिरवगन्तव्या । न ह्यनुपन्यस्तसमन्वये विरोधः स्फुरति । विरोधश्चतुर्विधश्चतुर्षु पादेषु परिह्रियते । तत्र परोद्भाविततर्काविरोधः प्रथमपादे साध्यते । प्रथमाधिकरणे तु प्रधानमल्लकनिबर्हणन्यायेन शैवादिस्मृत्या विरोधः परिह्रियते । तस्या युक्तिसमन्वयश्रुतिन्यायोपेतश्रुत्यात्मकत्वाद्विरोधस्य चतुर्धोदयात् । बलवद्युक्त्यादिभिस्तत्परिहारोऽपि चतुर्विधः । एवं सर्वाधिकरणेषु सर्वपादेषु सर्वाध्यायेष्वपि समन्वयाविरोधसाधनफलानामुद्भावयितुं शक्यत्वाच्चातुर्विध्यं वासुदेवादिचतुर्मूर्तीनां प्रतिपाद्यत्वेन चातुर्विध्यमेकवर्णमारभ्य कृत्स्नशास्त्रपर्यन्तं शब्दमात्रस्य यथायोग्यमवगन्तव्यम् । तदेतदाह ॥ उक्त इति । वर्णमागमात् । आगमादिवर्णमित्यर्थः । अधुनैतत्पादाधिकरणेषु क्रमेण पूर्वपक्षसिद्धान्तयुक्तीरेकीकृत्याह ॥ आप्तेति । तत्र तावदाप्तत्वयुक्तिं पूर्वपक्षेऽव्युत्पाद्यतामेव बलीयस्त्वेन सिद्धान्ते व्युत्पादयति ॥ आप्तैरित्यादिना । जगत्कारणे विष्णौ प्रागुक्तश्रुतिसमन्वयो न युज्यते । रुद्रादीनां जगत्कारणत्वप्रतिपादकपाशुपतादिस्मृतिविरोधात् । न च पिपीलिकालिपिवद्बुद्धिपूर्वकत्वेनाप्रणीता श्रुतिः सर्वज्ञानां रुद्रादीनामाप्तानां प्रत्यक्षमूलां पाशुपतादिस्मृतिं बाधितुं शक्नोति । आप्तवाक्यस्याप्तवाक्यबाधकत्वादर्शनात् । न च वाच्यं श्रुतिस्मृत्योर्विरोधे श्रुत्या स्मृतेरेव बाधो युक्तः श्रुतिसापेक्षत्वात्स्मृतेरिति । रुद्रादिप्रत्यक्षमूलस्मृतेः श्रुतिसापेक्षत्वाभावेन बाधायोगात् । न चात्र श्रुतिस्मृत्योर्विकल्पेन व्यवस्था शङ्क्या । व्रीहियवश्रुत्योरिव वस्तुनि

विकल्पासम्भवात् । न ह्यग्निरुष्णो वाऽनुष्णो वेति भवति । विष्ण्वादिभिरतिशयेन सर्वज्ञैर्जगद्धितोपदेष्टृभिः प्रणीतपञ्चरात्रादिस्मृतिभिर्हरेरेव जगत्कारणत्वप्रतिपादिकाभिर्बाधितत्वान्न पाशुपतादिस्मृतिः श्रुतिबाधिका । न च पाशुपतपञ्चरात्रस्मृत्योस्तुल्यबलवत्त्वेन बाध्यबाधकभावो नास्तीति वाच्यम् । श्रुतिमूलत्वेन बलवत्त्वात्पञ्चरात्रस्मृतेः । न च रुद्रादिप्रत्यक्षं मूलं पाशुपतादिस्मृतेः । तत्र प्रमाणाभावात् । न चानेनैव न्यायेनाप्रामाण्यं पञ्चरात्रादिस्मृतेः । वेदमूलत्वेन वेदस्येव प्रामाण्योपपत्तेः । न हि कारीरियागानुष्ठानेऽपि वृष्टिः कस्यचित्कदाचिन्न भवतीत्येतावता कारीर्या यजेत वृष्टिकाम इति वेदवाक्यस्याप्रामाण्यम् । अपौरुषेयत्वेनाप्रामाण्यकारणाभावात् । वृष्टिस्तु कर्मकर्तृवैगुण्यात्प्रतिबन्धकर्मणो वा न भवतीति कल्प्यते । न च वाच्यं पाशुपताद्युक्तफलाभावेऽप्यधिकारवैगुण्यं कल्प्यत इति । अनाप्तोक्तत्वकल्पनेनापि फलाभावस्योपपत्तेः । न चाधिकारसाद्गुण्यफलसद्भावयोः सहभावनियमः प्रत्यक्षेणोपलभ्यते । वैदिकाधिकारस्य विशुद्धमातापितृजन्यत्वादिलक्षणस्य प्रत्यक्षेण ज्ञातुमशक्यत्वात् । तद्वैगुण्येन च कर्मणः फलव्यभिचारोऽपि ज्ञातुं न शक्यते । पाशुपताद्यागमोक्ताधिकारस्य तु शूद्रादिभिरपि लक्ष्यत्वेनापि सुलभत्वात्तद्वैगुण्यासम्भवेन कर्मणः फलव्यभिचारो न स्यात् । अतः पाशुपताद्यागमस्य विप्रलम्भादिमूलत्वमेव न युक्त्याऽऽभासमूलत्वमवगन्तुं शक्यम् । तदुक्तानुष्ठानस्य फलव्यभिचारात् । अतो जगत्कारणविष्णुप्रतिपादकश्रुतिसन्दोहबाधिता रुद्रादिस्मृतिः ॥ १ ॥ न च तद्वदप्रामाण्यं शङ्कितुं शक्यं वेदस्येत्याह ॥ नित्यत्वादिति ।

॥ १ ॥ वेदनित्यत्वं च श्रुतिसिद्धमित्याह ॥ विरूपेति । तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिमिति

श्रुतेरयमर्थः । भो विरूप नित्यया वाचा वेदेन तस्मा अभिद्यवेऽभितो द्योतमानाय वृष्णे मनोरथवर्षित्रे नूनं निश्चितं सुस्तुतिं चोदयस्व प्रेरय । गमयेति यावत् । नित्यया नित्यया स्तौमि ब्रह्म तत्परमं पदमिति श्रुतिर्नात्र नित्याऽनित्या वाच स्मृतयो याश्चान्या वाच इति पैङ्गिश्रुतिः। श्रुतिः पिपीलिकानिभेति यदुक्तं तत्राह ॥ पिपीलिकेति । यथा रात्रावुलूकेनैकेन कृतन्यग्रोधशाखोपशाखानिविष्टबहुतरकाकविनाशवन्मयैकेन बहुतरपाण्डवसैन्यं हन्तुं शक्यमित्यश्वत्थाम्नो निश्चयो भारतोक्तः समर्थश्च जात एवमाप्तप्रणीतादपि घुणादिलिखिताच्छब्दाद्यथार्थप्रतिपत्तिर्युक्ता । यस्तु तत्रानन्वितः प्रमाणविरुद्धश्चाक्षरसमूहो दृश्यते सोऽप्रमाणं भवतु। एवं वेदतन्मूलस्मृत्योरप्यविरुद्धार्थे प्रामाण्यमागमेन च विरोद्धुं प्रत्यक्षमागमान्तरं वा शक्नोति नान्य-दित्याह ॥ विरोधोऽपीति। युक्तिरिष्यते निर्णयहेतुत्वेनेति शेषः । सावकाशनिरवकाशत्वादिन्यायेन हि विरुद्धवाक्ययो-र्निर्णयो धर्मिग्राहकप्रमाणविरोधे वेदस्यान्यार्थत्वमपेक्षत इत्याह ॥ उपजीव्यविरोध इति। प्रत्यक्षादिसिद्धवस्त्वन्यथाभि-धायकश्रुतेरन्यार्थत्वं वर्णनीयम् । आगमसिद्धभगवदवतारादेरन्यथात्वग्राहकप्रत्यक्षादिकमयथार्थमवगन्तव्यम् । श्रुतेः श्रुत्य-न्तराविरुद्धतया युक्त एवार्थःस्वीकार्यो नायुक्तः । तद्यथाऽन्धो मणिमविन्ददित्यादिश्रुतेः प्रातीतिकार्थोऽयुक्तः परित्याज्यः । प्राकृतचक्षुरादिरहितस्य चिन्मयचक्षुरादिस्तर्हि तस्य हरेर्मणिदर्शनादिरूपो युक्तोऽर्थः स्वीकार्यः। युक्तिस्तु प्रत्यक्षागमयोरन्यतर-गृहीतव्याप्तिका बलीयसी। युक्तिमूलयुक्तेः सावकाशत्वात्साऽपि परम्परया प्रत्यक्षागमयोरन्यतरमूला । एवं त्रीण्येव प्रमाणानि । एषां लक्षणमाह ॥ याथार्थ्यमिति । ननु गमनादिकर्मणाऽपि ग्रामादिविषयस्य यथार्थत्वादतिव्यापकमेतल्लक्षणमित्याह ॥ अर्थ-

त्वामिति । अर्यते ज्ञायत इति व्युत्पत्त्याऽर्थशब्देनात्र ज्ञेयं विवक्षितम् । अतश्च यथार्थत्वं नाम ज्ञेयप्रतियोगित्वम् । न तद्गमनादिषु गतम् । ग्रामस्य हि गम्यप्रतियोगित्वम् । न तु ज्ञेयप्रतियोगित्वम् । अयथार्थादप्रमाणादपि व्यावृत्तं यथार्थत्वं प्रमाणस्यैव लक्षणं भवितुमर्हति । नैतल्लक्षणं शब्दादिष्वव्यापकम् । तेषामपि ज्ञानद्वारा यथार्थत्वात् । तदेतदभिप्रेत्याह ॥ ज्ञानार्थ इति । ज्ञानस्य मुख्यतो ज्ञेयविषयत्वम् । तच्च ज्ञानमन्तर्भाव्यशब्दानां भवति । अत एव तेषामनुप्रमाणत्वम् । व्याप्त्याद्यनुसन्धानसापेक्षत्वेन विलम्बार्थत्वेनार्थप्रतिपत्तिकारणत्वाच्छब्दानन्तरत्वं च हेतावयगन्तव्यम् । सम्यग्ज्ञानसाधनस्यैव प्रामाणत्वे ज्ञानस्याप्रमाण्यं स्यात् । न यथार्थत्वस्य प्रमाणलक्षणादेव । अग्निर्हिमस्य भेपजमित्यादेर्मानान्तरसिद्धानुवादस्य स घट इत्याद्यनुभूतस्मृतेरपि प्रामाण्यं न विहितमित्याह ॥ प्रामाण्यमिति । नन्वनधिगतार्थगन्तृत्वाभावात्कथं स्मृत्यादेः प्रामाण्यमित्याशङ्क्याह ॥ न परिच्छेदेति । यद्यज्ञातपरिच्छेदकं प्रमाणं तर्हि घटोऽयमिति गृहीतस्य पुनर्घटोऽयमिति ग्रहणमप्रमाणं स्यात् । इदानीं तु सर्वविशिष्टघटविषयतयोत्तरज्ञानस्य न गृहीतग्राहित्वमिति चेत् । तुल्यं स्मृत्यादावपि । तर्ह्यतीतत्वाकारविशिष्टघटविषयिणी स्मृतिर्गृहीतग्राहिणीति वक्तुं शक्यते । किञ्च कालस्याप्रत्यक्षत्वं वदद्भिर्वर्तमानसत्त्वविशिष्टवस्तुत्वं प्रत्यक्षस्य चिन्त्यम् । एवं प्रमाणस्य लक्षणमभिधायाधुना तद्विशेषरूपप्रत्यक्षलक्षणं तावदाह ॥ निर्दोषेति । अक्षोद्भवमित्यनेनानुमानादिकं व्यावर्तयति । निर्दोषमित्यनेन काममलादिदोषयुक्तमक्षं व्यावर्तयति । यदन्यत्रोभयं प्रकृतियुक्ताक्षजं कदाचित्सदोषं कदाचिन्निर्दोषम् । तच्च षड्विधम् । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमनोभेदात् । अधुनाऽनुमानस्वरूपं निर्धारयति

॥ अनुमेति । साध्येन साधनस्याविनाभावो व्याप्तिः । सैवाभिधातव्या परप्रतिपत्त्यर्थं न लिङ्गम् । तस्य दृश्यमानत्वेनाभिधानवैयर्थ्यात् । न हि पक्षेऽनुपलभ्यमानं लिङ्गं तत्र लिङ्गिनं ज्ञापयति । न हि व्याप्तिवचनस्येव लिङ्गवचनस्यापि स्मारकत्वेनोपयोगः । व्याप्तिवचनादेव साधकत्वं लिङ्गस्यावगम्यते । न हि धूमवानसावग्निमानित्युक्ते धूमवतः पक्षस्याग्निमत्त्वं न ज्ञायते । ननु विप्रतिपत्तिनिवृत्तिः प्रतिज्ञाहेतूदाहरणोपनयनिगमनाभिधानमन्तरेण व्याप्त्यैव कथमित्यत आह ॥ न पक्षेति । दृष्टान्तादिष्वपि विप्रतिपत्तौ हेत्वन्तरेण तत्साधनस्यावश्यंभावित्वात्पञ्चावयवानियमभङ्गः । पर्वतस्याग्निमत्त्वे किं मानमिति पृष्टे धूमवत्त्वमिति लिङ्गाभिधानादेव क्वचिदनुमित्युत्पत्तेश्च । उपनयनिगमनयोः प्रतिज्ञाहेतुपौनरुक्त्याच्च । एवं युक्तिस्वरूपमभिधायाधुना तद्दूषणं निरूपयति ॥ विरोध इति । न्यूनाधिक्यादिकं वचनद्वारा युक्तेर्दूषणम् । विरोधासङ्गती त्वाहत्यदूषणम् । असङ्गतिलक्षणमाह ॥ प्रतिज्ञायामिति । यथा पर्वतोऽग्निमान् वृक्षः शाखीति । अधुना विरोधं विभज्य दर्शयति ॥ विरोधोऽपीति । प्रतिज्ञार्थविरुद्धता यथाऽग्निरनुष्ण इति । लिङ्गराहित्यं यथा नित्यः शब्दश्चाक्षुषत्वादित्यादि । अव्याप्तिर्यथा नित्यः शब्दः कृतकत्वाच्छब्दत्वात्प्रमेयत्वादिति । न्यूनं यथा पर्वतो धूमत्वादिति । अधिकं यथा वृक्षादिमान्पर्वतोऽग्निमानिति । एतद्द्वयं वचनस्यैव दूषणं न त्वर्थस्य, अधुनोपाधेर्विरोधान्तर्भूतिं निरूपयति ॥ साध्येति । परस्परं व्याप्तिशून्यौ यौ तयोर्मध्ये साध्यव्यापकादुपाधेर्वैलोम्यम् । साधनस्य विरोध इति यावत् । साध्यं व्यापकं यस्येति साध्यव्यापकः साध्यस्य व्यापक इति वा । उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः । यथा स श्यामो मैत्रेयी

तनयत्वात्सम्मतवदित्यस्य शाकाद्याहारपरिणतिपूर्वकत्वं प्रयोजकमिति । तदुक्तम् । एकसाध्याविनाभावे मिथः सम्बन्ध-
शून्ययोः । साध्याभावाविनाभावी स उपाधिर्यदत्यय इति । समविरोधश्चायमुपाधिः । प्रतिज्ञातार्थस्याचार्याभिप्रेतो व्यापका-
नुपलब्धिलिंगकानुमानत्वे प्रतिपक्षरूपत्वात्प्रतिपक्षो ह्यनुमानस्य समविरोधः । यथा वायुर्बाह्येन्द्रियग्राह्यः प्रत्यक्षस्पर्शत्वादि-
त्यस्य प्रतिसाधनं वायुर्बाह्येन्द्रियप्रत्यक्षो न भवति । अरूपवद्द्रव्यत्वात्सम्मतवदिति । प्रबलानुमानस्य दुर्बलानुमानविरोधोऽ
किञ्चित्कर इत्याह ॥ दुर्बलेनेति । यथा पर्वतोऽग्निमान्धूमवत्त्वान्महानसवदित्यस्य पर्वतोऽग्निमान्न भवति । पक्षसपक्षयो-
रन्यतरत्वाद्ध्रदवदिति विरोधः । स्ववाक्यविरोधोऽपि प्रतिज्ञाविरोधेऽन्तर्भूतः । तद्यथा यावज्जीवमहं मौनीति । शब्दो
नित्यः कृतकत्वादित्युक्तेऽस्त्वेवमिति संवादः । तूष्णींभावोऽनुक्तिः । विरोधासङ्गतिन्यूनाधिक्यसंवादानुक्तयः पराजयस्था-
नानि । एवं कथोपयुक्तमनुमानतद्दूषणमभिधायाधुना कथां विभागलक्षणाभ्यां निरूपयति ॥ वाद इति । वादिनोस्तत्त्व-
निर्णयार्थैव कथा वादः । लाभाद्यर्थं सभासभापत्यनेकाङ्गो जल्पः । तत्र वादे शिष्यादिरपि गुर्वादिभिः सहाधिकृतस्तत्त्व-
निर्णयार्थी । जल्पवितण्डाधिकारस्तु सम्भावितसमानविद्ययोरेव । ययोरेव समं वित्तं ययोरेव समं श्रुतम् । तयोर्विवाहो
वादश्च नोत्तमाधमयोः क्वचिदिति वचनात् । वादिप्रतिवादिनोर्विद्ययोरुच्चनीचत्वनिश्चयौ तु जयपराजयशब्दवाच्यौ वादेनैव
परीक्षितुं शक्यौ । न जल्पादिना । तत्र हि तत्त्वानिर्णयानुपयुक्तपुनरुक्त्यादिमात्रेण पराजय आपद्यते । मुख्यतस्तु
प्रमाणतर्कैस्तत्त्वं निर्णेतुमसमर्थस्य पराजयः समर्थस्य हि जयः । अतो विवदमानयोर्विद्यापरीक्षार्थः । विप्रतिपन्ने वस्तुनि

सभ्यैः प्रथमतो वादकथा देया। तथैव जयपराजयावगतौ सत्यामलं जल्पवितण्डाभ्याम्। बहुविद्यत्वेन प्रख्यातस्याल्पविद्येन सह वादोऽपि न देयो विद्यापरीक्षणाय। ननु विजिगीषुभिरपि यदा वाद एव कार्यस्तदा कीदृशः कार्य इत्यपेक्षित आह ॥ सतेति। प्राश्निकोऽनुवादकः। ननु जयलाभादेर्वादतः सिद्धौ किं जल्पादिनेत्यत आह ॥ तत्त्वेति। जल्पादेरवसरः कदेत्यपेक्षित आह ॥ विनेति। विद्यायाः पुराणन्यायमीमांसादिरूपाया वादिनोरिति शेषः। यदि शक्यं परीक्षणं सभ्यैरिति शेषः। एतादृशस्य सता वादिपूर्वस्यैवमुक्तलक्षणे वादे वादिनाऽर्थः कथं साधनीय इत्यपेक्षायामाह ॥ प्रतिज्ञेति। यथा कत्येव देवा याज्ञवल्क्येति श्रुत्या शाकल्येन विजिगीषुकथायां पृष्टो याज्ञवल्क्यस्त्रिंशदिति प्रतिज्ञामेव चकार। ओमिति होवाचेति शाकल्यश्चाभ्युपगतवान्। तथा वादिना प्रतिज्ञातार्थं प्रतिवादी चेदङ्गीकरोति तदा न हेतुरभिधेयः। नाङ्गीकरोति चेदभिधेयः। अधुना सभादीनां लक्षणमाह ॥ सभासभापतिश्चेति। यदा कथञ्चिद्वादिना चोक्तं सूक्ष्मत्वमेयं सम्यगिति वाऽसम्यगिति वा ज्ञातुं प्राश्निका न शक्नुवन्ति तदा सभ्या एव निर्णायकाः स्युः। यदि तेऽपि तथा देशान्तरस्थाः सर्वे सिद्धान्तवेदिनो निर्णायकाः स्युः। अधुना वादजल्पौ वितण्डां च परस्परं विवेचयति ॥ उभाभ्यामित्यादिना। वादजल्पौ सतामेव परस्परं योग्यौ। तत्र वादिना स्वपक्षस्थापनं कर्तव्यम्। प्रतिपक्षदूषणं च। प्रतिवादिनाऽपि स्वपक्षदूषणोद्धारणं साधनं च परपक्षदूषणं च कर्तव्यम्। वादिनाऽपि स्वपक्षदूषणोद्धारणं कर्तव्यम्। नैतादृशी वितण्डा। तस्याः स्वपक्षसाधनरहितपरपक्षदूषणमात्ररूपत्वात्। एषा तु वैतण्डिका नाम सद्भिः सह योग्या। तत्र ह्यसद्वाद्युक्तदूषणस्य सद्वादिभिर्दूष्यमाणत्वात्।

अवैदिकैश्च स्वसिद्धान्तमनुसृत्यानुमानमेवोपन्यस्यते । वैदिकैस्तु वैदिकान्प्रत्यागम एव प्रयोक्तव्यः स्वसिद्धान्तस्थापनाय । तत्र प्रतिवादिभिर्वाद्युपन्यस्तागमस्य प्रत्यक्षाविरोधमागमान्तराविरोधं चोद्भाव्यान्यार्थत्वं दर्शनीयम् । वाद्युक्तार्थे उपक्रमादि-तात्पर्यलिङ्गैर्विरोधश्च दर्शयितव्यः । स्वार्थस्य तदानुकूल्यं श्रुतिलिङ्गादिनिर्णायकप्रमाणानुकूल्यं च दर्शनीयम् । एवं श्रुत्याधिकृता वादरीतिः । तत्र श्रुतिसहायत्वेन प्रयुज्यमानानुमानस्य पञ्चावयवादिनियमानुक्तौ न न्यूनतादिदूषणमुद्भाव-नीयम् । तन्नियमे प्रमाणाभावादित्याह ॥ त्रिपञ्चेति । प्रतिज्ञाहेतुदृष्टान्तास्त्रीनवयवाननुमानस्य केचिद्वदन्ति । व्याप्तिः पक्षधर्मता चेति द्वावयवौ केचित् । तदेवं प्रष्टव्यम् । अनुमा त्र्यवयवेत्यादिनियमे किं प्रामाणमिति । न चात्र प्रत्यक्षादिमा-नान्तरं वक्तुं शक्यते । न चानुमानत्र्यवयवत्वे त्र्यवयवमनुमानं मानमिति वक्तुं शक्यम् । तस्य प्रतिवाद्यसिद्धत्वेनासा-धकत्वात् । यदि तत्रोभयसिद्धत्वेन व्याप्तिरेव प्रमाणमुच्यते तर्हि सैवानुमानमस्तु । किमन्येनावयवेन । एवं सामान्यविशेष-लक्षणाभ्यां प्रत्यक्षादिप्रमाणत्रयं परीक्ष्याधुनाऽनुभूतिः प्रमाणमिति परोक्तं प्रमाणलक्षणं विघटयति ॥ अनुभूतिरिति । न चानुभूतिरेव प्रमाणम् । तथा सति स्मृत्यादेरप्रामाण्यप्रसङ्गात् । न च स्मृतिरप्रमाणम् । बाधकाभावात् । इतोऽपि स्मृतिः प्रमाणमित्याह ॥ पूर्वेति । न च स्मृतिलक्षणकार्येण वस्तुविषयानुभवः पूर्वोऽनुमीयत इति वाच्यम् । व्याप्त्याद्यनुसन्धानाभा-वात् । अन्यथा घटज्ञानेन कार्येण कारणतया घटोऽप्यनुमेयः स्यात् । तथा च प्रत्यक्षज्ञानाभावप्रसङ्गः । मानसप्रत्यक्षमेव स्मरणमप्यर्थापत्त्यादिकमनुमानान्तर्गतम् । तत्रार्थस्तु कश्चित्प्रत्यक्षोऽपि । उक्तार्थमुपसंहरति ॥ एवमिति । ॥ २ ॥ एवं

न विलक्षणत्वादस्य तथात्वं च शब्दादित्यधिकरणं व्युत्पाद्याधुना अभिमानिव्यपदेशस्तु विशेषानुगति-भ्यामित्यधिकरणार्थं व्युत्पादयति ॥ तथाऽपीत्यादिना । मृदब्रवीदापोऽब्रुवन् ता आप ऐक्षन्तेत्यादिवेदैकदेशस्य यन्मृदादिकं तत्र ब्रवीतीति प्रत्यक्षसिद्धव्याप्तिविरुद्धत्वेनाप्रामाण्यात् । कृत्स्नवेदस्य श्मालिपुलकन्यायेनाप्रामाण्यं स्यादिति चेत् । मैवम् । तत्र मृदादिशब्दस्य मृदादिदेवताविषयत्वाङ्गीकारेण श्रुत्यनुमानविरोधपरिहारात् । मृदादिशब्दस्याविद्वद्रूढ्या मृत्तिकावाचित्वेऽपि विद्वद्रूढ्या मृत्तिकादिदेवतावाचित्वं युक्तमेव । अत एव मृदादिषु व्याप्यतद्रूपेणापि वक्तृत्वादिसामर्थ्यं देवतादिवाचित्वं युक्तमेव । अत एव मृदादिषु व्याप्यताऽवगम्यते । न चैवंविधाया देवताया अनुपलम्भेन बाधः । योगिप्र-त्यक्षेणोपलम्भात् । अतीन्द्रियास्वपि देवतासु मृदबादिशब्दव्युत्पत्तिः पादहस्तत्वादितत्तदुपाधिना घटते । यथा सास्नादिना गवादिशब्दस्य गवादिषु शास्त्रीयत्वाद्वरुणादिष्वेव बलवत्त्वमादिशब्दानां न तदुदकादिषु मुख्यतः । एवं श्रुत्युक्तौ विरोधो यत्र तत्र व्यवस्थैवमेव कार्या । ननु श्रुत्युक्त्योर्विरोधेष्वसतः कारणत्वं निराकृत्य श्रुतिसङ्कोचः कस्माद्दुर्बलत्वाद्युक्तेर्बाधः किं न स्यादिति चेत् । मैवम् । श्रुतिमुख्यार्थसम्भवे वृथादृढयुक्तिबाधस्यायुक्तत्वात् ॥ ३ ॥ एवं युक्तिविरोधं परिहृत्येदानीं युक्तसमन्वयस्य विरोधान्तरमुद्भाव्य परिहरति ॥ अल्पेत्यादिना ॥ असदिति चेन्न प्रतिषेधमात्रत्वात् । देवानां पूर्वे युगेऽसतः सदजायत । तदसदेव सन्मनोऽकुरुतेति श्रुतिसहितबहुयुक्तिविरोधाद्ब्रह्म न जगत्कारणं किन्त्वसतः कारणाज्जगदु त्पत्तिरिति चेत् । मैवम् । अतिबहुतरयुक्तिविरोधेन पूर्वपक्षयुक्तीनां बाधितत्वात् । सदेव सौम्येदमग्र आसीदित्यादिबहुश्रुति-

विरोधेनासत्कारणत्ववचनस्य नासज्जगत्कारणत्वमित्यर्थः । किन्तु न विद्यते सदुत्तमं यस्मात्तदसद्ब्रह्मैव जगत्कारणमित्यर्थः । न चायं किञ्चिच्छ्रुतिसहितबहुयुक्तिविरोधपरिहारश्चतुर्थे पादे सङ्गत इति वाच्यम् । तत्र श्रुतिबहुलयुक्तिविरोधस्य परिच्छिद्य-माणत्वात् । अतोऽसादिति सूत्रव्याख्यानमुखेन पूर्वपक्षयुक्तिमुपन्यस्य तद्बाधकत्वेन सिद्धान्तयुक्तीर्दर्शयति ॥ असत्कार्य-मिति । विमतं कारणं प्रलये कालेऽसद्भवेत् । भावत्वाद्यदित्थं तत्तथा यथा कार्यमित्यतोऽसतःकारणाज्जगदुत्पत्तिरिति चेत् । मैवम् । अभावैकस्वरूपस्य पदार्थस्य कर्तृत्वप्रतिज्ञायाः स्वव्याहतत्वात् । बुद्धिपूर्वप्रवृत्तिर्हि कर्तृत्वम् । न ह्यसतो बुद्ध्यादि सम्भवति । ननु निषेधत्वादित्येतावताऽलं किमर्थं सूत्रे प्रतिषेधमात्रत्वादिति पदं प्रतिक्षिप्तमित्याशङ्क्याह ॥ प्रतिषेधेति । प्रतिषेधत्वं नामाभावत्वम् । तच्चेदमिदं न भवतीति सतोऽपि वस्तुनोऽन्याभाववद्धर्मकत्वेन प्रतीयमानत्वादस्त्येव धर्मधर्म्यैक्या-भ्युपगमात् । अतः प्रतिषेधत्वहेतुनाऽसतोऽपि जगत्कारणत्वनिराकरणं मा भूदिति प्रतिषेधमात्रत्वादित्युक्तम् । न च स्वरूपेणासतोऽपि प्रमेयत्वपदार्थत्वादिवज्जगत्कारणत्वमपि भवत्विति वाच्यम् । सर्वधर्मरहितत्वस्यासतोऽसद्वादिनाऽभ्युपगमात् । सिद्धान्तिनाऽद्यापि प्रमेयत्वादिकमभ्युपगतमसतस्तथाऽपि जडत्वेन बुद्ध्यादिराहित्यान्न कर्तृत्वमुपपद्यते । न चाभावस्य प्रमेयत्वादिभावरूपधर्मवत्त्वं नास्तीति वाच्यम् । अभावः प्रमेयमिति विशिष्टप्रतीतेः । इदमेव हि धर्मित्वं यद्धर्मान्तरेण विशेष्यमाणत्वम् । यथा शुक्लो घट इति । ननु यदि भावस्याभावरूपो धर्मोऽस्त्यभावस्यापि भावरूपो धर्मस्तर्हि भावाभाव-व्यवस्था न स्यादित्याशङ्क्याह ॥ प्रथमेति । प्रथमाक्षसन्निपातानन्तरं नास्तीति प्रतीयमानोऽभावः । भावत्वेन

प्रतीतस्याप्यन्यनिषेधधर्मत्वेनाभावत्वेन प्रतीतस्यापि प्रमेयत्वादिधर्मवत्त्वेन च प्रतीतिस्त्वनन्तरं जायते । यदुक्तमनुमानमसतो जगत्कारणत्वे तस्य प्रतिपक्षानुमानमाह ॥ सर्वेति । जगन्नाशः केनचित्पुरुषेण कृतो नाशत्वात् बहुपुरुषनाशवत् । यो जगन्नाशे पुरुषः स तत्कर्तेश्वर इति सिद्ध्यति । न च कुत्रचिद्युगे निःशेषपुरुषनाशो न कस्यापि पुरुषस्यावशेषो नास्तीत्य-शेषनृनाशः केनचिद्दृष्ट इति वक्तुं शक्यते । नाशद्रष्टुरनाशादेव । अतो नाशत्वहेतोर्न विपक्षे गतिः । इतोऽपि कारणादशेषजगन्नाशो न युज्यते । तदेवोपपादयति ॥ अनादित्वमिति । न च विचित्रजगत्सृष्टिर्वैचित्र्यादृष्टमन्तरेण घटते । अदृष्टवैचित्र्यं च न पूर्वविचित्रादृष्टमन्तरेण सम्भवति । न हि सम्भवः । अतोऽदृष्टपरम्पराश्रयस्यानादेर्जीवस्य प्रलयेऽप्यवस्था-नमङ्गीकर्तव्यम् । यदि जगदुत्पत्तिकारणस्यादृष्टस्य प्रत्यक्षेणादर्शनादभावः प्रलयोऽप्यप्रामाणिकत्वान्न स्यात् । स यदित्युक्त्या-गमेन सिद्धिस्तर्हि तथैवादृष्टमप्यभ्युपगम्यतामविशेषात् । अपि च जगदुत्पत्तिनाशौ केनचित्कृतौ उत्पत्तिनाशत्वात्सम्मत-वदित्यनुमानाज्जगदीश्वरादेव प्रणीयते नासतः । ननु जगत्कर्तर्यनुमानप्रमाणं कथमुच्यते । प्रत्यनुमानादिपराहतत्वादित्यत आह ॥ आगमेति । न च वाच्यं जगत्सकर्तृ मानत्वादसत्कर्तृत्वानुमानवदिति । स्वव्याहतत्वात् । अस्याप्यनुमानत्वात् । अत्र यत्परैरुक्तम् । न विलक्षणत्वादित्यादिना कृतमशिष्टसम्मतं साङ्ख्यनिराकरणम् । एतेन शिष्टापरिग्रहा अपि व्याख्याता इति सूत्रेण वैशेषिकादिषु शिष्टापरिगृहीतेष्वतिदिश्यत इति तद्दूषयति ॥ न चेति । न हि निरीश्वरात्साङ्ख्याद्वैशेषि-कादिष्वतिशयेन शिष्टापरिगृहीतत्वं युक्तमतः सदैवा हि लोके सज्जनसम्मता भवन्ति न तु निर्दैवाः ॥ ५ ॥ नन्वेवं सत्येतेनेति

सूत्रस्य कोऽर्थ इत्यपेक्षित इत्याह ॥ अत इत्यादिना । पूर्वं विश्वस्यासत्त्ववत्कारणत्ववादे निराकृते सत्युर्वरितार्कतृकत्वाचे-तनकर्तृकत्वजीवकर्तृकत्ववादाः । अकस्माद्वीदमाविरासीत् । प्रधानादिदमुत्पन्नम् । जीवाद्भवन्ति भूतानीत्यादिश्रुतिप्राप्ता एतेन गताधिकरणन्यायेन व्याख्याताः प्रत्याख्याता इत्यर्थः । ननु गताधिकरणेऽसतो जगदुत्पत्तिर्निराकृतैवात्र पुनः किमित्याशङ्क्य निराक्रियत इत्याशङ्कित इत्याह ॥ तन्मन इति । इदं वा अग्रे नैव किञ्चन आसीत्तदसदेव सन्मनोऽकुरुत स्यादित्यादिनाऽसतो मनो-पूर्वकजगत्सृष्टिः प्राप्ता निरस्ताऽसतो बुद्ध्यसम्भवहेतुना पूर्वत्र । अत्र त्वकस्माद्वीदमिति मनोरहितादसतो विश्वजननमाशङ्क्य निषिध्यत इत्यपुनरुक्तम् । अत एवेदमतिदेशाधिकरणम् । वाक्यान्तरादिना पूर्वपक्षे सति पूर्वोक्तत्यागमबाहुल्यन्यायेन परिहारात् । युक्तिबाहुल्यं दर्शयति ॥ क्वाचिदिति । जगज्जीवाकृतं प्रधानाकृतं महदकृतं च वस्तुत्वाज्जीववत् । प्रधानवदसद्वादित्याद्यनुमानमूहनीयम् । श्रुत्यनुसारित्वादस्य नातिप्रसङ्गादिदूषणमुद्वहन्ति । प्रमाणाविरुद्धस्यानुमानस्यातिप्र-सङ्गादिदूषणोद्भावनेऽनुमानमात्रभङ्गप्रसङ्गश्च । अकस्माद्वीदमित्यादिश्रुतिस्तु विष्णुविषयत्वेनोपपन्नं । पूर्वाध्याये निखिलश्रुतीनां विष्णुपरत्वेऽभिहितेऽपि तत्रैव वाक्यान्वयादिनाऽर्थान्तरस्याप्यमुख्यस्याङ्गीकृतत्वाच्छ्रुतिभिर्जगतो जीवादिकर्तृकत्वमाशङ्क्य परिहृतमित्यदोषः । अत्र कश्चिदाह । ननु जगत्कर्तृत्वादिकं वास्तवं न सम्भवतीश्वरस्यासर्वज्ञेनासर्वकर्त्रा मुक्तौ जीवेनैकी-भावश्रवणात् । कर्माणि विज्ञानमयश्चात्मा परेऽव्यये सर्व एकीभवन्तीति श्रुतावित्यत आह ॥ नान्यादिति । क्षीर-नीरयोरिव भगवता युक्तानामेकीभावव्यपदेशः संश्लेषविषयः । न हि पूर्वमविद्यमान एकीभावः पदार्थयोः पश्चाद्भवति ।

क्षीरस्यापि नीरेण सम्मिश्रीभाव एव । परिमाणाधिक्यदर्शनात् भेद एव युक्तः । एतदेवोक्तम् ॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदिति । अस्य सूत्रस्य परेण यदन्यथाव्याख्यानं कृतं तदनूद्य दूषयति ॥ भोक्त्रेति । यदि भोक्तृभोग्ययोर्ब्रह्माभेदस्तर्हि भोक्तृभोग्यविभागो न स्यात् । भोग्यस्य जडस्य भोक्तृत्वापत्तेरित्यर्थः पूर्वपक्षो यदि सूत्राभिमतस्तर्हि भोक्तृत्वापत्तेरिति सूत्रपाठःस्यात् । न तु भोक्त्रापत्तेरिति ॥ ५ ॥ अधुना तदनन्यत्वमारम्भणशब्दादिभ्य इत्यस्याधिकारणस्य परोक्तार्थं विघटयति ॥ कथमिति । न च ब्रह्मानन्यत्वमत्र प्रतिपादयितुं शक्यते । जगतो ब्रह्मविकारत्वस्य प्रतिपादितत्वात् । अतो जगदुत्पत्तौ ब्रह्मणोऽन्यत्स्वतन्त्रं कारणं नास्तीति निषिध्यते ॥ तदनन्यत्वमिति । तथा हि श्रुतिः । किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीदिति । आरभ्यतेऽनेनेत्यारम्भणं कारणं न किमपि साधनं कथमप्यासीदित्यर्थः । यदेतत्प्रधानादिसाधनजातमभ्युपगतं तस्य सत्तादिकमपि पराधीनमिति तत्र प्रमाणमाह ॥ द्रव्यमिति । द्रव्यं प्रधानादि तस्य परिणामादिति भावः । अतःकुलालादेरिव स्वेनापादितशक्त्यादिमत्साधनापेक्षासाधनमीश्वरस्य श्रुतिविरुद्धं न कर्तृत्वाविशेषात्कुलालादेरिव दण्डादिसापेक्षत्ववत्साधनमीश्वरस्यानादेरापादयितुं शक्यते । न च नासदासीन्नोऽसदासीत्तदानीं नासीद्रजो नो व्योमापरो यदिति श्रुत्या प्रलयदशायां प्रकृत्यादिसाधनजातस्यासत्त्वमेवोच्यत इति वाच्यम् । तस्यां ह्यसदादिशब्दवाच्याव्यक्तादिवस्तुनोऽव्यक्तत्वपरतन्त्रत्वाविकृतरूपनाशादिविषयत्वात् । लोकेऽपि कार्याक्षमे परतन्त्रे वस्तुन्यसन्नेवेति प्रयोगात्तदानीं सदसतोर्युगपन्निषेधस्य व्याहतत्वात्सदसच्छब्दयोरत्राव्यक्तव्यक्तपरत्वमेव

युक्तम्। तम आसीत्तमसा गूळ्हमग्रे प्रकेतं सलीलं सर्वमा इदमिति वाक्यशेषे जडप्रकृत्यादिसद्भावावगमाच्च। गूढमाच्छादितामि-त्यर्थः। पृथिव्यादिकार्यविलयश्च प्रकृतिविशेष एव युक्तो यथा घटादिलयः। अपि च। यदि नासदासीदित्यादिना ब्रह्मव्यतिरिक्त-वस्तुस्वरूपमेव निषिद्धं तर्ह्यानीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्च नासेति वाक्यशेषे भगवदन्यानुवादेन परत्वनिषेधोऽन-र्थकः स्यात्। अन्यन्नासेत्येतावदेव स्यात्। एतदेवोक्तम्॥ तद्वशस्येति। कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य हरेः प्रकृतिमुपादानीकृत्य कालकर्मादिकं निमित्तीकृत्यैव जगदुत्पादनं स्वेच्छानियमकृतमित्याह॥ शक्तोऽपीति। यस्मादत्यन्तभिन्नं कार्यमुत्पद्यते तन्निमित्तकारणम्। यस्माद्भिन्नाभिन्नं कार्यमुत्पद्यते तदुपादानकारणम्। कारणरूपेण सत्कार्यरूपेण प्रागसिद्धं घटादिकं जायते। न ह्यन्ततो भिन्नस्य कार्यस्योत्पत्तिर्घटते। न चाभिव्यक्तिरिति वाच्यम्। तस्यामपि पूर्वाविद्यमानायां पश्चादभि-व्यक्तिः साऽपि तथेत्यनवस्थाप्रसङ्गात्। यद्यभिव्यक्तिः पूर्वमसती जायते तर्हि तथैव घटादिकार्यं जायत इत्यभ्युपगम्यता-मविशेषात्। एवं कार्यस्य नाशोऽनभिव्यक्तिश्चेत्तस्या अपि पूर्वं विद्यमानायाः पश्चादभिव्यक्तिः सापि तथेत्यनवस्थाप्रसङ्गः। यद्यविद्यमानैवानभिव्यक्तिर्मुद्गरादिना घटस्य जायत इत्युच्यते तर्ह्यसत्कार्यप्रसङ्गः। यदि कारणात्कार्यमत्यन्तं भिन्नं तर्हि मृद्धट इत्यभेदप्रतीतिर्न स्यात्। यदि पूर्वमत्यन्तमसन्नेव घटो जायत इति प्रयोगस्तर्हि न स्यादत्यन्तासतो जनिक्रिया कर्तृत्वाभावात्। तस्मात्सदसत्कार्यवाद एव श्रेयान्। तदेतदाह॥ नित्यभेद इति। उक्तमेवार्थं श्रुत्या द्रढयति ॥ ७ ॥
॥ शक्तोऽपीति ॥ ६ ॥ अतो महदादि कार्यस्योपादानकारणेन प्रधानेन भेदाभेदौ। स्वतन्त्रकारणाद्भगवतो भेद इति

सिद्धम्। ननु जीवानामेव कर्मद्वारा कर्तृत्वोपपत्तौ किं भगवतेत्यत आह॥ अनंशस्येति। ईश्वरानिरपेक्षेण जीवेन कर्मण एवानिष्पत्तेः सुतरां तद्वारा जगतो निष्पत्तिः। तथा हि। यदि कर्म कुर्वन्तं जीवं कारयन्हरिर्महदल्पकार्यापेक्षया जीवस्य स्वरूपभूतां शक्तिं विभज्य नोद्यमेत्तर्ह्यल्पकार्यमपि स्वशक्त्या कुर्यात्। शक्त्यैकदेशेन करोति चेज्जीवः सांशः स्यात्। तथा सत्यथ यः स जीवः स नित्यो निरवयव इत्यादिश्रुतिविरोधः स्यात्। औपाधिकांशभेदस्तु निरवयवस्य न सम्भवत्येव। तत्रांशेनोपाधिना सम्बन्धायोगात्। कार्त्स्न्येन सम्बद्ध्यमान उपाधिर्नांशभेदकः। न चाविद्यकत्वेनांशभेदो दुर्घटो जीवस्येति कल्पनीयम्। अप्रमाणकत्वात्। यद्धि युक्त्या विरुद्ध्येत तदीशकृतमेव हीति गत्यन्तरवचनाच्च। एतदेवोक्तम्। कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति सूत्रेण। ननु सर्वथानजीवो निरवयवस्तत्कथं तस्य निरवयत्वशब्द इत्यत आह ॥ अंशिन् इति ॥ ७ ॥ यदेतच्चिद्रूपांशबाहुल्यं सौभर्यादिषु स्वगतभेदरहितं दृश्यते तदपीशायत्तत्वम्। यदि तत्र स्वगत-भेदव्याघातकत्वेनांशबाहुल्यं हरिर्नियमयेत्तर्हि पटांशभूततन्तूनामिव परस्परं भेदःस्याज्जीवांशानाम्। ननूक्तविरोधो भगवत्यपि किं न स्यादित्यत आह ॥ तस्येति। विचित्रशक्तिः पुरुषः पुराण इत्याद्यागमसिद्धाचिन्त्यशक्तिके हरौ न किञ्चिदसम्भावितमित्यभिप्रेत्य सूत्रकृदप्याह ॥ आत्मनि चैवं विचित्राश्च हीति। नन्वचिन्त्यशक्तित्वादेवाप्रच्युतस्वरू-पस्य ब्रह्मणो जगदाकारेण परिणामोऽपि स्यादिति चेत्। मैवम्। श्रुतिसिद्धसर्वोत्तमत्वविरोधात्। न हि सर्वात्मकस्य सर्वोत्तमत्वं सम्भवति। हरेः सर्वोत्कृष्टत्वे यो विरोधः स ह्यस्मिन्नध्याये निरसनीयः। जगत्स्रष्टृत्वेन हरेरुत्तमत्वासिद्ध्यर्थं

ये जगत्सृष्ट्यादिषु वाक्यानां परस्पराविरोधाश्चातः प्रतिपाद्यन्ते । आध्यायान्तरेष्वपि विरोधा एव निरस्यन्ते तत्र तत्र प्राप्तास्तदेतदाह ॥ विरोध इति ॥ ८ ॥ ननु सर्वोपेताच तद्दर्शनादित्यत्र सर्वानुपपत्तिपरिहाराय सर्वशक्तिमत्त्वमभिहितं हरेः । अनेनैव तस्य लौकिककर्तृत्ववच्चक्षुरादिकरणरहितस्यापि जगदुत्पादनादनुपपत्तिरपि परिहृता । अतो विकरणत्वान्नेति चेत्तदुक्तमिति सूत्रं पुनरुक्तमिति चेन्मैवम् । अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः इत्यादिप्रमाण-विरोधश्च स्यात् । अतः प्राकृतपाण्यादिभी रहितस्य चिद्रूपपाण्यादिमतो हरेरत्र विवक्षितत्वात्साधनोपादानदर्शनादिकं युक्तमेव । अन्यथाऽपाणिपादजवनादिपदानां परस्परविरोधः स्यात् । अतः सामान्येन परिहृतो विरोधो विशेषेण परिह्रियत इत्यदोषः । पुनरुक्तिपरिहारश्च सर्वत्र प्रमेयैक्ये प्रमाणभेदात् । प्रमाणैक्ये प्रमेयविशेषव्युत्पादनादवगन्तव्यः । तदेतदाह ॥ मानेति । ननु प्रयोजनमनुद्दिश्य न मन्दोऽपि क्वचित्करोतीति तत्कथं पूर्णकामस्य विष्णोः प्रयोजनमनुद्दिश्य जगत्सृष्टौ प्रवृत्तिरित्यत आह ॥ सदेति । यथाऽग्निः स्वभावादेव काष्ठं दहत्येवं हरिरपि स्रष्टृत्वस्वभावादेव जगत्सृजति । ननु प्रयो-जनमनुद्दिश्य बुद्धिमत्प्रवृत्तिर्नास्तीति वाच्यम् । व्याख्यानादौ बुद्धिमतोऽपि प्रयोजनरहितस्खलनादिव्यापारदर्शनात् । आनन्दोद्रेकादेव मत्तस्य नृत्तगानादिदर्शनाच्च । उक्तार्थे प्रमाणमाह ॥ देवस्येति । भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे । देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेति पूर्णकामस्य हरेः स्वप्रयोजनेच्छैव निषिध्यते । परप्रयोजनेच्छया जगत्स्रष्टृ-त्वात्सूत्रकृदप्येतदेवाह ॥ न प्रयोजनवत्त्वेनेति । ननु का स्पृहा न काऽपीतीच्छामात्रनिषेधः किं न स्यादित्यत आह ॥ इच्छेति ।

यदि तत्रेच्छामात्रं निषिद्धं तर्हीच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिता इत्यधस्तनवाक्ये हरीच्छायत्तत्वं जगत्स्रष्टृत्वं वदतां सुनिश्चयवत्त्वेन प्रशंसनमयुक्तं स्यात् । सोऽकामयत । कामस्तदग्रे समवर्तताधीरित्यादिविरोधश्च स्यात् । हरिरिच्छावांश्चेतनत्वाद्यज्ञदत्तवदिति युक्तिविरोधश्च स्यात् । महातात्पर्ययुक्तिविरोधश्च स्यात् । कथमिति चेत् । उच्यते । श्रुतिभिर्हि मोक्षं तत्साधनं च बोधनीयम् । मोक्षसाधनं च हरिप्रसाद एव प्रसिद्धः । एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्यो उन्निनीषत इति श्रुतावूर्ध्वगतेर्हरीच्छाधीनत्वश्रवणात् । इतोऽपि संसारमोक्षस्य हरीच्छानिमित्तकत्वं लोकदृष्ट्यनुसारात् । लोके निगडमोक्षस्य राजप्रसादनिमित्तकत्वदर्शनात् । यदि हरीच्छा न स्यात्तर्ह्यतिबहुकालमुपासितोऽपि न मोक्षं दातुमिच्छतीति तदुपास्त्यादिविधायकवेदस्याफलत्वेनाप्रामाण्यं स्यात् । ननु यथार्थं प्रमाणं न फलवदर्थबोधकं तत् । कथं फलवदर्थबोधकत्वाभावे वेदस्याप्रामाण्यमापाद्यत इत्याशङ्क्याह ॥ याथार्थ्यमिति । सत्यं यथार्थबोधकत्वं मानत्वमिति तदेव न निर्धार्यते वाक्यस्य यावदिष्टसाधनबोधकत्वं नावगतम् । इष्टसाधन एव शब्दव्युत्पत्तेः । तत्रापि यदतिशायितेष्टसाधनं बोधयति वाक्यं तदतिशयेन प्रमाणं भवितुमर्हति । सम्पूर्णं प्रयोजनं यस्मिन्वाक्ये तत्सम्पूर्णप्रयोजनमित्यर्थः ॥ ९ ॥ अधुना वैषम्यनैर्घृण्ये न सापेक्षत्वादित्यधिकरणतात्पर्यमाह ॥ वैषम्यमिति । अधर्मकर्तारं प्रतीष्टदातृत्वं वैषम्यम् । धर्मकर्तारं प्रत्यनिष्टदातृत्वं नैर्घृण्यं वेदाप्रामाण्यकारि हरेर्नाङ्गीकार्यम् । तद्विपरीतं तु वैषम्यादिनामकमेव न भवतीत्यङ्गीकार्यमेव । न हि दण्ड्यान् दण्डयन्नदण्ड्याननुगृह्णन् राजा निर्घृणोऽपि विषम इत्युच्यते लोके विवेकिभिः ॥ १० ॥ अधुना सर्वशङ्कोद्धारात्मकं सर्वधर्मो-

पपत्तेरिति सूत्रं व्याचष्टे ॥ यदधीनाइति । गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपीत्यादिवाक्यैःस्वतन्त्रत्वो-पपत्त्या च हरेर्निर्दोषाशेषगुणवत्त्वं सिद्धम् ॥ ११ ॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमदनुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां द्वितीयाध्यायस्य प्रथमः पादः ॥ २—१ ॥ ॥

॥ हरिः ॐ ॥ जगत्कारणे विष्णावुक्तश्रुतिसमन्वयस्य परोद्भावितस्मृतियुक्तिश्रुत्युपसर्जनयुक्तिबहुयुक्तिभेदेन चतुर्विधाविरोधं पूर्वस्मिन्पादे क्रमेण निरस्यास्मिन्पादे परसमन्वयेषु दूषणान्युद्भाव्यन्ते । विपक्षदूषणस्य स्वपक्षदार्ढ्यकारणत्वात् । यद्यपि न निर्मलमतेस्तथाऽपि मन्दमतेराशङ्का स्यादेव तद्बाधाग्रहाद्वर्तमानमतविप्रतिपत्त्या । मन्दाशङ्काप्रकारानाह ॥ अनादीति । यदि परमतान्यप्रमाणमूलानि तर्हि कथमनादितोऽनुत्सन्नानि वर्तन्ते । न ह्युन्मत्तवाक्यमपि मतत्वेनाभ्युपगतं लोकेषु वर्तते । अतो मतान्तरप्रतिपादिततत्त्वानामपि जगत्कारणत्वशङ्का मन्दस्य जातेति तत्परिहाराय भगवान्सूत्रकारः प्रत्येकं परमतानां भ्रान्तिमूलत्वमागमप्रामाण्यवादिनः प्रत्यागमैस्तान्निराकृतांश्च प्रबलतर्कैश्च दर्शितवान् । भ्रान्तिमूलानि दर्शनानि बलवत्तर्कागमपराहतानि किमिति नोच्छिद्यन्त इत्याशङ्कित आह ॥ दौर्लभ्यादिना । नन्वेवं दुराग्रहग्रहीतलोके सुयुक्तिभिः स्वपक्षस्थापनं परपक्षनिराकरणं चारण्यरोदनवद्व्यर्थमित्यत आह ॥ तथाऽपीति । तमोहन्युरित्यर्थः । ये तु निःसंशयेन स्वपाद-पद्माश्रयास्तेषां प्रतिपक्षनिराकरणयुक्तिशाणेन विद्यासिनैशित्यासिद्ध्यर्थं परसमयनिराकरणं वेदव्यासश्चकारेत्यर्थः । तत्रतावन्नि-

रीश्वरसाङ्ख्यमतं निराकर्तुमुपन्यस्यति ॥ चेतनेत्यादिना। अत्रेत्थं साङ्ख्यप्रक्रिया ।अचेतनं चेतनं चेति तत्त्वद्वयम् । तच्च पञ्चविंशति भेदभिन्नम् । तथा हि कापिलसूत्रम् । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति। तच्च चेतनमणिगतं परस्परमत्यन्ताभिन्नं च। अचेतनं सर्वप्रकृत्यात्मकं तयाऽभिन्नं प्रलयपर्यन्तं परस्परं भिन्नं च । इश्वरानाधिष्ठितमेव चेतनं कार्यकारि। प्रकृतेरेव कर्तृत्वं सर्वेऽभ्युपगच्छन्ति साङ्ख्याः। तत्र पुरुषस्य भोक्तृत्वं केचिन्मन्यन्ते। केचिन्न भोक्तृत्ववादिनः। आत्मचैतन्येन स्वयंप्रकाशेन सुखदुःखानुभवं वदन्ति। न त्वात्मनः संयोगजेनात्मसमवेतज्ञानेनास्वयंप्रकाशेन । अन्ये तु प्रकृतिपुरुषयोर्भेदाग्रहनिबन्धनः सुखदुःखादिमानहमिति व्यवहारो न त्वात्मनःसुखादिजन्मास्ति । तत्त्वतःसुखदुःखादित्वादिकं त्वन्तःकरणधर्म इति मन्यन्ते । प्रकृतिपुरुषयोर्विवेकज्ञाने सति विवेकाज्ञाननिबन्धनो दुःखादिबन्धनिवृत्तिः पुरुषस्येति भोक्तृत्वं मन्यमानानां मतम्। तदन्येषां प्रकृतिपुरुषयोर्भेदग्रहणमेव मुक्तिरिति मतम् । अधुनोपन्यस्तमतं दूषयितुमुपक्रमते ॥ ईशस्येति। ईश्वरनिरपेक्षप्रधानप्रवृत्त्यङ्गीकारात् । पुरुषस्य भोक्तृत्वांभोक्तृत्वपक्षौ साङ्ख्यैकदेशौ युक्तिपराहताविलर्थः। युक्तिपराहतिं दर्शयति ॥ चेतनेति ।अत्रायं प्रयोगः।महदहङ्कारादिकार्यं चेतनाधीनोत्पत्तिकं कार्यत्वाद्धटवदिति। न चेश्वरनिरपेक्षप्रधानं प्रवर्तत इत्यादिसाङ्ख्याभ्युपगते किञ्चित्प्रमाणम् । अस्ति चेश्वराधिष्ठितत्वे प्रधानस्य श्रुतिः प्रमाणम् । योनिमधितिष्ठत्येक इति। अयोनिं वियोनिमिति प्रकृतिराहितां प्रकृतिमित्यर्थः । कूर्म पुराणे चैतदुक्तम् । प्रकृतिं पुरुषंचैव प्रविश्य पुरुषोत्तमः । क्षोभयामास भगवान्सृष्ट्यर्थं जगतो विभुरिति ।

न च प्रधानस्येशानधिष्ठितस्य जगदुत्पादकत्वमाप्तेन कपिलेनोक्तत्वात्सिद्ध्यतीति वाच्यम् । प्रमाणविरुद्धार्थं वक्तुराप्तत्वाभावात् । योऽसौ सिद्धानां कपिलो मुनिरित्याद्यागमसिद्धो विष्णवतारतारूपःकपिल आप्ततमोऽन्योऽसौ निरीश्वरसाङ्ख्यप्रणेतुः कापिलात् । कपिलो वासुदेवाख्यस्तन्त्रं साङ्ख्यं जगाद ह । ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च । तथैवासुरये सर्ववेदार्थपरिबृंहितम् । सर्ववेदविरुद्धं च कपिलोऽन्योजगाद ह । साङ्ख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितमिति पाद्मवचनात् । अपि च । प्रामाण्यवदप्रामाण्यमपि स्वत एवाङ्गीकरोति साङ्ख्यो विज्ञानानाम् । अतस्तेन स्वदर्शनोक्तमस्तीतिवन्नास्तीत्यप्युक्तं स्यात् । ततश्च मायावाद्यभ्युपगतविश्वसदसद्वैलक्षण्यादिवत्परस्परव्याहतमिति न किञ्चित्सिद्ध्यति । तदेतदाह । ॥ न चेति । इतोऽपि कारणात्केवलप्रधानाधीनोत्पत्तिकं जगन्न भवतीत्याह ॥ इदमिति । अत्रायं प्रयोगः । महदादिकमीश्वरनिरपेक्षप्रधानाधीनोत्पत्तिकं न भवति वस्तुत्वात्प्रधानवदिति । अनेनैवानुमानेन पराहतत्वादम्बुवच्चेतननिरपेक्षप्रवृत्तिमत्त्वानुमानं प्रधानस्य न घटते । केन मूलानुमा भवेदित्यभिमतार्थस्य प्रतिपत्तौ कारणभूतानुमा केन भवेत् । न केनापि भवेदित्यर्थः । एतदेव विवृणोति ॥ स्वतन्त्रेति । सा त्वप्रमाहतामित्यर्थः । न हि जगद्रचनाकर्तृत्वमचेतनस्य युज्यते । इच्छावद्धर्मत्वाद्रचनायाः । न ह्यचेतनस्येच्छावत्त्वमिच्छाम्यहमित्यात्मधर्मत्वेन व्यवहारादिच्छायाः । न चात्मनोऽचेतनेनेच्छावता मनसा भेदाग्रहादयं व्यवहारः किं न स्यादित्यत आह ॥ यदीति । मम मन इति मनसो भेदेन गृह्यमाणत्वात् । न तेन भेदाग्रहणमात्मन उपपद्यते । अन्यथाऽनुमा घटोऽहमिति

घटेन भेदाग्रहणं स्यादात्मनः । अपि च। यदि भेदाग्रहादभेदव्यवहारस्तर्ह्यभेदाग्रहाद्भेदव्यवहारोऽपि स्यात् । ततश्चेच्छाम्यहमिति व्यवहारभङ्गःस्यात् । न च कुत्रचिद्भेदाग्रहादभेदव्यवहारो दृष्टः । पुरोवर्तिरजतयोः संसर्गज्ञानादेवेदंरजतमिति व्यवहारः शुक्तिकायाम् । सत्यरजते तथाऽनुभवात् । अन्यथा सत्यरजतेऽप्यसंसर्गाग्रहादिदमंशेन रजतस्येदंरजतमिति व्यवहारो न स्यात्। ननु कामःसङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुत्या कामादीनां मनोधर्मत्वोक्तेः कथमात्मधर्म इत्यत आह ॥ उभयेति । कामो हि द्विविधो विद्यते । अतो जीवस्वरूपकामस्यापि सद्भावान्मनः काम इत्येतदप्यस्तीति न मनोधर्मत्वोक्तिविरोधः । कामस्य द्वैविध्यमाह ॥ प्रियाप्रियेति । परिणामेऽनिष्टकारिणः प्रियस्येच्छा मनोधर्मो हितेच्छा जीवस्य धर्मः । स यदि पितृलोककामो भवतीति तस्य मुक्तिदशायामपि कामश्रवणात् । तस्मादिच्छाम्यहमिति व्यवहरो मुख्यत एव । अधुनोपपादितमर्थमुपसंहारद्वारा रचनानुपपत्तेश्च नानुमानमिति सूत्रारूढं करोति ॥ रचनेति । अतो धर्मादिकं कस्यचित्प्रत्यक्षं प्रमेयत्वात्कुम्भवदित्यनुमानानुमितसर्वज्ञेन कपिलेन प्रोक्तत्वहेतुनाऽवगतं प्रधानं जगत्कर्तृ न भवति विचित्ररचनानुपपत्तिपराहतत्वात् । न हि विचित्रा प्रासादादिरचना दृष्टाऽचेतनत्वात् । अपिच । उक्तानुमानेन काणादेऽपि सर्वज्ञःस्यात् । तथा सति तेन प्रतिषिद्धत्वात्प्रधानाभावोऽप्यापाद्येत। ननु चेतनानधिष्ठितमपि प्रधानं कार्यकारि स्यात्। यथा क्षीरं दध्याकारेण परिणमते स्वयमेव । यथा नदीजलं स्वयमेव वहति। ननु चेतनाधिष्ठितमित्याशङ्क्याह ॥ पयोम्बुवदिति । एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यःस्यन्दन्ते । एतेन ह वाव पयो मण्डं

भवतीति श्रुत्या नद्यादिजडतदभिमानिचेतनानां च नद्यादिशब्दवाच्यानामीश्वरेण प्रशास्यत्वोक्तेः पयोऽम्बुनोरपि स्वतःप्रवृत्त्यभावेन दृष्टान्तत्वासिद्धिः । ननु मनसः कर्तृत्वं कथम् । तस्यापि पुरुषवदिच्छावत्त्वानङ्गीकारात् । मनसः पृथक्कृत्यात्मकम् । अतश्च प्रकृतेः कर्तृत्वमायातमित्यत आह ॥ द्वैविध्येऽपीति । कामः स्वामिनः कर्तृत्वं न तु कामरूपपरिकरस्वामिनः संवृत्तकमनादिस्वामित्वं पुरुषस्यैवानुभवसिद्धत्वात् । चेतनार्थत्वाच्च । चेतनस्येच्छावत्त्वं नामेच्छास्वामित्वमेव कर्तृत्वप्रयोजकं विवक्षितमतो मनसः कर्तृत्वमित्यर्थः । ननु परिणामेऽहितकारीदमिति जानतोऽप्यवशात्तत्रेच्छा जायते तत्कथमिच्छास्वामित्वं पुरुषस्यातद्वशत्वादिच्छाया इत्यत आह ॥ किञ्चिदिति । यद्यद्वशीकृतं तत्तदस्य नृपस्य देशस्वामित्वं लोके व्यवह्रियते । तद्वदीषद्वशीकृतेच्छस्यापि पुरुषस्येच्छास्वामित्वं युज्यते । सर्वात्मना वशीकृतेच्छादेरीश्वरस्येच्छास्वामित्वमत एव कर्तृत्वं किमु वक्तव्यमित्यर्थः । तस्माद्वेदवाक्यमुक्तप्रकारेणार्थान्तराभिधायकं न त्विच्छानिषेधकं चेतनस्येत्यतोऽपीच्छावत्त्वं पुरुषस्य न निषेधकं चेतनस्येत्याह ॥ मोक्षेति । न च कालान्तरभाविपुरुषमोक्षमुद्दिश्य प्रकृतिः प्रवर्तत इति युक्तम् । स्वार्थरहितप्रवृत्त्यसम्भवात् । न हि देवदत्तकृतसुकृतफलं यज्ञदत्तो भुङ्क्ते । कृतहान्यकृताभ्युपगमप्रसङ्गात् । किञ्च । प्रकृतिनिवृत्तौ हि पुरुषस्य निवृत्तिः । एवं सति स्वनिवृत्त्यर्थं प्रकृतिः प्रयतत इत्यतिविरुद्धम् । इतोऽपि कर्तृत्वभोक्तृत्वे पुरुषस्यैव युक्ते । योऽहं कर्ता सोऽहं भोक्तेत्यनुभवात् । कृतभोक्तुरन्यत्वे प्रमाणाभावाच्च । तदेतदाह ॥ कर्तृत्वमिति । उपसंहरति ॥ सर्वमानेति । आत्मनः सर्वप्रमाणसिद्धकर्तृत्वानङ्गीकारे साम्यान्मायावादितौल्यं याति साङ्ख्यः । अत एव सर्वप्रमाणविरुद्धानुष्ठानलक्षणदुर्दीक्षां

गृहीतवान्। अत एव भोक्तापत्तेरविभागश्चेत्स्याल्लोकवदित्यादौ पूर्वनिराकृतेन माथिना रचनानुपपत्तेश्च नानुमानमिति चकारात्समुच्चित्य निराकृतः सूत्रकारेण। अतो नेशनिरपेक्षं प्रधानं जगत्कारणम्॥ १ ॥ अत्र यत्पतञ्जलिःप्राह। ईशोपकृतात्प्रधानाज्जगदुत्पत्तिरिति तन्निराकर्तुमनुवदति॥ साङ्ख्य इति। साङ्ख्याद्युत्पत्तौ पृथिवीवत्प्रधानं महदाद्युत्पत्तौ कारणं पर्जन्यवदीश्वरः कारणमीक्षापर्जन्यकर्तृत्ववज्जीवसन्निधिमात्रतः कारणं त्वीक्षापर्जन्यकर्तृत्वमपि देहस्यैव तत्सङ्गादुपचर्यते जीव इत्यर्थः। अत्रैतन्मतनिरासं कथयत्सूत्रम्॥ अन्यत्राभावाच्च न तृणादिवदिति। तद्व्याचष्टे॥ अन्यत्रेति। न न तृणाद्युत्पत्तौ पृथिवीसहायमिव पर्जन्यः प्रधानसहायमात्रमीश्वरः करोति। यतः प्रधानपुरुषतदुक्तीनां प्रतीतयः प्रवृत्तयः सत्ता चेशाधीनाः। तत्र नित्यवस्तु नित्यरूपेणानित्यं चानित्यरूपेण स्वरूपभूतया नित्यशक्त्येश्वर एव सर्वदा नियमयति। न ऋते त्वत्क्रियते किञ्च नारे महामर्कं मघवन् चित्रमर्चेति श्रुतेः। यतस्त्वदृते किमपि न क्रियते आरे दूरेऽप्यतो महान्तमर्कमतिशयितास्पदं भो मघवन् मखेश चित्रं चमत्करणीयं त्वां त्वमेवार्च। त्वामर्चितुमपि त्वदनुग्रहमन्तरेणान्यस्यासामर्थ्यादित्यर्थः। तदेव श्रुत्यन्तरेण द्रढयति। स्वभावेऽपि नित्यस्यापि पुरुषाधीनत्वं द्रष्टम्। प्रत्यवायपरिहारे यतो नित्यकर्मविशेषे कृते तदकरणनिमित्तप्रत्यवायप्रतियोगिकः कदाचिन्नश्यति। अकृते प्रत्ययोत्पत्त्या नश्यत्येव। उपसंहरति॥ तादिति। अन्यो निरीश्वरः साङ्ख्यस्तन्मतवत्पतञ्जलिमतमप्यनुपादेयमित्यर्थः॥ २॥ अत्र चेतनाचेतनविभागमङ्गीकुर्वतोऽचेतनं चेतनाधिष्ठितमेव प्रवर्तते। ननु स्वतन्त्रमित्येतदसहमानस्य देहात्मवादिनश्चार्वाकस्य मतमनूद्य निराकरोति॥ चार्वाकैरित्यादिना। न

लोकायतिकशास्त्रमुपादेयं तत्र प्रयोजनवदर्थस्य बोध्यस्याभावात् । न हि प्रत्यक्षादतिरिक्तोऽर्थः शास्त्रावबोध्यो वक्तुं शक्यः प्रत्यक्षैकप्रमाणवादिना लोकायतिकेन । तस्माच्छास्त्रस्य परव्यामोहनमेव प्रयोजनमापद्यते । तस्मात्स्वाभ्युपगमादेव स्वार्थपरार्थशून्यत्वाच्चार्वाकदर्शनमुन्मत्तवाक्यवत्प्रलापमात्रम् । एतदेवोक्तं सूत्रकारेण ॥ अभ्युपगमेऽप्यर्थाभावादिति । ननु देहव्यतिरिक्तात्मनि सति तस्यात्मपरलोकप्रयोजनं वक्तुं शक्यते । स कुतः सिद्ध इत्याशङ्कित आह ॥ देहादिति । अपिच । यदि देहस्यैव चैतन्यं सुप्तावपि स्यात् । बालस्य प्रथमस्तनपानप्रवृत्तिश्च न स्यात् । स्तनपानेष्टसाधनत्वस्य पूर्वदेहेनादृष्टत्वात् । ननु यदा प्रत्यक्षमेवैकं प्रमाणं तदा दृष्टप्रयोजनं कुतःसिद्ध्येदित्याशङ्क्याह ॥ प्रत्यक्षस्येति । न चानुमानादीनाममानत्वं प्रत्यक्षतः सिद्धमिति वाच्यम् । प्रत्यक्षामानत्वमनुमानासिद्धमिति वक्तुं शक्यत्वात् । किञ्च । यदि प्रत्यक्षमानं साक्षिप्रत्यक्षेण सिद्धमित्युच्यते तर्हि तेनैवानुमानादिप्रामाण्यं सिद्धमित्यभ्युपम्यगतां विशेषाभावात् । अतो निष्प्रयोजनत्वाद्दोषदुष्टत्वादुपेक्षणीयं चार्वाकमतमित्युपसंहरति ॥ स्वमतेनेति । न परेणैवापादितं नैरर्थक्यं तत्पक्षस्य किन्तु स्वेनैवाङ्गीकृतमित्यर्थः ॥ ३ ॥ ननु यदुक्तमीशानधिष्ठितस्य प्रधानस्य जगदुत्पत्तौ प्रवृत्तिर्न सम्भवतीति तन्न युज्यते । अयस्कान्तसान्निधानादिवायसः पुरुषसन्निधानात्प्रधानस्यान्धपङ्गुन्यायेनाशङ्क्य परिहरति ॥ सन्निधानादिति । चेतनसम्बन्धमात्रादचेतनस्य प्रवृत्तौ सुप्तिदशायां देहादेः प्रवृत्तिप्रसङ्गो रचनानुपपत्तेरित्यादिनोक्तदोषप्रसङ्गश्चायस्कान्तगतेनेशप्रेरणादेवायसोऽपि प्रवृत्तिरिति । न बुद्धिशून्यस्य स्वतःप्रवृत्तिरिच्छाऽपि सम्प्रतिपन्ना ॥ ४ ॥ किञ्च । यदिशरीरस्य कार्येषु प्रवृत्तमानस्य पुरुषःसान्निधिमात्रेणोपकरोति

तदा शरीरस्य प्राधान्यं पुरुषस्योपसर्जनत्वं प्रसज्यते। ततश्च शरीरमङ्गं पुरुषोऽङ्गीति व्यवहारलोपेन सर्वापलापदोषः स्यात्। किञ्च। यतोऽखिलं भवति तस्येशस्यापलापान्निरीश्वरसाङ्ख्यः। तदेतदाह ॥ अङ्गित्वामिति। एतदेवोक्तं सूत्रकारेण ॥ पुरुषाश्मवदिति चेत्तत्रापीति। अधुनाऽङ्गभूतं शरीरमादाय पुरुष एवाङ्गी कार्येष्वीश्वरनिरपेक्षः समग्रस्वातन्त्र्यशक्तिरहितोऽपि प्रवर्तत इति पक्षमनूद्य दूषयति ॥ अङ्गित्वं यदीति। शरीरेणैव सहायेषु पुरुषस्य कार्यकारित्वे शरीराद्यङ्गीकर्तव्यम्। ननु किमीश्वरेण शरीरेण वा तन्निरपेक्ष्य स्वातन्त्र्यं जीवस्य किं न स्यादित्याशङ्क्याह ॥ न चेति। न हि मुख्यस्वतन्त्रस्य हिताकरणमहितकरणं च प्रतिषेधेन करणप्रतिहतस्वानुभवसिद्धं युज्यते। एतदेवोक्तम् ॥ अन्यथानुमितौ च ज्ञशक्तिवियोगादिति सूत्रेण। अधुना ये पूर्वोक्तदोषास्तदीश्वरत्वं तदधीनत्वं च विश्वस्यानङ्गीकुर्वतां भवन्तीत्याह ॥ संसारिण इति। रचनानुपपत्तेरित्यारभ्योक्ततात्पर्यमाह ॥ तस्मादिति। अतो गत्यन्तराभावात्सर्वेशो हरिरङ्गीकर्तव्य एव सर्ववादिभिरित्यर्थः ॥ ५ ॥

अत्र सर्वेश्वरमभ्युपगम्याणुकादिप्रकारेण जगदारम्भं वदतां कणादादीनां मतं तावदुपन्यस्यति ॥ नित्यज्ञानेति। नित्यज्ञानप्रयत्नेच्छावन्तं सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागैर्युक्तमीश्वरमभ्युपगच्छन्तो वैशेषिकादय इत्थमाहुः। पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणव ईशेच्छाजीवादृष्टप्रेरिताः क्रियावन्तो भवन्ति। सृष्टिकाले तत्र सजातीययोः परमाण्वोः संयोगाद्व्यणुकं जायते। तद्व्यणुकत्रयेण त्र्यणुकं त्र्यणुकचतुष्टयेन चतुरणुकं च। ततश्चानियतसङ्ख्यावयवैः खण्डावयवी अन्त्यावयवी च जायते। विजातीयावयवोपष्टब्धः। तत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। परमा-

ण्वादीशेच्छादिकं निमित्तकारणमेवोत्पत्तिमतो नित्या एव सामान्यविशेषसमवायाः । अन्त्यमितिपदं विशेषपदार्थ-स्पष्टीकरणार्थम् । कर्माण्यनित्यान्येव । द्रव्यं त्वाकाशादिकं नित्यं तद्गतैकत्वादिगुणश्च पटादिद्रव्यमनित्यं तद्गतरूपादि-गुणाश्च द्रव्यासमवायिकारणमवयवसंयोग एव गुणकर्मणोरसमवायिकारणं गुणः क्वचित्कर्म च । तत्र कार्यद्रव्यगतरूपादेः कारणद्रव्यगतरूपादिकं कारणैकार्थसमवायप्रत्यासन्नमसमवायिकारणम् । आत्मगतसुखदुःखादेरात्मनः संयोग एकार्थसमवाय-प्रत्यासन्नोऽसमवायिकारणम् । कर्मणश्च पतनादेर्गुरुत्वादिगुणः संयोगविभागश्च । कर्मचलनवदवयवारब्धद्रव्यगतकर्मणश्च । एवं यद्यपि कारणगुणप्रक्रमेण कार्ये गुणारम्भ इति मतं तथाऽपि पारिमाण्डल्यं परमाणुपरिमाणं द्व्यणुके ह्रस्वत्वासमवायिकारणं न भवति । द्व्यणुकपरिमाणं चाणुत्वम् । त्र्यणुकादेरणुत्वमस्तु । तत्तत्स्थूलापेक्षया परमाणुद्व्यणुकयोर्महत्त्वे त्र्यणुकवत्प्रत्यक्षत्वं स्यादिति चेत् । सत्यम् । स्याद्योगिप्रत्यक्षादेव न केनचिद्दृष्टस्य सर्वदृश्यत्वानियमः । न हि त्र्यणुकमपि सर्वः पश्यति । मन्ददृष्ट्यगोचरत्वात् । नन्वणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवदित्यनुमानविरुद्धं परमाणुमहत्त्वमिति चोदयति ॥ यथेति । महत्परिमाणतारतम्यस्यापि विश्रान्त्यभावान्न दृष्टान्तत्वमिति परिहरति ॥ न मह-त्त्वस्येति । इदमस्मान्महदिति महत्त्वतारतम्यवदिदमस्मादण्वित्यणुतारतम्यमप्यनन्तमेव दृश्यते । न हि महत्परिमाणतः पञ्चगुण-स्त्रिषड्गुणो वेतीयत्तया परिच्छिन्न ईश्वरस्तद्वत्त्र्यणुकस्य षष्ठोभागः परमाणुरित्युक्तम् । यदि महत्त्वादनन्तांशाधिक ईश इत्यु-च्यते तद्वत्त्र्यणुकादनन्तांशहीनत्वं परमाणोःस्यात् । नात्राणुत्वविश्रान्तिः । यथा देशकालयोर्न देशतः कालतः परिच्छेदोऽनुभूयते ।

तयोर्द्वयोरपरिच्छेद एव साक्षिसिद्धः। एवं परमाणोर्भागमानतोऽपरिच्छेदः साक्षिसिद्ध इत्यभ्युपगन्तव्यम्। महत्त्वपरिमाणस्यापर्य-वसानमासिद्धं चेत्यपर्यवसानं केन सिद्धम्। न चानुमानात्तस्य दूषितत्वात्। महतो महीयानित्याद्यागमेन विरुद्धत्वात्। यत्र महत्त्वं पर्यवसितमित्युच्यते तन्महतोऽपि महत्प्रतीयते। एवमणुपरिमाणतारतम्य पर्यवसितम्। यथा सङ्ख्या व्यणुकादिगणनेनैक-तदर्धतदर्धादिभेदेन न पर्यवस्यति। एवं परिमाणमप्यणुत्वमहत्त्वतारतम्याभ्यामपि न पर्यवस्यति। निरवधिकगुणत्वमहत्त्वयुत-श्चाणोरणीयान्महतो महीयानात्मेति श्रुतेर्हरिरित्याह ॥ अणीयानिति। अनन्तं ब्रह्मेति श्रुत्या निःसीमाणुत्वमहत्वासिद्धिर्ब्रह्मण इत्याह ॥ आनन्त्येति। ननु परिमाणतोऽल्पत्वे भगवतो ज्ञानानन्दादिगुणतःकालतश्चानन्तत्वं किं न स्यादित्याश-ङ्क्याह ॥ नैवेति। शते पञ्चाशन्न्यायेनानन्तकालीनस्य ब्रह्मणोऽल्पकालीनत्वं किं न स्यादित्याशङ्क्याह ॥ नैवेति। शते पञ्चाश-न्न्यायानुमितबहुलतरगुणस्य षड्गुणवत्त्वमप्यस्तु न तु स्वतन्मात्रानन्तस्य महतो गुणत्वमेवाभ्युपगतं सूत्रकारेणापि ॥ अर्भको-कस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चेति। महतोऽपि ब्रह्मणोऽल्पत्वं व्योमवदुक्तमित्याह ॥ महान् इति। एकस्याणुत्वमहत्त्वविरोधमाशङ्क्याह ॥ यदिति। यत्परममहत्तदल्पाल्पदेशेष्वपि तिष्ठत्येव। तत्र स्वयमनल्पीभूत-स्याल्पदेशान्तःसंस्थानं न युज्यते। न हि घटान्तर्मठस्तिष्ठति। अल्पदेशोपाधिकमल्पत्वं न सम्भवत्येव। अत एवाणुतारतम्या-देरपर्यवसानम्। चक्षुरादिनिरपेक्षेणापि स्वयंप्रकाशसाक्षिणा सिद्धमित्युक्तम्। तस्य स्वयंप्रकाशत्वं साधयति ॥ यदीति। प्रत्य-क्षादिज्ञानेषु तत्प्रामाण्ये च स्वयंप्रकाशं साक्षिणमन्तरेण न मानान्तरं सम्भवति। अनवस्थापराहतत्वात्। अतः परमाण्वादेरपि

साक्षिणैवानयवित्त्वसिद्धेर्युक्तमणुतारतम्यादेरपर्यवसानम् । न हि निरवयवस्य परमाणोर्दशदिक्संयोगा एकदेशवार्तिनो घटन्ते । परमाणुत्वं चापेक्षिकम् । न तु परिनिष्ठितमेकत्र । अतो यतः परमाणुर्नास्ति स परमाणुरिति न । किन्तु यदवयवानां परस्परविभागो न क्रियते कदाऽपि परमाणुरिति युक्तम् । अणुपरिमाणतारतम्यापर्यवसानेऽनन्तावयवारब्धत्वाविशेषो मेरुसर्षपयोरपि परिमाणभेदानुपपत्तिरिति न वाच्यम् । केचिद्बह्वनन्तावयवारब्धाः केचिदबह्वानन्तावयवारब्धा इति परिमाणभेदोपपत्तेरनन्तेष्वपि बहुत्वं च युक्तम् । यथाऽनन्तेभ्योऽप्यतीतब्रह्मणोऽतिबह्वनन्तत्वमतीतमनूनाम् । ब्रह्मणो दिवसे हि चतुर्दश मनवो भवन्तीति पुराणप्रसिद्धिः । यथा निरवयवत्वं परमाणोरप्रामाणिकम् । तथा तद्द्वयसंयोगादेव द्रव्योत्पत्तिरप्यप्रामाणिकीत्याह ॥ तत्संयोगादिति । अवयवानां द्वयसंयोगादपि लोष्ठादिकार्यदर्शनादाद्यकार्यमपि तथैव युक्तमित्यर्थः । पूर्वोक्तप्रकारेण सर्वद्रव्याणां तारतम्येनाणुत्वमहत्त्वसम्भवात् । अणुत्र्यणुकपरिमाणयोर्विजातीयत्वेनाकार्यकारणभावोऽपि तथा युक्त इत्याह ॥ कारणस्थेति । परमाणुगताद्वित्वसङ्ख्यैव द्व्यणुके त्र्यणुकगतात्रित्वसङ्ख्यैव त्र्यणुके परिमाणमारभते । द्व्यणुकादिकस्य च सजातीयपरमाण्वादेरेव समवायिकारणत्वमित्यादिकमप्यप्रामाणिकमित्याह ॥ न चेति । न चाङ्कुरादिकार्याणामप्याद्यषष्ठभागानामसमवायित्वं पार्थिवभागानां समवायित्वमिति वैपरीत्यस्यापि वक्तुं शक्यत्वात् । अतो द्व्यणुकादिकार्यं प्रति सजातीयावयवानां समवायिकारणत्वम् । तत्सङ्ख्याया द्व्यणुकादिपरिमाणं प्रत्यसमवायिकारणत्वमित्यादिकल्पना न साक्ष्यादिसिद्धसृष्टिप्रकारं निवारयितुं शक्नोतीत्यर्थः । ननु त्र्यणुकावयवतदवयवादेरतीन्द्रियत्वान्न साक्षिसिद्धत्वं

किन्त्वनुमानगम्यत्वमित्यत आह ॥ यदीति । न तावत्परमाणोः पक्षीकारेण परमाणुरनुमातुं शक्यते । तत्र हेतोराश्रयासिद्धिप्रसङ्गात् । यत्र पदमपि वस्तुं न शक्यते न तद्देशं कश्चिल्लभते । त्र्यणुकावयवाःसावयवाः सुमहद्द्रव्यारम्भकत्वाच्चतुरणुकवदिति परमाणोरनुमाने तस्यापि महद्द्रव्यारम्भकत्वहेतुनाऽवयवानुमानं स्यात् । तथा देशकालानन्त्यमपि साक्षिसिद्धम् । न च तत्राप्यनुमानमुदेति । शशः श्रृङ्गीत्याद्यनुमानप्रतिबन्दीपराहतत्वात् । तथा हि । अयं प्रत्यक्षपरिदृश्यमानो देशः स्वतःस्थूलेन सूक्ष्मेण च देशेन सम्बद्धो देशत्वाद्धस्तवितस्त्यादिपरिच्छिन्नदेशवत् । अयं परिदृष्टः कालान्तरवान्कालत्वादतीतवदित्यनुमाने सम्मतानि सर्वश्रृङ्गाणि श्रृङ्गान्तरसमानकालीनानि श्रृङ्गत्वाद्गोश्रृङ्गवदित्यप्यनुमानं स्यात् । ततश्चदेशान्तरादिवच्छशश्रृङ्गासिद्धिः । सजातीयानामसदृशमेवास्मत्पक्षे सदृशं च किं केन न भवति । अतःसामान्यतो दृष्टानुमानेनात्यन्तातीन्द्रियवस्तुसिद्धौ शशश्रृङ्गासिद्धिरपि दुर्वारैव । अतः शिष्योपाध्यायवत्सहदर्शनमात्रेण साध्यसाधनयोर्न व्याप्तिःसिध्यति । यथा प्रत्यक्षयोग्यपुंमात्रस्य प्रत्यक्षयोग्यवन्हिमात्रेण यथा धर्मत्वस्य निषिद्धत्वेन यथा देशकालव्यवहितधूममात्रस्य देशादिव्यवहितवन्हिमात्रेण प्रत्यक्षधूमाग्निसम्बन्धेन ह्यप्रत्यक्षधूमाग्निसम्बन्धो निश्चीयते । अन्यथा सप्तमरसादिन्यनिष्टान्यापतेयुः । सामान्यतो दृष्टानुमायाः कामवाचित्वात् । इतोऽपि वैशेषिकादिसमयोऽनुपपन्न इत्याह ॥ कार्येति । अवयवावयविगुणगुणिक्रियातद्वान्जातिव्यक्तिविशेषविशेषिभेदेन पञ्चसु स्थलेषु समवायोऽभ्युपगतोऽनुपपन्नः । तद्यथा तन्तुपटयो रूपपटयोश्चलनपटयोः पटत्वपटयोः परमाणुतदन्त्यव्यावर्तकयोश्चात्यन्तभिन्नयोः समवायसम्बन्धोऽपेक्षितस्तथा तस्यापि समवायिभ्यां भिन्नत्वसाम्यात्समवायान्तरेण भाव्यम् ।

न हि स्वयमसम्बद्धोऽन्यसंयोजकः कश्चिद्दृष्टः। समवायान्तरस्याप्येवमित्यनवस्था दुर्वारा। एतदेवोक्तम् ॥ समवायाभ्युपगमाच्च साम्यादनवस्थितेरिति सूत्रेण। ननु समवायस्य सम्बन्धरूपत्वात्स्वनिर्वाहकत्वाच्च न समवायान्तरापेक्षेत्याशङ्क्याह ॥ स स्वेति। यदिसम्बन्धरूपत्वात्समवायान्तरानपेक्षत्वं समवायस्य संयोगस्यापि तर्हि तथात्वं स्यात्। न च समवायस्य स्वनिर्वाहकत्वेन सम्बन्धान्तरनिरपेक्षत्वम्। द्रव्यस्यापि तथा वक्तुं शक्यत्वात्। तथा च द्रव्यात्मत्वाभ्युपगमाद्द्रव्यातिरिक्तसमवायादिपदार्थान्तरासिद्धिः स्यादित्यर्थः। अपि च। यथाऽवयवावयविनिष्ठत्वगुणगुणिनिष्ठत्वास्तित्वाभिधेयत्वादिधर्मजातं समवायस्य स्वरूपातिरेकेण धर्मान्तरं नाभ्युपगम्यते। तथैव गुणक्रियासमवायादिकस्य द्रव्यात्मकत्वमभ्युपगम्यतामविशेषात्। ॥ विशेष इति। निगमयति ॥ द्रव्यमिति। अतो गुणक्रियाद्यनन्तविशेषात्मतया द्रव्यमेव नीलं पीतं चलतीत्यादिव्यवहारालम्बनं धर्मधर्मिव्यवहारतद्धर्मानन्त्यव्यवहारोऽपि विशेषायत्तो न तु भेदायत्तः। विशेषोऽपि न निर्विशेषः किन्तु तेनैव विशेषवान्। यथा पराभ्युपगतः समवायरूपेणैव वस्तु समवायीत्यर्थः। किञ्च। द्रव्यव्यतिरिक्तगुणादिपदार्थकल्पने कल्पनागौरवं स्यादित्याह ॥ कल्पनेति। किञ्चादौ षड्भावपदार्थानभावसहितान्कल्पयित्वा पश्चात्समवायादेरनातिरिक्तविशेषकल्पनाद्वरं द्रव्यस्यैव तथाविधविशेषकल्पनं कल्पकलाघवादित्याह ॥ कल्पयित्वेति। इतोऽपि विशेषोऽभ्युपगन्तव्य इत्याह ॥ येनेति ॥ भवाभावविभागेनेति। विधिमुखनिषेधमुखभेदेनेत्यर्थः। नन्ववयवावयव्यादीनां परस्परभेदरहितत्वं कथं येन भेदरहितेषु तेष्वपर्यायशब्दनियामको विशेषः सिद्ध्येदित्यत आह ॥ अभेदेनेति। मृद्घटः शुक्लो घटश्चलति घटोऽयं घटः पटो न भवती-

त्याद्यभेदानुभवस्य युक्तं विशेषेणैव घटनमित्यर्थः। ननु सामान्यादेरपि न समविशेषोऽस्ति। कथं तत्प्रतिबन्धा द्रव्यगुणेन तथाविधविशेषापादनेन षट्पदार्थप्रक्रियाभङ्ग इत्यत आह ॥ सामान्येति। तत्सामान्यादेर्बहुत्वं तत्तद्द्रव्यनिष्ठत्वमनयोरेनव तत्तदवयवनिष्ठत्वं रूपादेः व्याप्यवृत्तित्वं संयोगादेरव्याप्यवृत्तित्वमभ्युगतम्। तद्यदि द्रव्यादिभ्योऽन्यत्तर्हि षट्पदार्थनियमभङ्गः स्यात्। यदि पदार्थान्तरं गुणादिबहुत्वादिलक्षणमङ्गीक्रियते तर्हि तत्रापि श्रुतिसादृश्यादिकं तस्मिन्नप्यभिधेयत्वादिकमनवस्था-कारोऽयं पक्षो भवेत्। अपि च। सामान्यमिदमित्यभ्युपगतप्रत्ययवेद्यं सामान्येऽपि सामान्यं चतुर्विंशतिगुणा इति गुणेऽपि सङ्ख्या-रूपगुणोऽनुभूयमान आपद्यत एव। अनङ्गीकृतो यद्येतदप्यनवस्थाकारकमङ्गीक्रियते तर्ह्यनवस्थादूषणोच्छेदप्रसङ्गः। ननु भव-त्पक्षेऽपीयमनवस्थादूषणं स्यात्। गुणादीनां धर्मवत्त्वाङ्गीकारे नो चेदेको गुण उत्पत्तिर्जायत इत्यादिव्यवहारो न स्यादित्याश-ङ्क्याह ॥ अस्मत्पक्ष इति। गुणादीनां तद्धर्माणां चानन्यत्वान्नानवस्था तत्र धर्मधर्मिभावस्तु विशेषबलात्सिध्यति। धर्माणां विनाशोत्तरकालं धर्मिणाऽत्यन्तभेदश्च भवेत्। पूर्वं तु भेदाभेदात्यन्ताभेदे विनाशासम्भवात्। भेदाभेदयोर्भेदान्तराभावेऽपि विशेषबलाद्व्यवहारसिद्धिः। न च तावेकत्र विरुद्धावनुभवासिद्धत्वात्। भगवतस्तु प्रपञ्चादत्यन्तभेदः स्वगुणादिभिरत्यन्ताभे-दस्तेषां यावद्द्रव्यभावित्वात्। उच्छेदिनो धर्मास्तस्य सद्भावदशायां धर्मिणा भिन्नाभिन्नाः। स्वासद्भावदशायामत्यन्तभिन्ना यथा श्यामघटरूपादयः। नन्वंशाभावे परमाणोरन्येन संयोगो न स्यादिति यदुक्तं तन्न युज्यते। अंशत एव संयोगेऽशस्याप्यं-शतः संयोग इत्यनवस्थाप्रसङ्गादित्याशङ्क्याह ॥ अंशांशिनोरिति। अनेन हस्तपुस्तकसंयोगाच्छरीरपुस्तकसंयोगः संयोग-

जसंयोगोऽन्यो जायत इत्यतच्च निरस्तं भवति। अंशांशिनोरभेदेन हस्तसंयोगस्यैव शरीरसंयोगत्वात्। अंशतत्संयोगानङ्गीकारे बाधकमाह ॥ यदीति । यथकदेशतोऽसंयुक्तैरनेकावयवैरारब्धस्यापि द्रव्यस्य स्थूलत्वं व्याहतम्। एवं परमाणोःसकाशाद्व्यणुकस्यामहत्त्वमित्येतदपि व्याहतमित्याह ॥ परमाणोरिति। तथा द्व्यणुकपरिमाणानपेक्षया त्र्यणुकपरिमाणमुत्पद्यते परमाणुपरिमाणानपेक्षया च द्व्यणुणकपरिमाणमुत्पद्यते तदपि व्याहतमित्याह ॥ अणूनामिति। तथांऽशांशिनोरत्यन्तभेदवादो न युक्त इत्यत आह ॥ अंशिन इति। अशांशैर्विनाभावादंशिनोऽभेद एकेनांशेन विनांऽशान्तरात्मकतयाऽभावात् । भेदाभेदावनुभवसिद्धावित्यर्थः। तथा संयोगविभागयोर्भेदवदेकनिष्ठत्वं विहाय द्विनिष्ठत्वाभिमानमप्ययुक्तमिदमनेन संयुक्तमिदमस्माद्विभक्तमित्येकस्यैवान्यप्रतियोगिसंयोगविभागधर्मित्वेनानुभवादित्याह ॥ संयोग इति। भेदस्यैकधर्मत्वं स्पष्टयति ॥ भिन्ना इति। भिन्ना इत्युक्ते यथा पदार्थबहुत्वं प्रतीयते एवं भेदबहुत्वं प्रतीयते। अस्मिन्नेव भेदसमूहे एषां भेदोऽनयोर्भेद इत्येकवचनं प्रयुज्यते। न चैतावता स चैको भेद इदमस्माद्भिन्नमिदमस्माद्भिन्नमित्यन्योन्यप्रतियोगिभावापेक्षया द्वयोर्धर्मिणोर्भेदद्वयप्रतिभासात्। अतस्तस्मिन्नेकवचनं विप्राणां भोजनं वरमित्यादिवत्समूहाभिप्रायम्। अतः संयोगस्यानेकवृत्तित्वे भेदस्य तद्व्यतिरेकेणाभ्युपगतपृथक्त्वस्याप्यनेकवृत्तित्वं स्यादित्यर्थः। संयोगादिवत्सामान्यमप्यनेकवृत्तीत्याह ॥ नरत्वादिकमिति। सामान्यं नाम सादृश्यमेकम् । तच्चैकधर्मिकम्। धर्म्यन्तरनिरूप्यमिदमनेन सदृशमित्यनुभवात्। अतो गोत्वादिकं प्रतिव्यक्ति भिन्नमेव। एकगोपिण्डेन सह गोत्वे नष्टे पिण्डान्तरेऽपि गोत्वस्योपलम्भात्। नष्टगोपिण्डस्थगोत्वधर्मानाशे तदुपाधेरप्यविनाशप्रसङ्गः

न चैकमेव गोत्वं गोष्वित्यत्र प्रमाणमस्ति। अतोऽनेकत्वमन्तेरण नानेकनिष्ठधर्मः सम्भवतीत्यर्थः। श्रुत्या चायमर्थःसिद्ध इत्याह ॥ भिन्ना इति। आनिवृत्तिं विनाशस्तु धर्मा उभयरूपका इति। अत्यन्तोच्छेदिनो धर्माः सन्ति धर्मिणि तेन। भिन्नाभिन्ना इत्यर्थः। नन्वानन्त्यव्याभिचाराभ्यां व्यक्तिषु शब्दसम्बन्धग्रहणानुपपत्तेरवश्यं सामान्यमेकमभ्युपगन्तव्यमेव। तत्कथमनेक-वृत्तिधर्मो निषिध्यत इत्यत आह। व्युत्पत्तिरिति ॥ खुरपुच्छसास्नादिमत्पिण्डेषु सादृश्यात्। सर्वेष्वपि गोशब्दव्यवहारः सादृश्यविषयशक्त्यैवोपपद्यत इत्यर्थः। अनुगतगोत्वजात्यैव गोषु शब्दव्यवहार इत्यङ्गीकारे दूषणमाह ॥ जातित्व इति। जातित एव शब्दव्यवहाराङ्गीकारे गोत्वघटत्वपटत्वादिजातिषु जातिशब्दव्यवहारोऽनुपपन्नः स्यात्। यदि तत्र जातित्वसामान्यमङ्गीक्रियते तर्हि तस्मिन्नपिजातित्व(सामान्ये जातिषु च) सामान्यशब्दव्यवहारार्थं जात्यन्तरमङ्गीकरणीयम्। तत्राप्येवं तत्राप्येवमित्यनवस्था स्यात्। यद्यनुवृत्तप्रत्ययवेद्यत्वादिलक्षणोपाधिवशाज्जातिषु जातिशब्दप्रवृत्तिरभ्युपगम्यते। तर्हि सास्नाद्युपाधिवशाद्गवादिशब्दप्र-वृत्तिः स्यादविशेषात्। एवं घटपटादिव्यक्तिषु व्यक्तिसामान्याभावाद्व्यक्तिशब्दव्युत्पत्तिरनुपपन्नैव। यदि व्यक्तिसामान्यमङ्गी-क्रियते तर्हि तस्मिन्नपिजातित्वसामान्याश्रयत्वेन व्यक्तिभूते तदितरव्यक्तिषु च व्यक्तित्वमेकमङ्गीकरणीयम्। तस्मिन्नप्येवं तस्मिन्नप्येवमित्यनवस्था स्यात्। इतोऽपि जात्यङ्गीकारोऽनुपपन्न इत्याह ॥ कथमिति। जातेः प्रवृत्तिनिमित्तत्वे पदार्थानां स्वरूपेषु स्वरूपशब्दप्रवृत्तिर्न स्यात्। न हि स्वरूपत्वसामान्यं केनचिदङ्गीकृतम्। यदि स्वरूपशब्दस्यापि व्यक्तिषु सम्बन्ध-ग्रहणानुपपत्त्याऽनुगतवाचित्वमुच्यते तर्ह्यत्यन्तव्यावृत्तवाचकं किमिति पृष्टेऽन्यत्पदं वाच्यम्। तदप्येवमनुगतवाचकं स्यादि-

त्यनवस्थाव्यावृत्त्यनियामकं वाच्यम् । तदप्येवं तदप्येवमित्यनवस्था स्यात् । यावद्व्यावृत्ताकारवाचकं पदं नोच्यते तावदियमनवस्था दुष्परिहारैव । न चावाच्यो व्यावृत्ताकारो व्यावृत्ताकारपदेन वाच्यत्वात् । तस्माद्द्रव्यातिरिक्तजातेः कल्पनादिगौरवदोषोपहतत्वाद्द्रव्यात्मकसादृश्यमेव शब्दप्रवृत्तिनिमित्तमित्यभ्युपगन्तव्यमित्यर्थः । अपि च । न तावदौपाधिकव्यवहारालम्बनमुपाधिमव्यतिरिक्तम् । विशिष्टव्यवहारालम्बनं च विशेषणविशेष्यतत्सम्बन्धव्यतिरिक्तं वक्तुं शक्यते । षट्पदार्थनियमभङ्गात् । नापि विशेषणविशेष्यतत्सम्बन्धानामन्यतमस्य विशिष्टव्यवहारालम्बनत्वं वक्तुं शक्यमिति सोदाहरणमाह ॥ औपाधिकेत्यादिना । पर्वतोऽग्निमानिति विशिष्टमवगम्यते । वस्तुतस्तदेव धूमवत्त्वहेतुः साधयति । यत्र न तावदग्निसंयोगो विशिष्टशब्दाभिधेयः । तत्साधने सिद्धसाध्यतादोषप्रसङ्गात् । अग्निसंयोगस्य महानसादौ सिद्धत्वात् । यदि पर्वतस्याग्निसंयोगेन सह समवायसबन्ध उच्यते । तर्हि स एव धूमवत्त्वेन साध्यःस्यात् । तथा च सिद्धसाध्यतादोषस्तदवस्थ एव समवायस्य तन्तुपटादौ सिद्धत्वात् । न हि ततोऽन्यत्समवायोऽस्तीत्यङ्गीक्रियते । यदि पर्वताग्निसंयोगाद्युपाधिवत्तत्र तत्र समवायो भिद्यते तर्हि नैकत्वं समवायस्य सिध्यति । औपाधिकोऽपि भेदःसन्नेव हि समवायस्य सदसद्विलक्षणत्वेन्मायावादप्रवेशःस्यात् । अतो नौपाधिकस्तदौपाधिकस्यापि सत्यत्वमविशिष्टमौपाधिकशब्दसामर्थ्यादेव । तथा ह्यौपाधिकसमवायभेद इति किमुपाधिजन्य उपाधिव्यङ्ग्यो वा । पक्षद्वयेऽपि पर्वताग्निसंयोगादीनां समवायाश्रयाणामुपाधीनामनेकत्वेन समवायानन्त्यं दुर्वारमेव । तथा समवायिभ्यामुपाधिभ्यां संयोगन्यायेन द्वौ समवायौ अभिपद्येयाताम् । ताभ्यां समवायापेक्षिभ्यां चान्यौ ताभ्यामित्येवमित्यन-

वस्था दुष्परिहारा । समवायभेदोऽस्ति चेदसावुपाधितो वाऽस्त्वनुपाधितो वा न तत्र विशेषः कश्चित् । यदि पर्वताग्निसंयोगोपाधिवशादविद्यमान एव समवायभेदः प्रतीयमानो धूमवत्त्वहेतुना साध्यत इत्युच्यते । तर्हीदमनुमानं न प्रमाणं स्यात् । अयथार्थवेदकत्वात् । इदानीं प्रागसतः सत्तासमवायो जनिरिति यज्जनिलक्षणं तदौपाधिकविशिष्टत्वाद्दुर्निरूपमित्याह ॥ एवमेवेति । समवायविशेषस्य जनित्वे समवायानेकत्वप्रसङ्गः । उपाधिकल्पितसमवायस्य जनित्वे जनेरभावः स्यादित्यर्थः । स्वपक्षे त्वेकस्मिन्नपि विशेषाङ्गीकाराद्विशेष्यपर्वतस्याग्निमत्त्ववैशिष्ट्यं सम्भवति । तथा पूर्वमसतः पदार्थस्य सद्भावलक्षणोत्पत्तिर्युज्यत इत्याह ॥ अस्मत्पक्ष इति । विशेषबलेन पूर्वमसतः सत्त्वमुपपादयति ॥ अभावस्येति । यथाऽभावस्य गगनकुसुमादेः प्रमेयत्वादिभावरूपधर्मो दृष्टः । यथा च भावानामेवेदमिदं न भवतीत्यन्यापोहलक्षणधर्मो दृष्टः । एवं पूर्वमसन्नपि पश्चात्सम्भवी भवितुमर्हति । अन्यथा घटः पूर्वमसन्निति सामानाधिकरण्येन व्यवहारो न स्यात् । एवं सर्वपदार्था भावाभावरूपाः स्वरूपेण सत्त्वादन्यरूपेणासत्त्वात् । नन्वेवं सति भावाभावव्यवस्था न स्यादित्यत आह ॥ तथाऽपीति । परामर्शोत्तरकालमभावस्य भावधर्मत्वं प्रतीयते प्रथमप्रतिपत्त्या भावाभावव्यवस्थेत्यर्थः । अभावस्य भावरूपधर्माङ्गीकारादेव नष्टघटस्यापि पटाद्भेदोऽस्त्येवेत्यादिव्यवहारो युज्यत इत्यत आह ॥ तस्मादिति । अभावश्च त्रिविधः । प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन । अन्योन्याभावस्तु भेदपृथक्त्वशब्दव्यवहार्यवस्तुस्वरूपान्न व्यतिरिच्यते । तत्र भेदकल्पने दूषणमाह ॥ अन्योन्येति । अत्र भेदस्य वस्तुस्वरूपत्वे यन्मायिभिर्दूषणमभिहितं तदनूद्य दूषयति ॥ भेदस्येति । अयमर्थः । यदि भेदः स्वरूपं वस्तुनस्तर्हि

घटस्य विदारणं स्यात्। भिदविदारण इति धातोः। तथा भिन्नघटभागानामपि भेदस्वरूपत्वाद्विदारणं स्यात्। एवं तत्रापि तत्रापीत्यन्ततः सर्वावयवानां विदारणेन शून्यतापत्तिरिति नायं दोषः। अन्यप्रतियोगिकभेदस्य स्वरूपत्वात्। घटस्यान्येनैव विभागो भवेन्न स्वेन। विदारणेऽपि घटतदवयवानां ततोऽप्यल्पतदवयवानामपि विदारणमेव स्यात्। न तु शून्यता। न हि शून्यस्य शून्यान्तरसंयोगे किञ्चिदारभ्यते। अपिच। भेदस्वरूपत्वे वस्तुनो विदारणापादनमसङ्गतमेव। अन्यत्वलक्षणभेदस्य वस्तुस्वरूपत्वात्। न च विदारणमेवान्यत्वम्। तथा सत्यविभक्तोष्ठयोरनन्यत्वप्रङ्गात्। अतः प्रयोगतोऽनुमन्तव्या अनेकार्था हि धातव इत्यभियुक्तवचनाद्भिदेर्धातोर्विदारणवदन्यत्वमप्यर्थो भवत्येव। अत इदं मायिमतमनुवादार्हमेव न भवतीति न पृथगनूद्य दूषितमस्मिन्पादे सूत्रकृता। यदुक्तं ज्ञानेच्छाप्रयत्नाद्यष्टगुणक ईश्वर इति तदयुक्तम्। अपरिमेयगुणत्वादित्याह॥ नचेति। मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे। यदासीत्तत एवाद्यः स्वयंम्भूःसमभूदज इत्यादिभगवद्वाक्याद्भागवतस्थात्। अनन्तगुणेत्यादिश्रुतेश्च भगवतो नित्यानन्दामृतस्यापि गुणानन्त्यं सिद्धमित्याह॥ अपीति। अनन्ते गुणतो भगवत एकैकगुणापेक्षयाऽप्यनन्तत्वमभिधीयते। तद्विवृणोति॥ यदीति। ननु सृष्टिविषयत्वस्थितिविषयत्वादिविशेषो न स्वतो ज्ञानेच्छादेः किन्तु विषयोपाधिकः किं न स्यादित्यत आह॥ औपाधिकेनेति। औपाधिकविशेषोऽप्यस्ति चेदनन्तविशेषत्वं दुर्निवारमीश्वरज्ञानस्य नास्ति चेद्घटाद्यविषयत्वं स्यादित्यर्थः। अपि च। स्वप्रकाशलक्षणविशेषस्त्ववश्यमभ्युपगन्तव्यो ज्ञानस्य। अन्यथा सर्वज्ञत्वमीशस्य न स्यादित्याह॥ स्वप्रकाशत्वमिति। यैर्ज्ञानस्य निराकृतं तेषां पक्ष इति शेषः। न हि स्वज्ञानमेवाजानतः

सर्वज्ञत्वं भवति । ज्ञानस्यापि सर्वमध्यपातित्वात् । न च तद्विषये ज्ञानान्तरमस्तीति वाच्यम् । ज्ञानद्वयेन सर्वं जानामीति ज्ञानस्यापि ज्ञानद्वयमध्यपातितत्वेन स्वप्रकाशत्वापरिहारात् । विषयतया स्वेन विशेष्यत्वं हि स्वप्रकाशत्वं ज्ञानस्य । यदि स्वेतरसर्वविषयज्ञानात्तद्विषयज्ञानाच्च तदुभयविषयज्ञानमीशस्यान्यदभ्युपगम्यते । तर्हि तत् त्रितयविषयज्ञानमन्यादित्यनवस्था स्यात् । सर्वेषां यत्सर्वमिति ज्ञानं तस्य स्वविषयत्वाभावे सर्वविषयत्वं न स्यात् । स्वस्यापि सर्वमध्यपातितत्वात् । अतः स्वप्रकाशत्वमवश्यमभ्युपगन्तव्यं ज्ञानस्येत्यर्थः । ईशस्य ज्ञानादिकमभ्युपगम्यानन्दानभ्युपगमे हेतुः पराभ्युपगतस्तदनूद्य दूषयति ॥ सुखवानिति । न चेशस्य सुखित्वे यज्ञदत्तवद्दुःखित्वापत्तेर्न सुखित्वमिति वाच्यम् । ज्ञानित्वेऽपि चैत्रवदनित्यज्ञानाज्ञानयोरापत्त्येश्वरस्य ज्ञानाभावप्रसङ्गात् । योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति । आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचन । य आत्माऽपहतपाप्मेत्यादिश्रुत्येश्वरस्य दुःखाभावपरानन्दयोः प्रतिपादितत्वाच्च । न च देवदत्तादेर्दुःखित्वे सुखित्वं प्रयोजकं किन्तु दुःखित्वापादकेश्वरेच्छाविषयत्वं हि तत्र प्रयोजकम् । न चेशः स्वस्य दुःखित्वमिच्छति । अतो न दुःखित्वं तस्येत्याह ॥ ईश्वरस्येति । किञ्च पूर्णानन्दश्चेदीश्वरस्तर्हि दुःखवांस्त्यादित्यापादयितुं न शक्यते । नित्यानन्दस्य दुःखित्वेन व्याप्त्यभावात् । व्याहतं चेदमापादनम् । नित्यपूर्णानन्दस्य दुःखित्वविरोधात् । न चेशस्यानन्दत्वे चैत्रवदनित्यानन्दवत्त्वमापद्यत इति वाच्यम् । अनित्यसुखित्वस्य दुःखित्वप्रयुक्तत्वान्मैत्रादौ । दुःखित्वं चेश्वरस्य श्रुतिविरुद्धम् । किञ्च । सुखित्वदुःखित्वयोः सहदर्शनमात्रेण श्रुतिसिद्धेश्वरानन्दापलापेऽग्नीषोमीयपशुहिंसादेरपि ब्राह्मणादिहिंसावत्पापहेतुत्वं किमिति नानुमीयत इत्याह

॥ सहेति । यदि पापहेतुत्वे हिंसात्वं न प्रयोजकं ब्रह्महत्यादौ किन्तु श्रुत्या निषिद्धत्वमतः श्रुतिविहितहिंसायुक्तत्वान्न यज्ञादेरधर्मत्वमित्युच्यते तर्हि दुःखित्वेऽपि न दुःखित्वं प्रयोजकं जीवस्य किं तर्हि श्रुत्या दुःखित्वेनानुयुक्तत्वम् । अतो नेश्वरस्य दुःखित्वमिति समः समाधिः । तस्माच्छ्रुतिरेवात्रोपादेया नानुमानमजागलस्तनायमानमित्यर्थः । यद्यवश्यमीश्वरस्य दुःखाभावेन सुखाभावो घटादाविवानुमीयते तर्हि विमतो जगत्कर्ता नेत्याद्यनुमानेनेश्वराद्यभावः स्यात् । तस्मादनुमानमनादृत्य श्रुत्युक्तप्रकारेणेश्वरादिवस्तु ग्राह्यम् । तदेतदाह ॥ अनुमानेनेति । इतोऽपि नानुमानं प्रतिरोधकं धर्मिग्राहकप्रमाणविरुद्धत्वादित्याह ॥ ईशस्येति । कालभेदेन जगत्सृष्टिप्रलयव्यवस्था च परमते न घटते । कालस्य भावादीशस्य नित्येच्छत्वादित्याह ॥ नित्येच्छत्वादिति । अनेन नित्यमेव च भावादिति सूत्रं विवृतम् । स्वमते तु कालभेदसद्भावात्सृष्ट्यादिव्यवस्थोपपन्ना । नन्वीश्वरेच्छावशात्स्थितिसृष्ट्याद्यापादका कालविशेषाश्चेश्वराधीनाः सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अतः शरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयानः । उवास तस्मिन्सलिल इति भागवतवचनाच्च । सृष्टिसंहारौ कालावपि तत्कालीनाविति युज्यते । कालस्य स्वनिर्वाहकत्वादित्याह ॥ कालस्येति । न च वाच्यमविचित्रेश्वरेच्छया सृष्ट्यादिविचित्रं कार्यं कथमिति । अनन्तविशेषत्वादीश्वरेच्छायाः कालवदीशदेशावपि स्वनिर्वाहकौ । ईशः स्वतन्त्रो देशः सर्वगत इति व्यवहारात् । स्वनिर्वाहकत्वेऽपि देशकालावीश्वरः स्वयमेव कालभेदी तदा तदैव कल्पयति । एवं स्वोद्दिष्ट एव कालविशेषे सृष्टिः स्यात्संहारः स्यादिति च कल्पयति । एवं हीशेच्छया सृष्ट्यादिकं वर्णयन्नधिकरणार्थमुपसंहरति ॥ रूपेति । ॥१९॥

अनेन रूपादिमत्त्वाच्च विपर्ययो दर्शनादिति सूत्रं विवृत्तं भवति । अतो न वैशेषिकादिप्रक्रिया श्रुतिसमन्वयं विघटयितुं समर्थेति सिद्धम् ॥ ६ ॥ शब्दादीनां केषाञ्चित्पदार्थानां त्रिक्षणावस्थायित्वं वदतो वैशेषिकादेर्मतनिराकरणप्रसङ्गेनेदानीं सर्व-क्षणिकत्ववादिनो बौद्धस्य मतं निराक्रियते । बौद्धाश्चतुर्विधाः । तत्र तावद्बाह्यार्थाङ्गीकारिणां द्विविधानां मतं दूषयितुमुपन्य-स्यति ॥ वैशेषिका इत्यादिना । स्थितिं स्कन्धानामिति शेषः । वैभाषिकसौत्रान्तिकमतं स्थितिरेषा कालकर्मनिमित्ततामिलित-परमाणुसमुदाय एव पर्वतादिप्रपञ्चो न त्ववयव्येकोऽस्ति । ज्ञानमेवात्मगम् । दुःखाभावः सुखम् । निर्विषयचित्सन्ततिर्मुक्तिः । सर्वमेतद्रूपविज्ञानवेदनासंज्ञासंस्कारभेदेन पञ्चधा भिन्नं वस्तु क्षणविनाशि च । रूपादिसन्ततयो वस्तुभूताः स्थायिनश्चेति । तत्र ताव-त्परमाणुपुञ्जं निराकरोति ॥ समुदाय इत्यादिना । अनेन समुदाय उभयहेतुकेऽपि तदप्राप्तिरिति सूत्रं विवृतं भवति । इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वादिति सूत्रं व्याचष्टे ॥ अन्योन्येत्यादिना । न च वाच्यं विरलेष्वपि परमाणुषु विद्यमानः समुदायो मिलितेष्वेकैकापेक्षया व्यवह्रियत इति । सर्वक्षणिकत्वभङ्गापत्तेः । नित्यत्वे समुदायस्य न च तस्य वस्तुत्वं वाच्यम् । एको घट इति प्रत्ययविरोधात् । न च तस्य प्रत्ययस्यालम्बनं परमाणवः । तेषामनेकत्वादप्रत्यक्ष-त्वाच्च । न चावस्तुभूतसमुदायं परमाणवो मिलित्वा जनयन्तीति युक्तम् । तेषां समुदितपरमाणुजननस्वभावत्वात् । क्षणिकत्व-विरोधाच्च । समुदायप्रवाहस्याप्यनादित्वे प्रलयाभ्युपगमो व्याहतः स्यात् । एवं सति का हानिरित्यत आह ॥ सत्त्वइति । इन्द्रियासंयुक्तादर्थादिन्द्रियसंयुक्तार्थोत्पत्त्यनुपपत्तेः । अर्थासंयुक्तेन्द्रियोत्पत्त्ययोगाच्च । संयुक्तार्थेन्द्रियकारणकस्य ज्ञानस्योत्प-

त्तिर्न युज्यते। अघटज्ञानाद्धटज्ञानं च न स्यादित्यर्थः। कारणाद्विसदृशकार्योत्पत्तौ घटलक्षणादपि जटलक्षणोत्पत्तिः स्यादित्याह ॥ विशेषेति। कस्यापि कारणं स्यादिति शेषः। अदृष्टोपकृतं कारणं विलक्षणं कार्यं जनयेत्। को दोष इत्यत आह ॥ अदृष्टमिति। न ह्यनुपकर्तुरदृष्टादुपकर्त्रदृष्टोत्पत्तिर्युज्यते। न च क्षणविनाशिनः कारणस्य सहकार्याऽशेषविसदृशकार्यजनकत्वं युक्तम्। अधुना क्षणिकत्वमप्ययुक्तं सर्वस्येत्याह ॥विनाशोत्पत्तय इति। स एवायमिति प्रत्यभिज्ञाप्रत्यक्षस्य स्तम्भादीनां स्थायित्वग्राहकस्य क्षणिकत्वग्राहकानुमानेन बाधं मन्यमानश्चोदयति ॥ फलेति। अत्रायं प्रयोगः। यत्सत्तत्क्षणिकं यथा दीपादिः। सन्तश्च पञ्चस्कन्धाः। दीपस्यापि प्रतिक्षणमन्यत्वमनुमेयम्। परिमाणविशेषदर्शनात्। भिन्नपरिमाणत्वं भिन्नेषु दृष्टं घटादिषु तदेतद्दूषयति ॥ आकाशस्येति। अयमर्थः। यदि प्रत्यक्षसिद्धमपि जगतः स्थिरत्वमनुमानेन बाध्यं स्यात्। तर्हि प्रदीपादिरपि सत्त्वादाकाशादिवद्विशेषरहित इत्यनेनैवानुमानेन क्षणिकत्वसाधकपरिमाणादिविशेषरहितः स्यात्। ततस्तस्याक्षणिकत्वसिद्धिः। अनेनैवानुमानेन जगत्स्थिरं च स्यात्। ननु मूर्ताभाव एवाकाशः कथं तस्य सत्त्वमित्यत आह ॥यदिति। अभावो हीदमत्र नास्तीति धर्मिप्रतियोगिनावपेक्ष्यैव निषेधमुखेनैव प्रतीयते। आकाशस्य तु विधिमुखेन धर्मिप्रतियोगिनावपेक्ष्यैव प्रतीयमानत्वान्नाभावत्वम्। अतोऽदृष्टं। क्षणिकत्वादिकं स्वीकुर्वन्वस्तुतो दृष्टं स्थायित्वादिकं परित्यजन्नयं शाक्यः स्वतोऽप्युन्मत्तस्यैव समीचीनत्वं प्रकाशितवान्भवेत्। ननु न प्रतिज्ञया जगत्स्थायित्वं सिध्यति। यतः पूर्वं वस्तूत्तरस्मिन्वस्तुनि संस्कारमाधाय नश्यति। अतः पूर्वं वस्तुसदृशमुत्तरवस्तूत्पद्यते। तेन

पूर्वं यज्ज्ञातं तदिदमिति भ्रम इत्यत आह ॥ उत्तरेति । पूर्वं यज्ज्ञातं तत्सदृशमेतदमिति ज्ञानं तदिदमिति भ्रमो वा स्थिरस्यात्मनो घटते न तु क्षणिकस्य । न ह्यन्यावबुद्धवस्तुना सदृशज्ञानमभेदभ्रमो वाऽन्यस्य सम्भवति । तथा सत्यज्ञातगोरपि गोसदृशत्वज्ञानं गवये ज्ञातसर्पस्यापि सर्पज्ञानं रज्ज्वां स्यात् । पूर्वमनुमानज्ञानं क्षणिकात्मपक्षे दुर्लभम् । व्याप्त्याद्यनुसन्धातुरभावात् । अतोऽपि पूर्वक्षणाहितसंस्कारापादितसादृश्यवशात्सोऽहमित्यादिभ्रम इत्येतदयुक्तमित्याह ॥ कार्येति । न च क्षणिकस्य वस्तुनो वस्त्वन्तरमुत्पाद्य तस्मिन्संस्काराधायकत्वं युक्तम् । क्षणिकत्वभङ्गात् । पूर्वापरकलाभ्यां तन्निरूप्यमध्यकलया च हीनः कालविशेषो हि क्षणोऽभ्युपगतः । न हि तस्मिन्वस्तुनः स्वरूपलाभवद्विसदृशसंस्काराणां सादृश्यापादकत्वे घटसंहितसंस्कारवत्परसन्तातिगतसंस्कारस्यापि घटसंसृतौ सादृश्यापादकत्वप्रसङ्गः । इतोऽपि क्षणिकत्ववादोऽनुपपन्न इत्याह ॥ पूर्वेना वेति । अयमर्थः । किं पूर्वस्य वस्तुनः सद्भाव उत्तरं वस्तूत्पद्यते उत नाशानन्तरं । आद्ये पक्षे उत्तरतोत्तरघटाख्यकार्याणां क्षणमात्रपरिवर्तिनां स्वस्वकारणक्षणवर्तितया प्रथमे घटक्षण एवोत्पत्तिः स्यात् । ततश्च घटसन्तत्यभावःस्यात् । युगपदुत्पन्नानां कार्यकारणभावश्च न स्यात् । गोशृङ्गयोरिवाद्वितीये पक्षे विनाशव्यवहितत्वान्नोत्तरवस्तुकारणं पूर्वस्य वस्तुनःस्यात् । नियतपूर्वक्षणवर्ति हि कारणं न हेतुकस्योत्तरवस्तुन उत्पत्तिश्चाप्रामाणिकी यद्दीपादिवद्घटादेरपि क्षणिकत्वानुमानं तत्प्रत्यक्षविरुद्धं साध्यविकलदृष्टान्तश्चेत्याह ॥ अभेद इति । विशेषबलादेकस्यापि दीपस्य कालभेदाद्वृद्धिह्रासादिविशेषोऽनुभवसिद्धः । न च विरुद्धधर्माध्यासमात्रेण भेदो वक्तुं शक्यते वस्तुनः । क्षणिकस्यापि स्वस्वार्थक्रियायां समर्थ वस्त्वन्तरार्थक्रियायामसमर्थस्य शक्तत्वा-

शक्तत्वधर्माध्यासेन भेदापत्तेः। अत एव भविष्यदर्थक्रियायामिदानीमशक्तस्य पश्चाच्छक्तस्याप्येकत्वमविरुद्धं वस्तुनः। किञ्च यथा दीपस्य वृद्धिह्रासादिज्ञानं प्रमाणं तथैव स्थायित्वज्ञानमपि प्रमाणं किं न स्यादविशेषादित्याह ॥ विशेषेति। यथा विशेषदर्शनं मानं दिगादिसत्त्वज्ञानमप्येवं किं स्यादित्याह ॥ दिगिति। यदि सद्वस्तु किमप्यङ्गीकृतं तद्वदाकाशस्य भावत्वमाकाशवद्दिक्सुखयोश्च विधिप्रत्ययवेद्यत्वमविशेषादित्यर्थः। एवं वैभाषिकसौत्रान्तिकयोर्मतमविशेषदूषितम्। अधुना सौत्रान्तिकेन यदन्यदभ्युपगतं नीलपीतादिकं ज्ञानमेव प्रत्यक्षं तेन स्वीकारार्थकयाऽनुमेयोऽर्थ इति तद्दूषयति ॥ विश्वमिति। न च ज्ञानेनार्थोऽनुमेय इति वाच्यम्। अर्थेन ज्ञानमनुमेयमित्यपि वक्तुं शक्यत्वादात्मनः क्षणिकत्वाङ्गीकारात्। तत्र च कृतहान्यादिदोषापत्तेः। अतो द्वयमेतत्त्याज्यमेव ॥ ७ ॥ अधुना ज्ञानार्थाभाववादिनः कल्पितजगत्कारणत्वं च शून्यं वदतो बौद्धैकदेशिनो माध्यमिकस्य मतं दूषयितुमुपन्यस्यति ॥ अपर इत्यादिना इति ब्रूत इत्यन्तेन। स्वयंभातमित्यपरप्रकाश्यमनन्तवस्तुतः स्वव्यतिरिक्तवस्तु शून्यमित्यर्थः। अत्रैतन्मतनिरासकं सूत्रम् ॥ नासतोऽदृष्टत्वादिति। तद्व्याचष्टे ॥ नासत इत्यादिना। नासतो जगत्कारणत्वमनुमातुं शक्यते। दृष्टान्ताभावात्। न हि दृष्टाननुसार्यनुमातुं युक्तम्। असतः कार्यजनकत्वे स्वसमरसाभावादेव सृष्ट्यादिकार्यसिद्धौ मधुरादिषु प्रवृत्तिवैयर्थ्यं स्यादित्याह ॥ यद्येवमिति। अपि च। इदमस्मिन्देश इदमस्मिन्काले भवत्वित्यभिसन्धाय देशकालभेदेन वस्तु व्यवस्थापयितुं न हि बुद्धिशून्यं शक्नोति सर्वधर्मरहितत्वाभ्युपगमादित्याह ॥ देशेति। अपि च। विमतं पुरुषोद्भूतं कार्यत्वाद्घटवदित्यनुमानपराहतं सर्वस्य शून्याद्भुतत्वमित्याह ॥ पुरुषेति। ननु सर्वस्यैवाभावात्कथं ॥२१॥

तस्य शून्योद्भूतत्वं निषिद्ध्यत इत्याशङ्क्याह ॥ नचेति । यद्यनुभूयमानमपि विश्वं नास्तीत्युच्यते तर्ह्यनुभूयमानत्वाविशेषान्नास्तीति वचनमपि नास्तीति स्यात् । तदा विश्वमस्तीति वचनं सत्यं स्यात् । अभावस्याभावात् । एतेन नाभाव उपलब्धेरिति सूत्रं विवृतम् । अधुना सदित्युपलब्धमपि स्वाप्नगजादिकमविद्यमानमेव तद्वदिदमपि विश्वं सांवृतसत्यमेव न वस्तुभूतमित्याशङ्कते ॥ स्वप्नेति । युक्तं स्वाप्नगजादेरवास्तवत्वं तदुत्तरकाले बाधदर्शनाद्विश्वस्य तद्बाधादर्शनान्न भ्रान्तित्वमिति परिहरति ॥ किञ्चेति । ननु शुक्तिरजतवद्विश्वस्यापि प्रतीत्युत्तरकाले ज्ञानेन निवृत्तिर्भवतु को दोष इत्याशङ्क्याह ॥ अनादेरिति । यद्यनादिनो वर्तमानस्यापि विश्वस्य ज्ञानेन निवृत्तिरनुमीयते तर्हि तस्यापि निवृत्तिः सादिमत्याः सुतरां निवृत्तिरनुमीयते । पदार्थत्वेन विश्ववद्भ्रान्तिविषयत्वप्रसङ्गात् । न हि दृष्टस्य विश्वस्य भ्रान्तिविषयत्वं निवृत्तेरदृष्टाया अभ्रान्तिविषयत्वमिति सम्भवति । तथात्वे हि दृष्टविषाणानां गवादीनामशृङ्गित्वमदृष्टविषाणानां शशानां शृङ्गित्वं स्यादित्यर्थः । देशकालादिनियमो न हि शून्यासतोर्भवेदित्युक्तम् । तन्न । विमतं मिथ्या दृश्यत्वात्स्वप्नवदित्यनुमानेन बाधादित्याशङ्क्य परिहरति ॥ दृश्यत्वादिति । यदेतत्प्रपञ्चस्य मिथ्यात्वानुमानं तदपि किं दृश्यत्वेन मिथ्या सत्यं वा । यदि मिथ्या तर्हि विश्वं सत्यं स्याद्बाधकाभावात् । यदि सत्यं तर्हि तत्र व्यभिचारित्वेन दृश्यत्वहेतुरसाधकः स्यात् । अपसिद्धान्तश्च स्यात् । शून्यव्यतिरेकेण सत्यत्वाङ्गीकारे दृश्यत्वानुमानस्यापि मिथ्यात्वे प्रपञ्चस्य मिथ्यात्वसाधकं न सिद्ध्यतीत्याह ॥ साधकत्वमिति । यद्यसत्यमानस्य साधकत्वं सत्यमानानभ्युपगमादसत्यमानान्तरेण साध्यते । तर्हि तस्याप्यसत्यमानान्तरेण

साधकत्वं साध्यं विप्रतिपन्नत्वादित्यनवस्था। इतोऽपि नानुमानात्प्रपञ्चमिथ्यात्वमित्याह ॥ सत्त्वं चेति। प्रपञ्चस्य सत्यत्वं ह्यनुभवसिद्धम्। अतो मिथ्यात्वे यदनुमानादिकं तद्बाधितविषयमित्यर्थः। ननु प्रत्यक्षानुभवो विश्वस्य वर्तमानकालीनं सत्त्वं गृह्णाति। अनुमानं तु भविष्यत्कालीनां निवृत्तिं गृह्णाति। अतो न बाध्यबाधकभाव इत्यत आह ॥ अतोतेति। प्रत्यक्षादिविषयस्य विश्वस्य त्रैकालिकसत्त्वं साक्षिणा गृह्यत इति साधितमधस्तात्। अतो न भविष्यद्बाधोऽनुमातुं शक्यते। ननु दृष्टस्य त्रैकालिकाबाध्यत्वे स्यादिदं रजतमिति दृष्टस्य शुक्तिरजतस्याप्यबाध्यत्वप्रसङ्ग इत्यत आह ॥ दृष्टेति। शुक्तिरेव दृष्टाऽन्यसादृश्याद्रजतं दृष्टवदवभासते न तु मुख्यतो दृष्टम्। न ह्याशामोदकतृप्तिरपि तृप्तिर्भवति। अत एव विश्वमिथ्यात्वसाधने शुक्तिरजतादिदृष्टान्तः साधनविकलो भवति। मुख्यतस्तत्र दृश्यत्वाभावादित्यतोऽपि न शुक्तिरजतसाम्यं समर्थक्रियाकारिणः प्रपञ्चस्यासांवृतत्वादित्याह ॥ भ्रान्तेरिति। न हि कुत्रचिद्भ्रान्तस्य सांवृतसत्यत्वं सांवृतसत्यस्य वा भ्रान्तत्वमभ्युपगतम्। शून्यवादिनाऽपि पृथक् परिभाषितत्वात्। अस्मदभ्युगतसत्त्वमपि शुक्तिरजताद्वैलक्षण्यमेव प्रपञ्चस्य। ननु प्रतीतिमात्रपरिवर्तिनो भ्रान्तिविषयात्सांवृतसत्यस्य शून्यज्ञाननिवर्त्यमानत्वमेव विशेषो नान्यः। भ्रान्तिविषयवत्प्रतीतत्वेन प्रपञ्चस्यापि स्वविषयज्ञानव्यभिचारानुमानेनोत्तरकालीनबाधसिद्धेरित्याशङ्क्याह ॥ ज्ञानादिति। एतदनुमानस्यापि प्रतीतत्वेन स्वविषयज्ञानव्यभिचारः स्यात्। ततश्च प्रपञ्चस्य स्वविषयज्ञानाव्यभिचारग्राहकप्रमाणाभावादव्यभिचारः सिध्यतीत्यर्थः। अत्र चोदयति ॥ भेद इति। अयमर्थः। पञ्चभेदात्मकः प्रपञ्चोऽभ्युपगतः। स च भेदस्य निरूपयितुमशक्यत्वादवस्तुभूतो भवेत्। तद्द्वयमनयोर्भेद इति विशेषणविशेष्य-

भावापेक्षया भेदसिद्धिर्विशेषणविशेष्यभावश्च भेदसापेक्ष इदमस्माद्भिन्नमिति । धर्मिप्रतियोग्यपेक्षया भेदसिद्धिर्भेदापेक्षश्च धर्मिप्रतियोगिभाव इतीतरेतराश्रयतया न कथञ्चिद्भेदो निरूपयितुं शक्यत इति ॥ न तदिति । यदि धर्मादिप्रतीतिरन्याभेदप्रतीतिश्चान्या तर्हीतरेतराश्रयत्वं भवेत् । न त्वेतदस्ति । वस्तुस्वरूपत्वाद्भेदस्य धर्मिणि गृहीते प्रतियोगिनि च तद्भेदग्रहणसम्भवात् । अन्यथाऽयं घटो वा पटो वेति संशयःस्यात् । नन्वयमस्माद्भिन्न इति व्यवहारोऽगृहीतभेदत्वाविशेषे स्वरूपयोः परस्मादितिवत्स्वस्मादयं भिन्न इति व्यवहारः किं न स्यादित्याह । अन्यथेति । अतः पूर्वं धर्मिप्रतियोगिप्रतीतिः पश्चाद्भेदप्रतीतिरिति प्रतीतिद्वयासम्भवादेकयैव प्रतीत्या धर्मधर्मिप्रतियोगितद्भेदा गृह्यन्त इति नेतरेतराश्रयदोष इत्याह ॥ धर्मित्वेति । घटस्यैतावतैव सामान्येन स्वेतरसर्ववस्तुभ्यो भेदसिद्धावपि घटाद्भेद इति विशेषाकारमवलम्ब्य व्यवहार इत्याह ॥ स्वरूपेणेति । न घटस्वरूपत्वे भेदस्य घटस्य भेद इति व्यवहारो न युक्त इति घटस्य स्वरूपमितिवदुपपत्तेः । एकस्मिन्नपि विशेषाङ्गीकारात् । इतोऽपीतरेतराश्रयणत्वेन भेददूषणमयुक्तं स्वव्याहतत्वेन जात्युत्तरत्वात् । तथा हि । यदि भेदादितरेतराश्रयत्वस्वरूपस्याभेदस्तर्हि भेददूषणेनेतरेतराश्रयत्वमपि दूषितं स्यात् । ततश्च दूषणाभावाद्भेदसिद्धिः स्यात् । यदि भेदादितरेतराश्रयत्वस्य भेदोऽङ्गीक्रियते तर्हि ततोऽपीतरेतराश्रयत्वं स्यादित्याह ॥ किञ्चेति ॥ एवं माध्यमिकमतस्य दूषणेनैव मायावादिमतमपास्तं भवति तयोरविशेषादित्याह ॥ एतादृशस्येति । मायिमाध्यमिकमतयोरविशेषमुपपादयति ॥ यच्छून्येति । सच्चिदानन्दात्मत्वं नामानृतजडादिविरोधित्वमेवाङ्गीकृतं ब्रह्माणि मायिना । एतच्चापोहवादिना माध्यमिकेन शून्येऽपि स्वीकृतम् । निर्वि-

शेषत्वाभ्युपगमात् । न ब्रह्मणः शून्यस्य च परस्परं मतभेदो निरूपयितुं शक्यते मायिना शून्यवादिना । किंच स्वमतस्यापि मिथ्यात्वाङ्गीकारान्मायिमाध्यमिकाभ्यां तस्य दूषणं मृतमारणतुल्यम् । अत एव वैधर्म्याच्च न स्वप्नादिवदित्यनायासेन निराकरणं कृतं सूत्रकृतेत्याह ॥ स्ववाक्यस्येति । सूत्रगतचकारार्थमाह ॥ चेति । यतो विश्वकृता सूत्रकारेणैव स्वप्नसाधर्म्ये विश्वस्य दृष्टिविरुद्धप्रमाणकं चेति चकारेण सूचितम् । अतो मायिमाध्यमिकमतं परित्याज्यमेवेत्यर्थः ॥ ८ ॥ अधुना भेदार्थज्ञानवादिनो योगाचारस्य बौद्धैकदेशिनो मतं निराकर्तुमुपन्यस्यति ॥ ज्ञानमित्यादिना । संवृतिर्विभूतिष्वन्तःकरणेषु ज्ञानस्य प्रतिक्षणं भेदः प्रतिदेहं सम्भवति । भेदश्च भ्रान्त्या भासत इत्युपन्यस्तम् । ज्ञानाद्वैतमतं दूषयति ॥ इत्येतदिति । यदि ज्ञानार्थयोरभेदः स्यात्तर्ह्यहं घट इति प्रतीतिः स्यात् । न त्वयं घट इति । किञ्चास्मिन्मते आशामोदकतृप्तानामुपाहृतमोदकतृप्तानां च रसवीर्यविपाकादितौल्यं स्यात् । अनेन भावोऽनुपलब्धेरिति सूत्रं व्याख्यातं भवति । न हीन्द्रियार्थसंयोगभेदेनान्यथादित्युपपद्यते । ज्ञेयस्य स्थायित्वं प्रतिपादितमतोऽपि न तयोरैक्यमित्याह ॥ क्षणिकत्वादिति । अनेन क्षणिकत्वाच्चेति सूत्रं व्याख्यातं भवति । एवं निराकृतांश्चतुरो बौद्धपक्षानुपसंहरति ॥ सर्व श्रुतीति । अतो बौद्धमतावष्टम्भेन नोक्तसमन्वयापक्षेप इति सिद्धम् ॥ ९ ॥ अथ वेदबाह्यमतनिराकरणप्रसङ्गाज्जैनमतं निराकर्तुमुपन्यस्यति ॥ आर्हता इति । जैनैस्तावत्क्षणिकमेव सप्तप्रकारमभ्युपगतम् । सत्स्यादसत्स्यात्सदसत्स्यात्सदसद्विलक्षणं च स्यात्सदसच्च तद्विलक्षणं च स्यात्तदुक्तमेतन्न स्यात्स्याच्चेति । तदेतद्दूषयति ॥ नैतदिति । स्वरूपेण सत्त्वमन्यरूपेणासत्त्वमेव पदार्थस्य युक्तम् । न तु स्वरूपेणैव

सदसत्त्वादिकमनुभवविरुद्धत्वात् । सत्त्वे वस्तुनोऽसत्त्ववादिनोक्तदोषपरिहारायासत्त्वं स्वीकृतम् । तत्रोक्तदोषपरिहाराय सदसद्विलक्षणं च स्वीकृतम् । तत्रोक्तदोषपरिहाराय पक्षान्तरं स्वीकृतम् । तत्राप्येवमिति सप्तभङ्गीस्वीकारे सर्वपक्षोक्तदोषसमुदायः स्यादित्याह ॥ तत्तद्दोषेति । तस्मात्स्वरूपेणैव सदसत्त्वादिसप्तप्रकारवत्त्वमेकस्याशेषमानविरुद्धत्वान्निष्प्रमाणकत्वात्स्वव्याहतत्वान्न सम्भवतीत्याह ॥ अतिहार्येति । अमग्रहोऽप्रमाणग्रह इत्यर्थः । अनेन नैकस्मिन्नसम्भवादिति सूत्रं व्याख्यातं भवति । अधुना क्षपणको यदन्यदभ्युपगतवान् कायपरिमाणो जीव इति तदनूद्य दूषयति ॥ चक्त्रीति । देहपरिमितत्वे जीवस्याश्वशरीरपरिमितस्य कर्मवशाद्गजशरीरगतस्य तद्व्याप्यवर्तनं स्यात् ततश्च गजदेहैकदेशस्य चेष्टा न स्यादनात्मकस्य । यद्यप्यल्पमहदादिशरीरेषु सङ्कोचविकासाभ्यां व्याप्तिरङ्गीक्रियते जीवस्य तर्हि विकारित्वं स्यात् । ततश्च यद्विकारि तदनित्यमित्यभ्युपगमादनित्यत्वं स्यात् । स्वमते तु विकारमात्रेणानित्यत्वानभ्युपगमान्नानित्यत्वम् । जीवस्य ज्ञानह्रासवृद्ध्यादिविकारवतोऽपीत्याह ॥ नानित्यतेति । लक्षणनिवृत्त्यैव विशेष्यवस्तुनो निवृत्तिरभ्युपगता । न च चैतन्यलक्षणं कदाचिन्नश्यति । अतो नानित्यत्वं चेतनस्याशङ्क्यम् । पटगजादेरप्योतमोतात्मकत्वादिलक्षणनिवृत्त्यैव नाशित्वं भवेत् । चलनादिविकारमात्रेण नाशित्वेन च जीवगजादेरपि नाशित्वंप्रसङ्गः । अतो कृतकत्वेनैव नाशित्वं वस्तुव्याप्तम् । कतिपयावयवविगमागमादिना विकारेण वस्तुनो नाशे प्रत्यभिज्ञाविरोधः । न हि छिन्नपुच्छकर्णो वा कृशो वा पुष्टो वा श्वा न प्रत्यभिज्ञायते । अनुमीयमाने साधने व्यभिचारः स्यात् । रूपादिकमपि भौतिकमेव नाशित्वेन व्याप्तमतो रूपव-

तोऽपि जीवस्य नानित्यतापत्तिः। न चैवमभ्युपगन्तुं शक्यं क्षपणकेनेत्याह ॥ नैवमिति। यद्विकारवद्यद्रूपादिमच्च तत्तदनित्यमिति व्याप्तिबलेन हि जगतः प्रलयोऽभ्युपगतस्तेन न मानान्तरं वक्तुं शक्यम्। अपौरुषेयागमानभ्युपगमात्। अतो विकारित्वेनानित्यत्वं दुर्निवारं जीवस्य तन्मते। न च निर्विकारत्वं वक्तुं शक्यम्। मुक्तस्यापि सन्ततोर्ध्वगमनलक्षणविकाराभ्युपगमात्। ननु सर्वावयवसन्निवेशविश्लेषलक्षणविकारस्यैवानित्यत्वसाधकत्वमभ्युपगतं न विकारमात्रस्यातो नानित्यत्वसाधकत्वमात्मनः प्रसज्यते। सर्वावयवसन्निवेशविश्लेषलक्षणविकाराभावादिति चेन्नैवम्। भूभूधरादीनामपि नित्यत्वप्रसङ्गात्। सर्वावयवविश्लेषलक्षणविकारानुपलम्भात्तेषामतो विकारमात्रस्यानित्यत्वसाधकत्वमभ्युपगन्तव्यमेवेति नोक्तदोषपरिहारः परमते। यच्चान्यदभ्युपगतं तेनोद्भिज्जादीनां नियामकत्वं तच्च दूषयितुमाह॥ देहमान इति। ननु देहपरिमित एवात्मा। तत्र पूर्वंकल्पशरीरपरिमितस्य पश्चाद्वृक्षादिशरीरपरिमितत्वे वृद्ध्यादिविकारप्राप्तेर्न वृक्षादेः सात्मकत्वमिति चेन्नैवम्। एवं सति हस्त्यादेरपि निरात्मकत्वप्रसङ्गात्। आत्मनस्तावद्देहव्याप्त्या भाव्यमेव। तत्र पूर्वमल्पशरीरमितस्यात्मनः पश्चाद्धस्त्यादिशरीरपरिमितत्वे वृक्षादिशरीरमितत्वेन हि वृक्षादिविकारे विशेषो वक्तुं शक्यते। वृक्षादेः सात्मकत्वमात्मलिङ्गैः साधयति॥ गीतादिति। गीतात्पुष्पादिवन्निष्पेषादिना पुष्पादिनियमदर्शनात्। धूमविशेषाधित्रासेनारोग्यपुष्पाढ्यतावदतिशीतोष्णस्पर्शतो ग्लानिदर्शनात्। क्षितिरसाद्युत्पादनेन वृद्धिक्षतभग्नप्ररोहणदर्शनात्सात्मकत्वमेव वृक्षादीनाम्। न ह्यचेतनस्य शब्दादिवेदनं सम्भवतीत्यर्थः। एवं चात्मा कार्त्स्न्यं न च पर्यायादप्यविरोधो विकारादिभ्य इति सूत्रारूढोऽयं प्राक् प्रपञ्चितोऽर्थ इत्याह॥ एवमिति॥ अतो न

क्षपणकपक्षावष्टम्भेनापि वैदिकसिद्धान्ताक्षेप इति सिद्धम् ॥ १० ॥ अधुना पाशुपतादीनां रुद्रस्यैव जगत्कारणत्ववादिनां मतमुपन्यस्य बहुश्रुतिविरुद्धत्वेन नोपादेयमित्याह ॥ सर्वज्ञत्वेति । बहुश्रुतिविरोधं दर्शयति ॥ अस्त्येत्यादिना । अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावदिति । हविर्भिराराधितो विष्णोः प्रसादाद्रुद्रो रौद्रं महत्त्वं विदे लभत इत्यर्थः । स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहन्तुमुग्रम् । मृला जरित्रे रुद्रेति । मृगमिव भीमं श्रीनृसिंहं हृद्गर्तसदने भो रुद्र त्वं स्तुहीत्यर्थः । रुद्रस्य त्वेव धनुरार्तिः शिर उत्पिपेषेति । रुद्रस्य शिरो धनुष्कोटिरुत्पिपेष चिच्छेदेत्यर्थः । कुमाराश्चित्पितरं वन्दमानं प्रति नानामरुद्रोपयन्तम् । भूरेर्दातारं सत्पतिं गृणीषेति इः । भो रुद्र बहुतरस्यापेक्षितस्य दातारं सत्पतिं विष्णुं गृणीषे स्तौषीत्यर्थः । तव श्रिये मरुतोऽमर्जयन्त रुद्र यत्ते जनिम चारुचित्रम् । पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनामिति । भो रुद्र यस्माद्विष्णोः पदं त्वया हृदि निधायि तेन कारणेन गोनां वाचां गुह्यं नारायणेति नाम जपोपदेशादिना पालयसीत्यर्थः । अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ । इति । रुद्राय हन्तवे रुद्रं हन्तुम् । अहं धनुरातनोम्याकर्षामीत्यर्थः । यं कामये तं तमुग्रं कृणोमिति यं यमुग्रं कर्तुं कामये तं रुद्रं कृणोमि करोमीत्यर्थः । मा शिश्नदेवा अपि गुर्ऋतं न इति लिङ्गदेवाः शिश्नदेवा भूतभविष्यद्वर्तमानरुद्रा नोऽस्माकं ऋतं ब्रह्म मागुर्नाविगच्छन्तीत्यर्थः । स्कान्दे च । न त्वं वेत्सि । न वेत्तीन्द्रो नाहं वेद्मि न शङ्करः । वेत्ति पारं महत्त्वस्य हरेरद्भुतकर्मण इति । ननु शिश्नदेवा अभिवर्पसाऽभूदिति ।

शिश्नदेवान् । रुद्रान् घ्नन्मारयन्नर्पसा तेजासाऽभ्यभूत्परेश इत्यर्थः । एको नारायण आसीन्न ब्रह्मा न च शङ्कर इति स्पष्टार्थः । सन्तुष्टः सम्प्रसन्नो यद्दृष्टः सम्प्रसन्नस्तस्माद्रुद्र सम्प्रसादावभूतां न ह्यग्र एता भूतानीति । विष्णुकोपप्रसादाज्जातौ रुद्रचतुर्मुखावित्यर्थः । शान्तिपर्वणि च । नमोऽतिशयसे तस्मै देहिनां परमात्मने । नारायणाय विश्वाय निर्गुणाय गुणात्मने । यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः । एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । नारदेशितपन्थानौ सृष्टि-संहारकारणाविति । देवा वै सत्रमासत रुद्रियं परिमितं पश्यामः । तेऽब्रुवन् यन्नः प्रथमः पश्येत्स एषां मखं वैष्णवं यश आर्च्छदिति । तेषां देवानां वैष्णवमखशब्दवाच्यो रुद्रो यश आर्च्छदाहरदित्यर्थः । तस्य हि गले तारस्य बन्धधनुषो धनुर्ज्यायशः हर्तुकामेनेन्द्रेण छिन्नेत्युपरिश्रूयते । तस्येन्द्रो वज्ररूपेण धनुर्ज्यामच्छिनत्स्वयामिति । तत एव रुद्रशिरश्छिन्नम् । यज्ञेन यज्ञमयजन्त देवा इति यजमानसाधनत्वाद्यज्ञेन वैष्णवमखाभिधेन रुद्रेण यज्ञं विष्णुमयजन्त देवा इत्यर्थः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुमिति । देवाः पुरुषमयं यागं कुर्वाणा रुद्राख्यं पुरुषं पशुमबध्नन्नित्यर्थः । यो भूतानामधिपती रुद्रस्तन्तीचरो वृषेति । भूपती रुद्रो वृषा विष्ण्वाज्ञालक्षणतन्त्या बद्धश्चरतीत्यर्थः । एताभिः श्रुतिभिः पशुपतेरनीश्वरत्वप्रकरणं किं प्रतीयत इत्याह ॥ इत्यादीति । स्तोतृत्वादिश्रवणेन पारतन्त्र्यमवगन्तव्यं पशुपतेः । प्रलये भवोभाव इत्यर्थः । अनेन पत्युरसामञ्ज स्यादिति सूत्रं व्याख्यातं भवति । यद्यशरीरत्वान्न जगज्जन्मादिमत्त्वं पशुपतेः सम्भवतीत्युच्यते तर्हि जगत्कारणत्वं न स्यात् । अशरीरत्वेन परिदृष्टकारकप्रयोक्तृत्वासम्भवात् । देहवत एव विज्ञानचिकीर्षाप्रयत्नवतः कर्तृत्वं दृष्टं कुविन्दादेः । यदि

विश्वोत्पादनमचेतनमेव पशुपतेः शरीरमङ्गीक्रियते तर्हि तद्विकारेण पशुपतेरपि विकारित्वं स्यात् । ततश्च हर्षविषादौ स्यातां तदेतदाह ॥ अशरीरेति । इतोऽपि न जगत्कर्तृत्वं पशुपतेरधिष्ठानरहितत्वादित्याह ॥ अधिष्ठान इति । ननु शरीरवतः कर्तुरधिष्ठानेन भाव्यम् । अशरीरस्य पशुपतेःकिमधिष्ठानेनेत्याह ॥ अदेह इति । अदेहस्याज्ञत्वेनाकर्तृकत्वं दुष्परिहरमेव । एतद्दूषणपरिहाराय पशुपतेर्देहवत्त्वाभ्युपगमे यज्ञदत्तवन्मृतिरपि स्यादित्याह ॥ देहीति । अतो बहुतरप्रतिकूलतर्कपराहतत्वान्ना-नुमानमूलकः पाशुपतागमः पशुपतेर्जगत्कर्तृत्वसाधकः । यत्सम्बन्धानुपपत्तेश्चेत्यादिसूत्रोक्तदूषणं पाशुपतागमवेद्यस्य पशुपतेर्जगत्कर्तृत्वे तदखिलं विष्णोरपि किं न स्यादित्याशङ्क्य परिहरति ॥ न चैतदिति । देहवत्त्वाभ्युपगमान्नादेहवत्त्व-प्रयुक्तदूषणं जगत्कर्तुर्विष्णोर्देहस्य च ज्ञानानन्दादिगुणात्मकत्वाभ्युपगमान्न भौतिकदेहयुक्तदूषणं च वक्तुं शक्यमित्यभिप्रायः । अप्राकृतदेहवतो विष्णोर्जगत्कर्तृत्वं श्रुतिभिः साधयति ॥ मनोबुद्धीत्यादिना । बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां भगवतो लक्षयामहे बुद्धिमान्मनोवानङ्गप्रत्यङ्गवानिति । यदात्मको भगवांस्तदात्मिका व्यक्तिः । किमात्मको भगवान् । ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मकः । वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । तस्माद्विराळजायतेत्यादेरप्राकृतनित्यविग्रहस्वरूपाद्विष्णोर्जगदुत्पत्तिः प्रतीयते । ज्ञानज्ञानः सुखसुख इति प्राकृतेन्द्रियजन्य-ज्ञानसुखो न भवति किन्तु विशुद्धज्ञानघन इत्यर्थः । न च शाश्वताप्राकृतदेहवत्त्वादिमाहात्म्यं पशुपत्यादेरप्यस्त्विति वाच्यम् । परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति । न ते विष्णो जायमानो न जातो देव महिम्नः परमं

तमापेति श्रुतिविरोधात् । नन्वेकस्यैव विष्णोर्देहदेहिभावादिकं विरुद्धमित्यत आह ॥ मानत्वादिति । ननु शिवस्यापि जगत्स्रष्टृत्वं श्रूयते श्वेताश्वतरश्रुतौ । विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवेष्टितारम् । ज्ञात्वा शिवं शान्तिमत्यन्तमेतीत्याह ॥ शिवेति । शिवादिनाम्नां विष्णुविषयत्वे प्रमाणमाह ॥ नामानीति । नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति । यो देवानां नामधा एक एव । विष्णुनामानि नान्यस्येत्यादिश्रुतिभिर्हरावेव सकलश्रुतिसमन्वयस्योक्तत्वाच्च । शिवादिनामयुक्तश्रुतीनां विष्णावेवातिमुख्यतयोपपन्नत्वात् । न रुद्रादेर्जगत्कर्तृत्वप्रतिपादकत्वं सम्भवतीत्यर्थः । अपरे तदन्यवाचिशब्दा इत्यर्थः । नापि लैङ्गादिपुराणानि पाशुपतागममूलानि रुद्रस्य जगत्कारणत्वे प्रमाणानि । वैष्णवपुराणेतिहासादिभिरुक्तप्रकारेण श्रुतिभिश्च विरुद्धत्वाद्रुद्रस्य सर्वोत्तमत्वं प्रक्रम्य क्वचिद्विष्णोरेव सर्वोत्तमत्वप्रतिपादनेन परस्परविरुद्धत्वाच्च । शिवविष्णुपक्षपातित्वेन मध्यस्थैर्ब्रह्मणः पुराणादिभिर्वेदानुसारिभिर्विरुद्धत्वात् । न हि बहुतरप्रमाणविरुद्धार्थे प्रवर्तमानं भवति । न च शैवादिपुराणवद्वैष्णवपुराणेषु देवतान्तरोत्कर्षकथनमस्ति । यत्र क्वचिद्विचारितं प्रतिभाति तदेप मोहं सृजामीति मोहनार्थमित्युक्तं श्रीविष्णुना वाराह पुराणे । यदि शैवादिपुराणमपि दर्शनान्तरसिद्धरुद्रस्य सर्वोत्तमत्वं पूर्वपक्षयित्वा विष्णोरुत्कर्षमेव तात्पर्यतः प्रतिपादयतीत्युच्यते तदाऽङ्गीक्रियत एव । तस्मादालोड्य सर्वशास्त्राणि विचार्य च पुनःपुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा । सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात्परं नास्ति न दैवं केशवात्परमिति बहुतरप्रमाणेषु श्रवणात्सकलकल्याणगुणाकरो विष्णुरेव । तदेतदाह ॥ पुराणानीति । प्रधानमल्लनिबर्हणन्यायेन पाशुपतपक्षनिरा-

करणेन स्कन्दादिप्रधानकमतान्यपि निराकृतानि भवन्ति । न हि पशुपतेरीश्वरत्वनिराकरणयुक्त्या स्कन्दसूर्यादीनामीश्वरत्वं निराकर्तुमशक्यमित्याह ॥ स्कन्देति ॥ ११ ॥ शाक्तेयमतं युक्त्यन्तरेण निराकर्तुमुपन्यस्यति ॥ महतीति । एतन्मतं दूषयति ॥ तन्नेति । न पुरुषविरहितया देव्या रुद्रादिजगत्प्रसवितृत्वं युज्यते । न हि कुत्रचित्स्त्रीपुरुषानुपकृताऽपत्योत्पत्त्यादिका दृष्टा । परमपुरुषस्तु केवलोऽप्यण्डजादेरुत्पादनसमर्थो द्रोणस्येव भरद्वाजः । न च वाच्यं शक्तेः शिवः सहायोऽस्तु जगदुत्पादादाविति । जगदादौ देहेन्द्रियरहितस्याशक्तत्वेन सहायत्वायोगात् । न च वाच्यं नित्यसर्वज्ञत्वं सर्वशक्त्यादिमत्त्वं शिवस्याप्यस्तीति । तस्मादेव जगतोऽप्युत्पत्तिसम्भवेन च शक्तिकारणत्वभङ्गापत्तेः । एवमुत्पत्त्यसम्भवात् न च कर्तुः कारणमित्यादिसूत्राणि व्याख्याय तेषामधुना भागवतमतनिराकरणपरत्वं यत्परैरुक्तं तदनूद्य दूषयति ॥ पञ्चरात्रेति । न च पाशुपतवत्पञ्चरात्रमप्रमाणमिति वाच्यम् । पञ्चरात्रस्य कृत्स्नस्येत्यादिभारतवचनविरोधात् । ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यत इत्यस्यार्थः । साङ्ख्यं योगः पाशुपतमित्युपक्रान्तेषु पाशुपतादिषु ज्ञानशब्दोक्तेष्वेतत्पञ्चरात्रमेव प्रमाणत्वेन विशिष्टमिति । अर्जुने विमनस्के वै गीता भगवता स्वयमिति भारत एव भगवद्गीता नारायणप्रोक्तकृत्स्नपञ्चरात्रनिषेधः सूत्रारूढ इति प्रलाप इत्याशयः । अपिच । पञ्चरात्रविदो मुख्या इति प्रकृतपञ्चरात्रविषयत्वेन ऋषीनुवाच तान्सर्वानदृश्यः पुरुषोत्तमः । कृतं शतसहस्रं हि लोकानां हितमिति श्लोकशब्दः प्रयुक्तः । शान्तिपर्वणि श्लोकशब्देन च ऋग्वेदो यजुर्वेदः सामाथर्वाङ्गिरस इतिहासपुराणं विद्योपनिषदः श्लोका इति पञ्चरात्रस्य गृहीतत्वात्तस्यैव वेदो यजुर्वेदः सामवेद एकायनं दैवविद्येति श्रुत्यन्तरे चैकायनशब्देन ऋगादिवत्प्रमाणत्वेन

पञ्चरात्रस्य स्वीकाराच्च । वेदैश्च पञ्चरात्रैश्चेत्यादिश्रुतिभिश्च पञ्चरात्रप्रामाणस्य सिद्धत्वात्तन्निषेधः कर्तुमशक्य इत्याह ॥ श्लोक इत्यादिना । न च वाच्यं वासुदेवात्सङ्कर्षणो नाम जीवोऽजायत इति पञ्चरात्रमतं । नित्यस्य जीवस्योत्पत्तिकथनं श्रुतिसूत्रविरुद्धमिति ॥ ज्ञोऽतएवेति सूत्रेणास्मादात्मनः सर्व एत एवात्मनो व्युच्चरन्तीति श्रुत्या च जीवोत्पत्तेः कथ्यमानत्वात् । यद्यप्यजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीर इत्यादिवचनानुरोधेन देहोपाधिकोत्पत्तिरुच्यते जीवस्य न त्वभूत्वाभवनमित्यभ्युपगम्यते तर्ह्यनादिकर्मणा बद्धोजीव इत्यादिपञ्चरात्रवचनानुरोधेन जीवोऽजायत इति वचनेऽपि तथैवाभ्युपगम्यतां केनचिद्देहातिरिक्तजीववादिना तदेतदाह ॥ उत्पत्तिरित्यादिना । अधुना वासुदेवात्सङ्कर्षणो नाम जीवोऽजायत इत्यादेः परवादिभिरज्ञातं पञ्चरात्राभिप्रेतमर्थमाह ॥ जिवाभिमानिनीति । न च भगवान् शाण्डिल्यः षडङ्गवेदमधीत्य तास्मिन्महत्याम्नाये निकाममनधिगच्छन्यः सर्वपरो धर्मो यस्मान्न भूयोऽस्ति कथं तं विद्यामित्येवं बलवद्विवेकमातिष्ठमानो बभूव । तत्र भगवते शाण्डिल्याय भगवता सङ्कर्षणेन व्यक्तेन शब्दवच्छास्त्रं प्रोक्तमिति । यत्पञ्चरात्रमतं वाक्यं तत्पञ्चरात्रा इति वेदार्थस्य ज्ञातुमशक्यत्वाद्वेदोपबृंहिकत्वेन पञ्चरात्रं शाण्डिल्येनाधिगतमित्येवमर्थम् । यथा हि भारतवाक्यम् । यदि विद्याच्चतुर्वेदान्साङ्गोपनिषदान्द्विजः । न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः । इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यतीति । वेदाद्वेदार्थस्येतिहासपुराणाभ्यां विज्ञातुं शक्यत्वात्ताभ्यां वेदः समुपबृंहणीय इत्येवमर्थयति । शाण्डिल्यवर्तने न च द्वेषो निमित्त इत्याह ॥ यदीति । उक्तार्थमुपसंहरति ॥ अत इति ।

उक्तप्रकारेण बौद्धपाशुपतादीनां प्रतिपक्षाणां निन्दितत्वेनाप्रतिपक्षत्वाच्छ्रुतिनिकरसमधिगम्य निर्दोषोरुगुणार्णवो नारायणः सिद्ध इत्यर्थः । अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो य उ विद्यायां रताः विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति श्रुत्या विपरीतज्ञानानां प्रतिपक्षाणां निन्द्यत्वं दर्शयति ॥ अन्धन्तम इति । अयमर्थः । येऽविद्यायां रताः पराविद्यां न निन्दन्ति तेऽप्यविद्यानिर्विष्टवदन्धन्तमः प्रविशन्ति । अस्मिन्नर्थे मनुरपि । या वेदबाह्याः स्मृतयो याश्चकाश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इति । तत्रेयं विद्येयमविद्येति विविच्य ज्ञातव्यम् । एवं सत्यनर्थकारणत्वेन बुद्ध्या परित्यक्तयाऽविद्यया मृत्युर्न प्राप्यते । परमपुरुषार्थसाधनवद्भ्यस्तया विद्ययाऽमृतमश्नुत इति ॥ १२ ॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां श्रीमत्पद्मनाभतीर्थभट्टारकविरचितायां सन्न्यायरत्नावल्यां द्वितीयाध्यायस्य द्वितीयः पादः ॥ २–२ ॥ श्रीकृष्णार्पणमस्तु ॥ ❁ ॥ ❁ ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ ननु परसमयानां प्रत्येकं स्वस्वमतेन विरोधमुद्भाव्याप्रामाण्यमापादितं प्राक् यथा तथैवाधिभूतादिविषयेषु तत्स्रष्टरि च श्रुतीनां परस्परविरुद्ध्यमानानामप्रामाण्यं स्यात् । तद्वदशेषवेदस्याप्रामाण्यं स्यात् । ततश्च पूर्वोक्तसमन्वयासिद्धिरित्याशङ्कायामाह ॥ अथेति । निखिलवेदवाक्यानां परस्पराविरोधः पादद्वयेन परिह्रियते । तत्राधिदैवादीनां स्वरूपनिर्णयाद्येतेषु विरुद्ध्यमानानां केषाञ्चिद्वचनानां तावत्परस्परविरोधेऽनेन पादेन परिह्रियत इत्यर्थः । न वियदश्रुतेरित्यारभ्यापादपरिसमाप्तेर्यथाक्रममधिकरणेषु पूर्वपक्षयुक्तीः सिद्धान्तयुक्तीश्च दर्शयति ॥ अनुभूनीत्यादिना । तत्र तावत्प-

थमाधिकरणं प्रपञ्चयति ॥ प्रकृतिरित्यादिना । अस्यार्थः । आत्मन आकाशः सम्भूतः । इदं सर्वमसृजतेत्यादौ सर्वस्य विष्णोः स्रष्टृत्वं श्रूयते । अव्याकृताकाशप्रकृत्यादीनां केषाञ्चित्पदार्थानां पराधीनातिशयलाभ एवोत्पत्तिर्न तु सर्वथाभूत्वाभवनम् । अनादिर्वाऽयमाकाशः । अथ ह वाव नित्यानि पुरुषः प्रकृतिः काल इत्यादिश्रुतिविरोधात् । अव्याकृताकाशस्याधीनविशेषलाभमन्तरेण स्वरूपेणोत्पत्तौ युक्तिविरोधमाह ॥ अवकाशेति । न चावकाशलक्षणाकाशाभावे सर्वत्र नासीदिति युज्यते । स्वव्याहतत्वात् । न ह्यवकाशाभावे सर्वत्रेति युज्यते । यत्र मूर्तवस्तुसङ्कीर्णत्वं तत्रावकाशो नास्तीति लोकव्यवहारात् । प्रलयेऽवकाशाभावे मूर्तसङ्कीर्णत्वं स्यात् । मूर्तद्रव्याणि च न ह्यवकाशं परित्यज्य तिष्ठन्ति । तस्मादव्याकृताकाशं सर्वदाऽस्त्येव । आकाशस्योत्पत्तिवचनं त्वभिमानिदेहविषयत्वेन भूताकाशविषयत्वेनाप्युपपद्यत इत्याह ॥ अत इति । पृथिव्यादिमूर्तसम्बन्धाख्यपराधीनविशेषबलादव्याकृताकाशसत्त्वेनास्याप्युत्पत्तिवचनं युज्यत इत्याह ॥ तथाऽपीति । कालप्रवाहस्य नित्यस्यापि क्षणादिरूपविशेषलाभात् । पुरुषाव्यक्ताद्यभिमानिन्याः श्रियोऽपि नित्यायाः सिसृक्षत्वविशेषलाभात्प्रधानस्य नित्यस्यापि महदादिरूपेण विकारलक्षणविशेषोत्पत्तेः । जीवनां च नित्यानामपि देहसम्बन्धरूपविशेषलाभात् भगवत्स्रष्टृत्वं युज्यत इत्याह ॥ कालेति ॥ १ ॥ तेजोबन्नान्याकाश इति तान्यनित्यानि । वायुर्वाव नित्यः सैषा नस्तमिता देवता यद्वायुरित्यादिश्रुत्या मुख्यवायोरविष्णुस्रष्टृत्वमाशङ्क्याह ॥ एवमिति । आकाशाद्वायुरित्यादिश्रुत्या देहसम्बन्धलक्षणपराधीनविशेषोत्पत्तिमत्त्वेन विष्णुस्रष्टृत्वं वायोरपि पूर्वोक्तन्यायेनावगन्तव्यम् । नित्यत्ववचनं तु प्रलयेऽप्यविनष्टज्ञानविषयत्वेनोपपन्नम् । न हि रमेशवदपराधीनत्वेन नित्यत्वं वायोर्युज्यते । द्वयोः

परस्परैश्वर्याभावेन सर्वैश्वर्यानुपपत्तेः। एतदेवोक्तमेतेन मातरिश्वा व्याख्यात इति सूत्रेण। अतः परतो लब्धविशेषवत्त्वेन जन्मना सर्वं जन्मवदेवेशव्यतिरिक्तम्। न जन्मरहितमित्यर्थः। पूर्वं सूक्ष्मरूपेण सतः स्थूलरूपत्वापत्तिलक्षणं पूर्वसंज्ञापरित्यागेन संज्ञान्तरलाभाख्यं च यज्जन्म तत्पृथिव्यादीनामेव सम्भवति न लक्ष्मीतत्त्वजीवतत्त्वादीनाम्। अत इदं सर्वमसृजतेत्यत्र परतो लब्धविशेषवत्त्वमेव जन्म विवक्षितमित्याह ॥ स्थूलतेति॥ २ ॥ एतच्च जन्म परमात्मनो न सम्भवत्येवापराधीनत्वादित्याह ॥ स्वतन्त्रेति। एतदेवोक्तम्। असम्भवस्तु सतोऽनुपपत्तेरिति सूत्रेण ॥ ३ ॥ एतदेव निरवधिकैश्वर्यं हरेरुपपादयति ॥ अच्छेद्यस्येति। एतदेवोक्तम्। व्यतिरेको गन्धवत्तथा च दर्शयतीति सूत्रेण। तथा च शाण्डिल्यश्रुतिः। एकीभवत्यथ बव्हीभवति तं यथायथेश्वरः प्रकुरुते तथातथा भवति सोऽचिन्त्यः परमो गरीयानिति। पाद्मे च। अचिन्त्ययेशशक्त्यैव ह्येकोऽवयववर्जितः। आत्मानं बहुधा कृत्वा क्रीडते योगसम्पदेति ॥ १३ ॥ एवमुक्तप्रकारसिद्धनिरतिशयैश्वर्येण परमात्मनाऽनीशस्य जीवस्य तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यादिश्रुत्याऽभेदसाधकानुमानेन चैक्यं वदतां मतं दूषयितुमुपन्यस्यति॥ एवमिति। एतन्मतानिराकरणत्वेन पृथगुपदेशादिति सूत्रं योजयति ॥ न तदिति। पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीत्यादिश्रुतेर्जीवपरयोरभेदो न युक्त इत्यर्थः। ननु भेदवाक्यमीश्वराज्जीवस्य सांसारिकभेदविषयतयोपपन्नमित्याह ॥ प्रज्ञेति। सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रतिज्ञा प्रतिष्ठा प्रज्ञा ब्रह्म स एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवदित्यस्यां श्रुतौ ब्रह्मादिस्थावरान्तस्य सर्वस्य ब्रह्मनेतृक-

त्वमुक्त्वा लौकिकत्वाल्लोकशब्दवाच्यस्य मुक्तसमुदायस्यापि प्रज्ञाशब्दवाच्यब्रह्मनेतृत्वस्य तथाऽमृतस्य मुक्तस्य परमात्मना सहैव वैकुण्ठे सर्वकामानुभवस्य श्रवणादात्यन्तिकैकजीवस्येश्वराद्भेदो न स्वाभाविक एवेत्यर्थः । अस्मिन्नेवार्थे श्रुतिस्मृति-बाहुल्यं दर्शयति ॥ एतमित्यादिना । एतमानन्दमयमात्मानमुपसङ्क्रम्य इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन् एतत्साम गायन्नास्ते । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति । एष प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वे-त्यादीनि श्रुति वाक्यानि । इदं ज्ञानमित्यादि भगवद्वाक्यम् । तस्य मध्ये वेतसः पुण्यगन्धः सहस्रशाखो विमलो विभाति । तस्य मूलात्सरितः प्रस्रवन्ति मधूकप्रस्रवणा रमण्यः । शाखाच्छाखमित्यादि भारतवाक्यम् । कश्यपप्रजापतिवादेऽप्युक्तम् । आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः योगेश्वरैः कुमाराद्यैः सिद्धैर्योग प्रवर्तकैः । भेददृष्ट्येत्यादिभागवतवचन-स्यायमर्थः । जीवब्रह्मभेददर्शनेनाभिमानेनेशाभिमानेन । स हिरण्यगर्भो ऋष्यादिभिः सह जगत्कर्तृत्वेन सर्वज्ञत्वादि-गुणपूर्णं ब्रह्म विष्ण्वाख्यं प्रलये सङ्गत्य प्रविश्य पुनः सृष्टिकाले जाते गुणव्यतिकरे त्रिगुणव्यतिकररूपे प्रजायते । विष्णुविग्रहान्निर्गच्छति । तत्रापि स्थितो यथापूर्वं ऋष्यादिभिः पूज्यमान एव तिष्ठतीति । ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विममीत उत्व इत्यृचोऽयमर्थः । मुक्तब्रह्मणां मध्ये त्व एको ब्रह्मा ऋचां योगं पुपुष्वान् अति पुष्टार्थत्वेन व्याख्यां कुर्वन्नास्ते । एको गायत्रं साम शक्वरीषु ऋक्षु गायति ।

एको भागवतादिजातविद्यां वदति । एको यज्ञस्य विष्णोर्मात्रामंशरूपं विममीते चिन्तयतीति । यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति । तेन सम्पन्नो महीयते । य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते । सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता । तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवतीति । एतानि श्रुतिवाक्यानि । हृदयस्य भवतीति ब्रह्मणःशेषभूतो भवतीत्यर्थः । स्वेच्छया विश्वमोक्षिणः । भुञ्जते सुसुखान्येव न दुःखादीन्कदाचनेति ब्रह्मवैवर्तवचनम् । जगद्व्यापारवर्जमिति सूत्रम् । जगदीश्वराद्भेदप्रतिपादकं मुक्तस्य । अत एवं श्रुतिसूत्रादितात्पर्यालोचनया जीवेशयोरात्यन्तिकभेदोऽवसीयते । अधुना तस्यानुमानेन मिथ्यात्वमाशङ्कते ॥ मिथ्येति । घटादिभेदस्य पक्षतुल्यत्वान्न तत्र भेदत्वहेतोर्व्यभिचारः शङ्कनीयः । परिहरति ॥ साध्येति । अयमर्थः । यदेतद्विमतभेदस्य पक्षीकृतस्य चन्द्रभेदवन्मिथ्यात्वं साध्यते तत्किं सदसद्वोभयविलक्षणं वा । न प्रथमद्वितीयपक्षावङ्गीकर्तुं शक्यावनिर्वचनीयवादिना । तस्याप्यपसिद्धान्तापत्तेः । उभयविलक्षणत्वं चेत्तस्याप्रसिद्धत्वेन पक्षोऽप्रसिद्धविशेषणःस्यात् । द्वौ चन्द्राविति प्रतीतचन्द्रस्यापि सदसद्विलक्षणत्वाभावेन दृष्टान्तश्च साध्यविकलः स्यात् । न चैतद्दृष्टान्तगतसाध्यस्याप्यनुमानान्तरेण साध्यत्वं वाच्यम् । तदनुमानदृष्टान्तगतसाध्यस्याप्यनुमानान्तरेण साध्यत्वमित्यनवस्थापत्तेः । अतो दृष्टान्ताभावान्नानुमानमनिर्वचनीयं गोचरयति । न च वाच्यं नासदासीन्नो सदासीत्तदानीमिति वाक्येन सदसतोर्निषेधात्प्रलये परिशिष्यमाणस्यानिर्वचनीयत्वमापादितम् । परिशिष्यमाणं च तम आसीदिति वाक्यशेषात्तमो नामकं जगदुपादानमिति । आनीदवातं स्वधया तदेकमित्यपि वाक्य-

शेषेण ब्रह्मणोऽपि परिशिष्यमाणत्वेन श्रुतत्वात्तस्याप्यनिर्वचनीयतापत्तेः। अतो यथाऽनादिमत्परं ब्रह्म। नसत्तन्नासदुच्यत इत्यत्र सदसच्छब्दाभिहितपृथिव्यादिस्थूलसूक्ष्मनिषेधः कृत एवं नासदासीदित्यत्रापि न त्वनिर्वचनीयं किञ्चिद्विधीयते। नापि भेदमात्रस्य। ख्यातिबाधान्यथाऽनुपपत्त्या सदसद्वैलक्षण्यसिद्धिरित्याह॥ न चार्थापत्तिरिति। तत्र यत्सत्त्वे भेदस्य बाधो न स्यादित्येतन्न घटत इत्याह॥ बाधेति। सति हि बाधे तदन्यथाऽनुपपत्त्या जीवेशादिभेदस्यासत्त्वं भवेत्। न तु बाधोऽस्ति प्रबलप्रमाणप्रतीतस्य। अतो भेदस्य सत्यत्वे बाधो न स्यादिष्टापत्तेः। किञ्च यदा भ्रान्ते चन्द्रभेदादावपि बाधो निरूपयितुं न शक्यते तदा सुतरामन्यत्र। तथा हि। न तावद्भ्रमस्य बाधो युज्यते। भ्रमो नाभूदित्यनुभवाभावात्। नापि भ्रमविषयस्य शुक्तिरजतादेर्बाधो युक्तः। खपुष्पवदविद्यमानत्वात्। न च शुक्तितत्त्वाविद्ययोत्पन्नं प्रातीतिकसत्त्वयुक्तं रजतं शुक्तितत्त्वसाक्षात्कारेण बाध्यत इति वाच्यम्। तथाविधरजते प्रमाणाभात्। असदेव रजतं प्रत्यभादित्युत्तरकालानुभवविरोधाच्च। रजतप्रत्ययस्तु सादृश्यादिदोषवशाच्छुक्तिरेव विषयीकृत्योत्पन्न इति न तथाविधं रजतं विषयतया गमयति। यद्यन्यत्र विद्यमानं रजतं शुक्तिशकले बाध्यत इत्युच्यते। तर्हि सोऽप्यात्मनो देहादौ बाधसम्भवेन यदासत्तत्त्वं न बाध्यमिति व्याप्त्यभावात्सत्त्वे भ्रान्तस्य बाधो न स्यादित्यापादनं न स्यात्। यदि रजतस्यान्यत्र सत्त्वेऽपि शुक्तिरजतं त्वसदेव बाध्यतेऽतो न सतः क्वापि बाध इत्युच्यते तर्हि कोऽयं बाधः। नाश इति चेन्नैवम्। असतो नाशासम्भवात्। न ह्यप्रवृत्तस्य निवर्तनं युज्यते। यद्यसतोऽपि सत्त्वेन प्रतीतस्य नासीदस्ति भविष्यतीति ज्ञानविषयत्वं बाध इत्युच्यते। तर्हि सिद्धो नः पक्षः। असतः ख्यातेः सिद्धत्वात्। असतः ख्यातिमुपपादयति॥ प्रतीतिरिति। न ह्यसतोऽप्रतीतावसन्न

प्रतीयते शशशृङ्गवदिति वक्तुं शक्यते। अप्रतीतस्यानूद्यत्वदृष्टान्तत्वयोरभावात् । असतः प्रतीतत्वेऽपि विधिमुखेन भ्रमविषयत्वं न कथञ्चिदिति चेन्नैवम् । स्वप्ने शशशृङ्गस्यासतो विधिमुखेन भ्रमविषयत्वदर्शनात् । अथ भ्रमविषयस्यासत्त्वे ख्यातिर्न स्यादित्येतदप्यनुपपन्नम् । तस्मान्नार्थापत्तिरनिर्वचनीये प्रमाणम् । उपमाप्रमाणं तु न तत्र शङ्काार्हम् । प्रत्यक्षं तु घटपटादिसत्तायामेव मानं नानिर्वचनीये। अतोऽनिर्वचनीयं नाम सर्वप्रमाणशून्यत्वाच्छशविषाणवन्नास्त्येव । अत एव चन्द्रभेदस्याप्यनिर्वचनीयत्वसाधकानुमानं दृष्टान्तशून्यमेवेत्यप्रमाणम् । इतोऽपि जीवेशयोर्भेदबाधकमनुमानमप्रमाणम् । तौ येन प्रमाणेन प्रसिद्धौ तेन प्रमाणेन भिन्नतयैवेति धर्मिग्राहकप्रमाणविरुद्धत्वादित्याह ॥ शास्त्रेति । उपजीव्यप्रमाणविरुद्धत्वादेव तद्योऽहमित्यादिश्रुतिरपि जीवेशयोर्भेदं बोधयितुं न शक्नोतीत्याह ॥ उपजीव्येति । अयमर्थः । किञ्चित्कर्तृत्वदुःखित्वादिमत्त्वेनानुभूयमानाज्जीवाद्विलक्षणत्वेन यः सर्वज्ञः स सर्वविदित्यादिश्रुत्या सर्वज्ञत्वसर्वशक्तिमत्त्वादिधर्मविशिष्टत्वेन सिद्धमीशमुपजीव्य तेन जीवस्य भेदः श्रुतिशतेनापि बोधयितुं न शक्यते उपजीव्यप्रमाणविरोधादेव। ननूपजीव्यप्रमाणमीशे धर्मिण्येव मानं न तु तस्य सर्वज्ञत्वादौ। तदभावेऽपीशस्वरूपमात्रेणाभेदस्य बोधयितुं शक्यत्वात्तत्कथमुपजीव्यश्रुतिविरोधो भेदवाक्यस्येत्याशङ्क्याह ॥ अप्रामाण्यमिति । सर्वज्ञत्वादिभेदकधर्मवत्त्वं विहायेश्वरपदार्थस्य ज्ञातुमशक्यत्वात् । न तेनाभेदो जीवस्य बोधयितुं शक्यते। न हि यः सर्वज्ञ इत्यादिवाक्यस्य विशिष्टार्थबोधकस्य विशेष्यांशे प्रामाण्यं विशेषणांशेऽप्रामाण्यमुभयमेकस्य युज्यते । विरोधात् । यदि विशेषणांशे सर्वज्ञत्वादावप्रमाणमेतद्वाक्यं तर्हि विशेष्यां-

शेऽप्यप्रामाण्यं स्यादविशेषात् । तथा सतीशस्यैवाभावात्तेनाभेदो जीवस्य सुतरां न स्यात् । अतः सर्वज्ञत्वादिविशिष्ट एवेशः श्रुत्या बोध्यते । एवंविधेन चेतनजीवस्याभेदप्रतिपादनेन धर्मिग्राहकप्रमाणविरोधो दुर्निवार एव । न च द्वासुपर्णा सयुजेत्यादिभेदवाक्यं जीवेशयोरभेदोपजीवनं पश्यामः । अत उपजीव्यत्वेन भेदश्रुतेरेव बलवत्त्वेनाभेदश्रुतेर्भेदोपजीवकत्वादुपजीव्योपजीवकयोरुपजीव्यं बलवदिति हि न्यायः । ननु जीववदीश्वरोऽपि प्रमाणान्तरसिद्ध एवानूद्यते भेदागमेन । अतस्तस्याप्यनुवादकत्वेन दौर्बल्यं किं न स्यादित्याशङ्क्याह ॥ न चेति । वेदैकवेद्यत्वस्य पूर्वमेवोक्तत्वान्न मानान्तरवेद्यत्वं ब्रह्मण इत्यर्थः । मानान्तरवेद्यत्वेऽपि ब्रह्मणो न जीवाद्भेदो व्याहन्यते येनेति । अयमर्थः । मानान्तरं चेश्वरेऽनुमानमेव च सम्भावितं नान्यत् । तच्च सर्वज्ञत्वसर्वकर्तृत्वादिविशिष्टमेवेशं साधयतीत्यङ्गीकर्तव्यम् । तेन च जीवस्यासर्वज्ञस्याभेदं बोधयद्वाक्यं च स्वोपजीव्यानुमानविरुद्धत्वाद्दुर्बलमेवेति नाभेदसाधकम् । वेदेऽपि दृढतरानुमानविरुद्धार्थस्य परित्यागो दृष्टस्ता आप ऐक्षन्तेत्यादौ । अनुमानसिद्धेऽपीश्वरे दार्ढ्यहेतुत्वेन श्रुतिश्चोपपद्यते । प्रसिद्धो हि बहुप्रमाणसंवादः सन्दिग्धार्थेषु दार्ढ्यहेतुत्वेन । नन्वस्तु बहुतरासिद्धत्वप्रमाणेन नित्यपूर्णज्ञानादिमानेवेशः । तेन सह भेदस्तु जीवस्य न स्यात् । दुःखादेर्भ्रान्तित्वेन भेदकाभावादित्याशङ्क्याह ॥ न दुःखेति । न च दुःखादेर्भ्रान्तिकल्पितत्वम् । बाधकाभावात् । विमुक्तश्च विमुच्यत इति श्रुतिर्दुःखादिलक्षणबन्धस्य बाधिकेति चेन्मैवम् । दुःखाद्यनुभवेनैषा श्रुतिरेव बाध्यत इत्यपि वक्तुं शक्यत्वात् । यदि मानससिद्धत्वेनैषा श्रुतिर्न बाध्यत इत्युच्यते तर्हि दुःखादिकमपि तथैवाभ्युपगम्यतामविशेषात् । दुःखादेर्दृढप्रत्यक्षबाधस्तु

नास्त्येव । प्रत्यक्षबाधे आदित्यो यूप इत्यनयाऽपि प्रत्यक्षबाधः स्यात् । इतोऽपि दृढतरानुभवसिद्धस्य दुःखादेर्बाधो न युक्त इत्याह ॥ बाधो यदीति । यदि शुक्तिरजतादिविषयमनोवृत्तिवद्दुःखादिविषयः सायुज्यानुभवो यथार्थः स्यात्तर्ह्ययं भ्रमोऽयमभ्रम इति व्यवस्थापकानुभवोऽप्ययमयथार्थः स्यादविशेषात् । तथा सति कोऽप्यर्थो न निश्चीयते । न ह्यनुभवमन्तरेण परीक्षाभ्रमाभ्रमनिश्चायकमन्यत्प्रमाणमस्ति । तन्निश्चायकमन्यादित्यनवस्था स्यात् । अतः स्वयंप्रकाशेन साक्ष्यनुभवेन रज्जुसर्पादिविषयमनोवृत्तेर्भ्रमत्वं वियदादिविषयस्याभ्रमत्वं निश्चीयते । तस्यायथार्थत्वे पूर्वोक्त एव दोषः । योऽयं साक्षिनिर्दोषत्वादिदोषः सोऽपि साक्षिगोचरः । तद्बलेन घटादिवस्तु निर्धार्यते । न भेदकारणादिव्यवहारः प्रवर्तते । निर्धारित एव साक्षिव्यवहारो निर्धारितव्यवहारस्तु मानसः । अतो निर्धारितव्यवहारान्यथाऽनुपपत्त्या साक्षी निर्दोष एवाङ्गीकार्यः । साक्षिणो निर्दोषत्वे तत्सिद्धस्य सुखादेर्बाधो न युक्त इत्याह ॥ शुद्ध इति । उक्तार्थमुपसंहरति ॥ उपजीव्येति । ननु यदि धर्मिग्राहकप्रमाणसिद्धो जीवेशयोर्भेदस्तर्हि जीवस्येशेनाभेदप्रतिपादकत्वेन प्रतीयमानानां तत्त्वमसीत्यादिश्रुतीनामहं हरिः सर्वमिदं जनार्दन इत्यादिपुराणवाक्यानां का गतिरित्यत आह ॥ तथाऽपीति । यथाऽग्निवत्पैङ्गल्यादिगुणयुक्तत्वान्माणवकोऽग्निरित्युच्यते एवमीशवज्ज्ञानादिगुणयुक्तत्वात्त्वंशब्दवाच्यो जीवस्तद्वदित्युच्यते । न च वाच्यं तच्छब्देन जगत्स्रष्टुरीशस्य चैतन्यं त्वंशब्देन संसारिणो जीवस्य चैतन्यं च जहदजहल्लक्षणया वृत्त्या लक्ष्यते एवं लक्षितचैतन्ययोरैक्यं तत्त्वमसीति श्रुत्या प्रतिपाद्यत इति । जगत्स्रष्टृपरामर्शिनस्तच्छब्दस्य च त्वंशब्दवाच्ये जीवे गौणवृत्त्याश्रयणेन तत्त्वंपदयोरुभयोरपि लक्षणावृत्त्याश्रयणस्य पराहतत्वात् । पदद्वयस्यामुख्यार्थत्वादेकस्य पदस्यामुख्यार्थत्वाश्रयणस्य

वरिष्ठत्वात् । एतदेवोक्तम् ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति सूत्रेण ॥ १४ ॥ उपजीव्यप्रमाणविरुद्धार्थपरित्यागे सूर्येत्यादिना तत्र तावद्दृष्टान्तदर्शनार्थमुच्यते । सूर्योऽयं मण्डलमधिष्ठाय तेनालोकमधितिष्ठति । वरुणोऽपि ब्रह्माण्डावरणोदकमधिष्ठाय स्वादूदकसमुद्रमंशेनाधितिष्ठति । धरादेव्यपि पार्थिवं मेर्वादिपर्वतमंशेनाधितिष्ठति ॥ एवमिदामिति । अत्र च यथा सूर्यादीनां स्वस्वांशैरत्यन्ताभेदः । एवं मत्स्याद्यवतारैर्विष्णोरत्यन्ताभेदः । अथ यथा विण्मूत्राभ्यां पृथिव्युदकसूर्यांशभूतानामभिमानिन्योऽपभ्रष्टदेवताः सूर्यादिभ्यः पृथग्भूता एवमंशभूतोऽपि जीवः पृथगेव परेशात् । ताश्चाक्षाद्यभिमानिन्यो देहदोषदुष्टत्वादपभ्रष्टदेवताः सूर्यादिभिरनुग्राह्यत्वात्तेभ्यो भिन्ना एव । तथा जीवा विष्णोर्भिन्नाः । तेन प्रेर्यत्वात्तत्प्रसादात्संसारान्मुच्यमानत्वाच्च । न चैवं मत्स्यादिरूपाणामन्यत्प्रेर्यमस्ति । सम्पूर्णशक्त्यादिगुणपूर्णत्वात् । अतस्तैरत्यन्ताभेदो विष्णोर्न जीवैः । एतदेवोक्तम् ॥ प्रकाशादिवन्नैवं परः । अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवदिति सूत्रद्वयेन । अतो मत्स्याद्यवतारतुल्यत्वाभावाज्जीवानां न ते मुख्यांशा भगवतः किन्त्वंशाभासा इत्याह ॥ अंशेति । अत्र च यथैषेति श्रुतिः प्रमाणम् । यथैषा पुरुषस्य छायैवमेव जीवजातमेतस्य परमात्मनश्छायाऽऽभासभूतमित्यर्थः । ननु पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवीति परमपुरुषस्य द्युस्थितपादत्रयवदेव भूतशब्दवाच्यानां जीवानां पादत्वश्रवणात्कथं तेषां तदाभासत्वमित्यत आह ॥ तत्त्विति । द्युशब्दवाच्यस्य वैकुण्ठादिलोकस्थितपरमपुरुषांशरूपत्रयस्यामृतत्वादिकल्याणगुणपूर्णत्वान्न तद्वदंशत्वं जीवानामपूर्णगुणानां दोषवतां युज्यते । तेषु पादशब्दस्तु निष्कस्य चतुर्थांशोऽयं खण्डतुलित इतिवदत्यन्तभिन्नविषय

एव । न हि विन्यस्तपादात्कृतावपि पादशब्दः प्रयुक्त इत्येतावता पुरुषस्य पादो भवति । अधुना विष्णोः सकाशाद्वियदाद्यारम्भविचारमुपक्रम्य प्रवृत्तस्याप्यस्य पादस्य तात्पर्यं सङ्क्षिप्याह ॥ अक्षय इत्यादिना । देव्यौ ब्रह्मसूत्रात्मनः पत्न्यौ । एतेषां ब्रह्मादीनामित्यर्थः ॥ १८ ॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीमत्पद्मनाभभट्टारकविरचितायां द्वितीयाध्यायस्य तृतीयः पादः ॥ २-३ ॥ ❁ ॥ ❁ ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ अवसितोऽधिभूतादिविषये परस्परविरुध्यमानश्रुतिविरोधपरिहारोऽध्यात्मविषयश्रुतीनां श्रुतियुक्तिभ्यां विरुद्धवत्प्रतीयमानानां बलवत्तरयुक्तिभिर्विरोधः परिह्रियतेऽस्मिन्पाद इत्याह ॥ श्रुतीति । अधुना तथा प्राणा इत्यादेरस्य पादस्याधिकरणेषु पूर्वपक्षयुक्तीः सिद्धान्तयुक्तीश्चैकोक्त्या क्रमेणाह ॥ तत्रेत्यादिना । अतो विरोधशून्येन निखिलश्रुतिसमन्वयेन जगत्कर्ता सकलगुणपरिपूर्णो निर्दोषो विष्णुरिति सिद्धम् ॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभभट्टारकविरचितायां द्वितीयाध्यायस्य चतुर्थः पादः ॥ २-४ ॥ समाप्तोऽयं द्वितीयोऽध्यायः ॥ २ ॥ श्रीकृष्णार्पणमस्तु । ❁ ॥ ❁ ॥ ❁ ॥

॥ अयं ग्रंथः खंडो रामचंद्र भिसे इत्यनेन "कर्नाटक प्रिंटिंग वर्क्स, धारवाड" मुद्रणालये मुद्रितः ।

सवणूरकुलोत्पन्नराघवेंद्रसूनुना गोविंदेन धारवाडग्रामे प्रकाशितश्च ॥

॥ इति श्रीमदनुव्याख्यानटिप्पणी सन्न्यायरत्नावली समाप्ता ॥

॥ द्वितीयाध्यायः ॥

॥ अथ श्रीमदनुव्याख्यानटिप्पणी सन्न्यायरत्नावली प्रारभ्यते ॥

॥ तृतीयाध्यायः ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ एवमध्यायद्वयेन सिद्धस्य सकलकल्याणगुणवतो निर्दोषस्य श्रीपतेः साक्षात्कारपूर्वकप्राप्तिसाधनापेक्षायां तृतीयाध्याय आरभ्यते । तत्र तत्प्राप्तिसाधनाङ्गभूतं यद्भगवदितरविषयवैराग्यं तन्निरूपणपरस्य प्रथमपादस्याधिकरणेषु पूर्वपक्षयुक्तिमालां सिद्धान्तयुक्तिमालां च क्रमेणोद्धरति ॥ स्वाभाविकेति । स्वर्गादिवैराग्यार्थतो वा तत्पूर्वपादे निरूपितेन्द्रियभूतसूक्ष्मपरिष्वक्तस्य जीवस्य कर्मवशाद्द्युपर्जन्यपृथिवीपुरुषयोषित्क्रमेण भ्रमणं चेत्थं यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीत्यादिवाक्यमुदाहृत्य निरूपितं तं यदेतद्वाक्यं मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते । यो यो ह्यन्नमत्ति यो वा रेतः सिञ्चति तद्भूय एव भवति । तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वेत्यादि । इतः प्रेत्य स्वर्गं गत्वा पुनरावृत्तानां जीवानां वृष्टिद्वारा व्रीह्यादिजीवेषु सङ्क्रमणं तत्र सङ्क्रान्तानां रेतःसिक्पुरुषैः प्रवेशं तत्र प्रविष्टानां योनिप्रवेशं च प्रायिकमभिदधाति न तु तन्नियतं केनचित्कारणेन । मान्धातृद्रोणद्रुपदकृपादीनां पुराणेतिहासेषु योनिप्रवेशमन्तरेणापि जननश्रवणाद्विशेषकारणादेव विशेषाज्जनिरिष्यते । सामान्यजननं चैव नृणां सामान्यहेतुत इति वाक्याच्चैतामेव कारणविशेषकृतां पुरुषयोनिप्रवेशनियमोज्झितिं भगवान्सूत्रकृदप्याह । रतः सिग्योगोऽथेत्यत्राथशब्देन पक्षान्तरं सूचयतीत्याह ॥ बीजेति ॥ २० ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां तृतीयाध्यायस्य प्रथमः पादः ॥ ३–१ ॥ * ॥ * ॥

अ०टि० ॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ यदर्थं स्वर्गादिगतौ हेयत्वं प्रदर्श्य वैराग्यं विहितमधस्तात्सा भगवती भक्तिरधुना
विधीयते । तदर्थमेव जैवस्वप्नाद्यवस्थाकर्तृत्वादिमाहात्म्यं भगवतो निरूप्यते । न हि माहात्म्यवर्जिते वस्तुनि भक्तिरुत्पद्यते । सं०र०
॥ १ ॥ तां भगवद्भक्तिं निरूपयतोऽस्य पादस्याधिकरणेषु प्रथमं पूर्वपक्षयुक्तीरनन्तरं सिद्धान्तयुक्तीरनुक्रामयति ॥ पश्चादित्यादिना । तृ०द्वि०
स्वप्नसृष्टेरुपादानकारणशून्यत्वेन मिथ्यात्वात्कथं तत्कर्तृत्वलक्षणो गुणो भगवतः सिद्ध्यतीत्यत आह । ॥ वासना इत्यादिना । अ०१
जाग्रत्कालदृष्टश्रुतकरितुरगगोसंस्कारास्तावत्सन्त्येव मनोवृत्तिरूपाः । उपादानान्तराभावेऽपि तानेवोपादानीकृत्य स्वप्नकरितुर-
गादिसृष्टिं हरिः करोतीति युज्यते । सूत्रमेतमेवार्थमाह । ॥ सन्ध्ये सृष्टिराह हीति । या तु स्वप्नजाग्रत्त्वप्रतीतिः सा
भ्रान्तिरस्तु । स्वप्नजाग्रत्त्वस्य जाग्रद्दशायामननुभूतत्वेन वासनायाः सृष्ट्यसम्भवात् । अननुभूतविषयसंस्कारानुपपत्तिश्च
श्रुतिपुराणवाक्याभ्यां सिद्धेत्याह ॥ अदृष्ट इति । यत्त्विह जन्मन्यदृष्टमेव किञ्चित्स्वप्ने प्रतीयते तत्पूर्वजन्मस्वनुभूतवासना-
मूलत्वेन युक्तमनादित्वात्संस्कारस्येत्याह ॥ अनादित्वादिति । यत्तु शशस्य विषाणवत्त्वं कदाचिदपि द्रष्टुमयोग्यं स्वप्ने न
प्रतीयते तत्र शृङ्गं शशोऽप्यनुभूतमेव । तदुभयसंसर्गस्याननुभूतत्वेन वासनामयत्वासम्भवात्प्रतीतिः शुक्तिरजतप्रतीतिवद्भ्रान्तिः ।
तदाह ॥ कदेति । स्वप्नजाग्रत्प्रपञ्चयोः सत्यत्वाविशेषेऽपि जाग्रत्प्रपञ्चवत्स्पष्टत्वाभावस्तु स्वप्नप्रपञ्चस्य वासनामात्रमूलत्वाद्युज्यत
इत्याह ॥ वासनेति । अनेन मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति सूत्रं व्याख्यातं भवति । अत्र मायामा-
त्रशब्देन स्वप्नस्यानिर्वचनीयत्वं प्रतिपादयितुं यन्मायावादिना खण्डनं क्रियते तदनूद्य दूषयति ॥ भेद इति । अयमर्थः । द्रष्टुरात्मनः ॥ १ ॥

सकाशात्स्वप्नः किं भिन्नोऽभिन्नो वा भिन्नाभिन्नो वेति विकल्पदूषणमास्ताम् । अयं विकल्प एव तावदनुपपन्नः । स्वप्नतद्द्रष्ट्रोर्भेदस्यैवानुभवेन निश्चितत्वात् । न हि स्थाणोः पुरुषाद्भेदे निश्चिते स्थाणुपुरुषयोर्भेदोऽभेदो वेति विकल्पः सम्भवति । निश्चितार्थस्य च प्रश्ने दूषणमाह । प्रश्नदोषा हि चत्वारः स्वव्याहत्यादिभेदेन । यथा वन्ध्या किं पुत्रवती न वेति प्रश्नश्च व्याहतः । ब्रह्म जगत्कारणमित्युक्ते जगतः क्षणिकत्वे किं प्रमाणमिति प्रश्नोऽसङ्गतः । पुरोवर्तित्वेन दृश्यमानो घटः किमत्रास्तीति प्रश्नोऽसन्दिग्धार्थविषयः । कति काकदन्ता इति प्रश्नो विफलः । एवं सति स्वप्नतद्द्रष्ट्रोर्भिन्नत्वेन सर्वलोकसिद्धयोर्भेदोऽभेदो वेति प्रश्नस्त्वसन्दिग्धविषयत्वेनानुपपन्न इत्यर्थः । व्याहत्यादिप्रश्नानिराकरणे बाधकमाह ॥ न तैः स्यात्तत्त्वनिर्णय इति । न ह्यसन्दिग्धार्थेऽपि विप्रतिपद्यमानं स्वव्याहत्यादिकं च पृच्छन्तं प्रति तत्त्वं निर्णेतुं शक्यते । अतोऽसन्दिग्धार्थादिप्रश्नस्तत्त्वनिर्णयविरोधी । स न तस्य पृच्छतो वीतरागकथायां वादलक्षणायां विजिगीषुकथायां जल्पादिलक्षणायां च पराजयनिमित्तत्वेन निग्रहस्थानं भवति । तच्च वादकथायामुद्भाव्यम् । न तु कथावसितिकारणम् । वादकथायास्तत्त्वनिर्णयार्थत्वेन तत्त्वनिर्णयपर्यन्तं प्रवर्तयितव्यत्वात् । विजिगीषुकथायां तु कथावसितिकारणं च भवतीत्याह ॥ तत्त्वनिर्णय इति । यथा प्रश्नस्य प्रसिद्धार्थविषयत्वं दूषणमेवं प्रतिवादिसम्प्रतिपन्नार्थप्रतिज्ञानपरिहारस्यापि दूषणत्वमित्याह ॥ परिहार इति । हेतुस्तु न प्रतिज्ञातार्थवद्विप्रतिपन्नः साधकः किन्तूभयवादिसिद्ध एवेत्याह ॥ तदन्यस्येति । उभयवादिसिद्धेः साध्येन व्याप्तियुक्तो हेतुराश्रयासिद्धो वा व्यधिकरणासिद्धो वा प्रसिद्धसाध्यो वाऽस्तु नासौ हेत्वाभास इत्याह ॥ आश्रयेति । नन्वाश्रयासिद्धेर्हेतुदूषणत्वं दृष्टम् ।

नृशृङ्गमस्ति शृङ्गत्वाद्गोशृङ्गवदित्यनुमानेऽन्यथा नृशृङ्गास्तित्वमपि स्यादित्यत आह ॥ दोष इति । प्रत्यक्षविरोधपराहतत्वादेव नृशृङ्गास्तित्वमनुमानेन साध्यते न तु शृङ्गत्वहेतोराश्रयासिद्धत्वेन । अतो यत्र प्रत्यक्षादिविरोधो नास्ति तत्र हेतुराश्रयासिद्धोऽपि साधक इत्युक्तेर्नातिप्रसङ्गः सम्भवति । दृष्टश्च खपुष्पवद्वन्ध्यापुत्रस्यावक्तृत्वं साधयन् सत्त्वहेतुर्योग्यत्वे सत्यनुपलभ्यमानत्वं हेतुश्चासत्त्वं साधयन्पदार्थस्य । नन्वाश्रयासिद्धो हेतुश्चेत्प्रत्यक्षादिविरुद्धार्थमपि किमिति न साधयतीत्यत आह ॥ प्रत्यक्षेति । प्रत्यक्षमूलस्तावन्न्यायो भवति । आगममूलश्च प्रत्यक्षागमयोरन्यतरमूलन्यायमूलश्च प्रत्यक्षादिमूलशून्यस्तु न्यायाभास एव । अतो न्यायस्य प्रत्यक्षाद्युपजीवकत्वात्तद्विरुद्धार्थे न प्रवृत्तिर्युज्यत इत्यर्थः । ननु प्रत्यक्षादिभिर्विरुद्धार्थे चोद्यमानस्य हेतोरविरुद्धार्थसाधकत्वे किं प्रमाणमित्यत आह ॥ अदृष्टमिति । असति बाधक इदं साधनमस्मिन्साध्ये प्रमाणं सति तु बाधके न प्रमाणमिति सर्वप्रमाणानां प्रामाण्यग्राहकेण साक्षिणैवावसीयत एव । साक्षिव्यवसायस्य न व्यभिचार इत्यर्थः । यस्तु जगत्क्षणिकत्वादिसाधनस्य तत्प्रमाणस्यैव प्रमाणत्वाध्यवसायः कस्यचित्समानसत्त्वाद्धलवत्प्रमाणेन बाध्य इत्याह ॥ अमानस्येति । साक्ष्यध्यवसायस्तु सर्गतः प्रमाणमिदं साधनमपवादे सत्यप्रमाणमेव भवति । अत एव यद्यद्भोजनं तत्तदिष्टसाधनमिति न्यायः । क्वचिदपथ्यभोजनस्यानिष्टरोगादिसाधनत्वेन व्यभिचरितोऽपि भोजनं प्रवृत्तिव्यवहाराङ्गं भवति । तदेतदाह ॥ उत्सर्ग इति । एवमाश्रयासिद्धेर्दूषणत्वं नास्ति तु वक्तेदानीं व्याधिकरणासिद्धं हेतुदूषणत्वं नास्तीत्याह ॥ व्याप्तत्व इति । कृत्तिकोदयादुदयन् रोहिण्या आसत्त्यनुमानदर्शनाद्व्यधिकरणोऽपि साध्येन व्याप्तो हेतुः

साधक इत्यर्थः । ननु विश्वं सदसद्विलक्षणमिति पक्षोऽप्रसिद्धविशेषणत्वेन दूषणेनैव दूषणीयः सिद्धान्तिना कथमप्रसिद्धसाध्यत्वे हेतुदूषणं नाङ्गीक्रियत इत्यत आह ॥ अन्यदिति । सद्विलक्षणत्वमसद्विलक्षणत्वविरोध्यसद्विलक्षणत्वं च सद्विलक्षणत्वविरोधीति सदसद्विलक्षणत्वं स्वव्याहतत्वादेवाप्रामाणिकं न त्वप्रसिद्धत्वेन । स्वव्याहतिरहितसाध्यमप्रसिद्धमपि हेतुरविनाभावेन साधयतीत्युक्ते न ह्यतिप्रसङ्गोऽस्ति । न चाप्रसिद्धेन हेतोर्व्याप्तिर्न सम्भवतीति वाच्यम् । व्यतिरेकव्याप्तिसम्भवात् । दृष्टं च व्यतिरेकव्याप्त्या हेतोः साधकत्वम् । जीवच्छरीरं सात्मकं प्राणादिमत्त्वान्न यदेवं न तदेवं यथा घट इत्यस्मिन्ननुमाने । अतोऽतिप्रसङ्गाभावाद्विपरीतप्रमाणाभावात्प्रमाणान्तरेण साध्यप्रसिद्धिकल्पनोपायार्थत्वात्परमाणुवदप्रसिद्धमपि साध्यं साधयत्येव लिङ्गम् । ननु सपक्षरहितत्वेन न्यूनावयवकमनुमानं कथमप्रसिद्धं साध्यं साधयतीत्यत आह ॥ परिशेष इति । भोक्तृत्वस्याचेतनधर्मत्वनिषेधपरिशेषलक्षणानुमानाच्चेतनधर्मत्वमन्यत्राप्रसिद्धं सिध्यति । अज्ञानस्य भ्रमनिबन्धनत्वे भ्रमस्य चाज्ञाननिबन्धनत्वादज्ञानभ्रमयोः परस्पराश्रयत्वलक्षणनिराकरणतर्काहतयोरसिद्धिरन्यत्राप्रसिद्धया सिध्यति । एवं निराकरणतर्कलक्षणानां चक्रकादीनामप्रसिद्धसाध्यत्वान्नानुमानाच्चेतनधर्मत्वमन्यत्राप्रसिद्धं सिध्यति । अज्ञानस्य भ्रमनिबन्धनत्वे भ्रमस्य चाज्ञाननिबन्धनत्वादज्ञानभ्रमयोः परस्पराश्रयत्वलक्षणनिराकरणतर्कयोरसिद्धिरन्यत्राप्रसिद्धया सिध्यति । एवं निराकरणतर्कलक्षणानां चक्रकादीनामप्रसिद्धिसाध्यत्वान्नानुमानस्य साधर्म्य दृष्टान्ताद्यवयवनियमः सिध्यतीत्यर्थः । एवमाश्रयासिद्ध्यादीनामहेतुदूषणत्वं सिद्धम् । यदुक्तं प्रतिवादिसम्प्रतिपन्नार्थप्रतिज्ञानं परिहारदूषणमिति तदपि वादकथायामसन्दिग्धार्थप्रश्नवन्न

कथावसानिकामित्याह ॥ सिद्धेति । न हि शब्दस्य नित्यानित्यत्वविवादे वादिना प्रमाणशब्दः प्रमेय इति सम्प्रतिपन्नार्थप्रतिज्ञायां तत्त्वनिर्णयावसाना कथा परिसमाप्यत इत्यर्थः । यथा सम्प्रतिपन्नार्थत्वं प्रतिज्ञादूषणमेवमनैकान्तिकत्वमसिद्धत्वं हेतुदूषणम् । तच्च वादिप्रतिवादिनोरन्यतराभ्युपगत्यापि भवति । यथा शुक्तिरजतदृष्टान्तेन प्रपञ्चमिथ्यात्वे मायिना प्रयुक्तस्य ज्ञेयत्वहेतोरात्मनि व्यभिचारित्वं प्रतिवादिसिद्धमपि दूषणं यथा घटदृष्टान्तत्वेन वेदस्यानित्यत्वे तार्किकेण प्रयुक्तस्य कृतकत्वहेतोरसिद्धत्वं प्रतिवाद्यभ्युपगतं दूषणमेव । दृष्टान्तस्य च साध्यविकलत्वं साधनविकलत्वं च दूषणम् । तथा सविशेषणस्यापि विशेषणवैय्यर्थ्यं च दूषणम् । विशेषणविशेष्ययोरन्यतरस्य वैय्यर्थ्येनासिद्धौ विशिष्टासिद्धेरपरिहार्यत्वात् । तद्यथा शब्दो नित्यः प्रमेयत्वे सति कृतकत्वादिति व्यर्थविशेषणासिद्धःकृतकत्वे सति प्रमेयत्वादिति व्यर्थविशेष्यासिद्धः । यदुक्तं प्रश्नदूषणवैफल्यं तत्प्रथमप्रश्नस्यैव दूषणम् । उत्तरोत्तरप्रश्नस्य पूर्वपूर्वप्रश्नोपयोगित्वेनापि सम्भवात् । पूर्वप्रश्नानुपयुक्तप्रश्नस्त्वसङ्गतः प्रश्नान्तर्भूतः । प्रसिद्धार्थप्रश्ननिष्प्रयोजनार्थप्रश्नयोः सिद्धसाधनस्य चाधिकोक्तिलक्षणनिग्रहस्थानेऽन्तर्भावः । अतो विरोधासङ्गत्यादिनिग्रहस्थानातिरिक्तं न निग्रहस्थानं शङ्कनीयम् । अर्थापत्त्युपमानाभावाख्यानां प्रमाणानामनुमानादावन्तर्भावः । तथा हि । यतोऽप्रसिद्धसाध्यसाधकलिङ्गस्य दृष्टस्य श्रुतस्य वाऽन्यथाऽनुपपत्तिरेवार्थापत्तिः । अतो व्यतिरेकव्याप्तिमूलानुमानैव सा । एतद्गतसादृश्यप्रतियोगित्वादेतेन सदृशं तदित्युपमानमप्यनुमानमेव । तद्यथा सा गौरनेन गवयेन सदृशीति सादृश्येनैतदवच्छेदकत्वात् । योऽयं स्वसादृश्येनावच्छिनत्ति स तेन सदृशः । यथा पित्रा पुत्रः । शब्दान्तर्भूतमप्युपमानं

॥ ३ ॥

दृष्टम् । यथा कीदृग्गवय इति पृष्टेन किं तदुक्तम् । यथा गौर्गवयस्तथेति । यत्र प्रमाणाभावस्य लिङ्गत्वमनुसन्धाय प्रमेयाभावो निश्चीयते योग्यत्वे सत्यनुपलभ्यमानत्वान्मेरुरिव सर्षपोऽत्र नास्तीतिवत्तत्राभावस्यानुमानान्तर्भाव एव । सुखदुःखादेरभावस्तु तत्सद्भाववत्साक्षिप्रत्यक्षवेद्यो न योग्यानुपलब्धिलिङ्गानुमेयः । यत्र घटादेरप्यभावो योग्यानुपलब्धेर्लिङ्गत्वमननुसन्धाय शीघ्रं प्रतीयते तत्रासौ प्रत्यक्षोऽभ्युपगन्तव्यः । अतोऽर्थापत्त्यादिकं प्रत्यक्षादिप्रमाणत्रितयान्न पृथग्भूतं प्रमाणम् । उपक्रमोपसंहारादीनां वाक्यार्थकरणानामपि युक्त्यन्तर्भाव एव न पृथक् प्रमाणत्वमित्याह ॥ प्रारम्भेति । उपक्रमोपसंहारादीनां तु व्याप्त्या निर्णायकत्वदर्शनाद्युक्तित्वमेवेत्यर्थः। उपक्रमादीनां युक्त्यन्तर्भूतत्वेऽप्युपक्रमोपसंहारावभ्यासोऽपूर्वता फलं। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इति बृहत्संहितायामुपपत्तिशब्देन निर्दिष्टाया युक्तेः सकाशात्तेषां पृथङ्निर्देशस्तु कुरुपाण्डववत्सामान्यविशेषभावेन युज्यत इत्याह ॥ कुरुपाण्डववदिति । यद्भेदस्यानुमानेनानिर्वचनीयत्वसाधनेऽप्रसिद्धविशेषणत्वं दूषणं परं प्रत्युद्भावितं तस्य स्वेनानङ्गीकृतस्य परं प्रत्युद्भावनेऽपसिद्धान्ततादोषमाशङ्क्याह ॥ स्वन्यायैरिति । यथा स्वाभ्युपगमन्यायैरपि परं प्रति साधितैः परपक्षो दूषयितुं शक्यते तथा सुतरां पराभ्युपगतन्यायैः । अतो यद्येवं चेदेवं दूषणं स्यादित्यनुपगतस्यैव परं प्रति प्रसङ्गरूपेणापादनेनापसिद्धान्ततया प्रसिद्धेन परपक्षदूषणेऽपि स्वपक्षसाधनं त्ववश्यं स्वसिद्धन्यायेन कार्यं न परस्यैव सिद्धेनेत्यर्थः । परोक्तार्थस्य दूषणं तु परोक्तन्यायेनापि भवतीति दर्शयति ॥ छलमिति । यथा स्वव्याहतेः प्रश्नदूषणत्वमेवं छलजात्युत्तरयोरपि वक्तुरभिप्रेतार्थादर्थान्तरकल्पनं स्वव्याघातकमुत्तरं जातिः । तद्यथा नव कम्बलोऽयं माणवक इत्युक्ते

छलवाद्याह कुतोऽस्य नवकम्बला इति। न हि माणवकस्य पृथिवीतो नवकम्बला युज्यन्त इति छलोत्तरेणैव छलोत्तरं व्याहतं भवति । माणवकस्य नूतनकम्बलोपलम्भान्नवानां कम्बलानां प्रत्यक्षव्याहतत्वेनाप्रसक्तत्वात्तच्छलोत्तरं व्याहतं भवति । वक्तुरभिप्रेतार्थापरिज्ञानं विपरीतज्ञानं चेति निग्रहस्थानद्वयं छलवादिनो भवति। अनुमानं प्रमाणमित्युक्ते जातिवाद्याह । नानुमानं प्रमाणं पदार्थत्वादप्रमाणवदित्येतत्स्वस्याप्यनुमानत्वेनाप्रामाण्यमापादयतीति स्वव्याघातकरत्वेन जात्युत्तरम् । उक्तार्थमुपसंहरति ॥ एवमिति। न च मायामात्रपदस्यानिर्वचनीयवाचकत्वे किञ्चित्प्रमाणमस्ति। स्वव्याहतं च सत्त्वेनासत्त्वेन वाऽनिर्वचनीयत्वं विश्वस्येत्याह ॥ विलक्षणमिति । सद्विलक्षणस्यासत्त्वनियमादसद्विलक्षणस्य सत्त्वनियमाच्च सद्विलक्षणमसद्विलक्षणं च विश्वमित्युक्ते सच्चासच्चेत्युक्तं स्यात्। तत्सदसत्त्वं चैकस्य व्याहतमित्यर्थः। किं सत्प्रतियोगिकवैलक्षण्यं विश्वस्य वदता ब्रह्मव्यतिरेकेण सदनभ्युपगमात्। प्रतियोगित्वलक्षणधर्मवत्त्वं ब्रह्मण एवाङ्गीकृतमिति निर्विशेषत्वं च त्यक्तं स्यात्। यदि प्रतियोगित्वं मिथ्या ब्रह्मणस्तर्हि कथं ततो विलक्षणं जगदुत्पद्यते। ततश्च वैलक्षण्यासम्भवेनाविलक्षणत्वं स्याज्जगद्ब्रह्मणोः। अवैलक्षण्ये च तयोरुभयोरपि मिथ्यात्वं स्यात्। सत्यत्वं वा न पुनर्ब्रह्मणः सत्यत्वं जगतो वा मिथ्यात्वं। तदाह ॥ प्रतियोगित्वमिति। ननु वैलक्षण्यवदवैलक्षण्यमपि धर्मरूपं नास्त्येव ब्रह्मणो निर्विशेषस्य तत्कथं धर्मरूपं नास्त्येव ब्रह्मणो निर्विशेषस्य तत्कथं तस्य जगदविलक्षणत्वेन जगद्वन्मिथ्यात्वापत्तिरित्यत आह ॥ यदीति। यदि सर्वधर्मरहितं ब्रह्म न तर्हि जिज्ञास्यं स्यात्। सामान्यतः प्रतीतं हि विशेषधर्मवत्त्वं चेदिदमित्थंभूतमिति निश्चेतुं जिज्ञासा

भवति। यदि ब्रह्मण इत्थंभावलक्षणो धर्मो नास्ति तर्ह्येनैवंभूतं प्रति प्रतियोगिभावो न स्यात्। तथा सत्यन्यवन्मिथ्यात्वं स्यादित्युक्तो दोषः। सगुणवत्त्वमेव ब्रह्मणः सर्वज्ञत्वादिधर्मवत्त्वेनैव सद्भावप्रतिपादकैर्यः सर्वज्ञः सर्ववि दित्यादिश्रुतिसमूहैः सिद्धमित्याह॥ इत्थंभावात्मकानीति। अदृश्यत्वादिगुणको धर्मोक्तेरिति वदता सूत्रकारेणापि ब्रह्मणः सगुणत्वमेवाभ्युपगन्तव्यमित्युक्तमित्याह॥ अदृश्येति। अन्यव्यावृत्तिरूपाणामप्यदृश्यत्वादीनां यदा ब्रह्मणि गुणत्वमभिप्रेतं सूत्रकृतस्तदा किमु वक्तव्यं सर्वज्ञत्वादीनां भावरूपाणामित्यर्थः। भावरूपा एव धर्मा ब्रह्मणो न सन्त्यन्यव्यावृत्तिरूपास्त्वभावधर्माः सन्तीत्येषा कल्पना प्रमाणशून्या व्यर्था च। अभावरूपधर्माङ्गीकारेऽपि ब्रह्मणो निर्विशेषत्वभङ्गादित्याह॥ यदीति। ननु न स्वतो ब्रह्मणः सर्वज्ञत्वादिकं सम्भवति परोक्षत्वात्। न हि सर्वमनपेक्ष्य सर्वज्ञत्वं सर्वेश्वरत्वादिकं निरूपयितुं शक्यते। स्वभावतस्तु निर्गुणमेव ब्रह्मेति चेन्नैवम्। एवं सति गुणाधीननिरूपणत्वेन निर्गुणत्वायोगाद्ब्रह्म निर्गुणं च न स्यात्। न ह्यतीतानागतवर्तमानकालानामन्यतमं कालमनपेक्ष्यास्तीति नासीदिति वा भविष्यतीति वा निरूपयितुं शक्यते। अतोऽन्यापेक्षत्वात्परकृतमेव सत्त्वमिति ब्रह्मणः स्वतः सत्त्वं न स्यात्तदेतदाह॥ अन्येति। ब्रह्मणि सत्त्वादिनिखिलधर्मानङ्गीकारे बाधकमाह॥ सर्वेति। न हि सत्त्वमसत्त्वं वाऽन्यद्वा किञ्चिन्निर्विशेषे ब्रह्मणि शास्त्रेण विधातुं शक्यते। अतस्तस्मिञ्छास्त्रमनर्थकं स्यादित्यर्थः। अविद्यमानमेव सर्वज्ञत्वादिधर्मं ब्रह्मणि ज्ञापयति चेच्छास्त्रमप्रमाणं स्यादनाप्तवाक्यवदसदर्थबोधकत्वादित्याह॥ मिथ्येति। ननु निषेद्धुमेव ब्रह्मणि सर्वज्ञत्वादिकमन्यतः प्राप्तमनुवदतः शास्त्रस्य कथमप्रामाण्यं स्यादित्यत आह॥ प्राप्त-

मिति । भवेदेवं यदि प्रत्यक्षादिना सर्वज्ञत्वादिकं प्रतीतं स्यात् । न च तद्भेदादृते ज्ञातुं शक्यमित्याह ॥ न हीति । यद्यप्रामाणत्वेन शास्त्रवेद्यमपि ब्रह्म सर्वज्ञत्वादिकं मिथ्येत्युच्यते तर्हि तद्वदेव शास्त्रवेद्यत्वेन तदभ्युपगतजीवब्रह्मैक्यमपि कथं मिथ्या न स्यादित्याह ॥ वेदेति । न च वाच्यं निर्गुणत्वश्रुत्या यन्निषेध्यं तत्समर्पणपरत्वेन सदेव सौम्येदमग्र आसीदित्यादिश्रुतेरुपपन्नत्वे ब्रह्मणोऽसत्त्वप्रसङ्गात्। यद्यसत्त्ववचनस्याव्यक्ततत्त्वपरत्वेनोपपन्नत्वान्नासत्त्वं ब्रह्मण इत्युच्यते तर्हि निर्गुणत्वश्रुतेरपि प्राकृतगुणराहित्यविशेषतयोपपन्नत्वात् । ननु ब्रह्मणि सर्वज्ञत्वादिधर्मनिषेध इत्यभ्युपगम्यतां निर्विशेषे ब्रह्मण्यतोऽपि धर्मविधायकत्वे शास्त्रमप्रमाणं स्यादित्युक्तम् । अधुना तत्र धर्मारोपोऽपि न घटते युक्तिविरुद्धत्वादित्याह ॥ धर्मेति । अपरोक्षाधिष्ठाने पुरोवर्तित्वादिविशिष्टे परोक्षाभिधाने वा देशकालस्वरूपव्यवहितत्वादिविशिष्टे सामान्यधर्मग्रहणादेव रजताद्यारोपो दृष्टो न पुनर्निर्विशेषः कस्यचिदारोपः । यदि सर्वज्ञत्वादिधर्मारोपे कारणत्वेन ब्रह्मणि सामान्यधर्माद्यारोपोऽङ्गीक्रियते तर्हि तदारोपोऽप्येवमेवमित्यनवस्थापत्तिः । ननु जगदीशत्वसर्वज्ञत्वादेर्मिथ्यात्वे तत्प्रतिपादकवाक्यस्यायथार्थत्वं स्यादिति यदुक्तं तदिष्टमेव। निखिलस्यापि प्रमातृप्रमाणप्रमेयाकारस्योपलभ्यमानत्वहेतुना शुक्तिरजतवद्भ्रान्तित्वाङ्गीकारादित्यत आह ॥ ईशेति । यज्जगद्भ्रान्तत्वसाधनमुच्यते तदेव प्रत्यक्षादिबहुतरप्रमाणविरुद्धत्वादयथार्थमिति न जगतो मिथ्यात्वमापादयति । यद्बहुप्रमाणविरुद्धं तदप्रमाणं हि दृष्टम् । यथा द्वैधे बहूनां वचनं विरुद्धमेकस्य वचनम् । न च सर्वैर्व्यवह्रियमाणस्य भ्रान्तत्वं युज्यते । भ्रान्त्यैव सर्वे जगद्व्यवहरन्तीत्येषैव भ्रान्तिस्तस्य मायावादिनः किं न स्यात् । तस्य जगच्छत्रोर्भ्रान्तत्वे जगदीशादयोजगद्भ्रान्त्यैव व्यव-

हरन्तीति सिध्यति । ननु मायावाद्येत्राभ्रान्तिमान् जगदीशादयस्तु भ्रान्तिमन्त इति किं न स्यादित्यत आह ॥ भवेयुरिति । ननु सर्वलोकप्रत्यक्षसिद्धजगत्सत्यत्वमनुमानेनैव नेह बाधितुं शक्यते । अद्वैतागमेन तु बाध्यतामनुमानवदागमस्य प्रत्यक्षानुपजीवकत्वादित्याशङ्क्याह ॥ सत्यत्वमिति । आगमेन निखिलप्रत्यक्षबाधे आगमस्य स्वरूपं प्रामाण्यं च प्रत्यक्षविशेषगृहीतं न सिद्ध्यत्येवेति कस्य जगत्सत्यत्वबाधकत्वं भवेदित्यभिप्रायः । ननु यावद्बाधं प्रत्यक्षस्य प्रामाण्यमस्त्येव । तेन च प्रत्यक्षेणावगतप्रमाणभावस्यागमस्याद्वैते प्रामाण्यं युक्तमेवेत्याशङ्क्याह ॥ तात्कालिकमिति । किञ्चित्कालं प्रमाणीभूय पश्चादप्रमाणीभावः प्रत्यक्षस्य चेदेकमेवाद्वितीयं तत्त्वमसीत्यद्वैतागमस्यापि स्यादविशेषात् । एवं सति यदा द्वैतागमः प्रमाणीभवति तदाऽद्वैतमिथ्यात्वेन द्वैतमिदं सत्यं भवेत् । परस्परविरुद्धयोरितरनिषेधस्येतरविधिनियतत्वात् । अद्वैतागमस्याबाधितं प्रामाण्यं चेत्प्रत्यक्षादेरपि स्यात्प्रामाण्यत्वाविशेषादित्याह ॥ ऐक्यवाक्यस्येति । किञ्च प्रत्यक्षाप्रामाण्याबाध्यत्ववदद्वैतागमप्रामाण्याबाध्यत्वस्याप्यद्वैतसिद्धिव्याघातकत्वाविशेषात्तदङ्गीकरणमद्वैतवादिनो व्यर्थमेव । यद्यद्वैतागमप्रामाण्यबाधोऽप्यस्ति सोऽप्यबाध्यश्चेदद्वैतव्याघातस्तदवस्थ एव । तदाह ॥ अद्वैतेति । अपि च । यस्त्वद्वैतागमवत्प्रत्यक्षादिकं स्वतः प्रमाणमभ्युपगच्छति तेन मायावादिनाऽद्वैतागमप्रतिपाद्यवत्प्रत्यक्षादिविषयस्य प्रपञ्चस्याबाध्यत्वमवश्यमभ्युपगन्तव्यम् । प्रत्यक्षादेरयथार्थत्वे प्रमाणत्वमेव नाङ्गीकर्तुं शक्यं किमु तस्य स्वतःप्रामाण्यमित्याह ॥ यदीति । यावन्निखिलद्वैतबाधकमपरोक्षज्ञानं न जायते तावत्पर्यन्तमेव द्वैताभासकं प्रमाणमित्येतद्व्याहतमेव । न हि कालत्रयेऽप्येतदप्रमाणमिति बाधकज्ञानेन

गृहीतस्याद्वैतज्ञानस्य कदाचिदपि प्रामाण्यं युज्यते । तदाह ॥ प्रामाण्यस्येति । नन्वस्तु द्वैताभासस्य प्रत्यक्षादेरप्रामाण्यमद्वैत-
प्रमाणेन बाध्यमानत्वादित्यत आह ॥ मिथ्येति । येन प्रमाणेन द्वैतमात्रनिषेधकेन कैवल्यमात्मनः सिध्यति तत्प्रमाणं कैवल्य-
दशायामबाधितं चेदद्वैतभङ्गो बाधितं चेत्पुनर्द्वितीयसद्भावेनात्मनः कैवल्यहानिः स्यात् । अपि च । मुक्त्यवस्थाऽऽत्मनोऽबा-
धिता चेदद्वितीयत्वहानिर्बाधिता चेदमुक्तत्वमेव स्यात् । तथा बन्धनिवृत्त्युत्तरकालो बाधरहितश्चेदद्वैतभङ्गो बाधितश्चेत्काला-
भावेन नित्यत्वस्य निरूपयितुमशक्यत्वान्मुक्तेर्निवृत्त्या संसारः स्यादात्मनः । न च नासीदस्ति भविष्यतीति बाधः कालस्य
युज्यते । स्वव्याहतत्वात् । तीर्णोहि तदा सर्वान् शोकान् हृदयस्य भवति । अथ मर्त्योऽमृतो भवतीति कालसम्बन्धस्य
श्रवणान्मुक्तौ न तस्य निवृत्तिर्वक्तुं शक्यते । न च कालसम्बन्धरहितं किञ्चिदस्ति तदाह ॥ तथेति । अतः प्रत्यक्षादिसि-
द्धस्य द्वैतस्य न कथञ्चिद्बाधकं सम्भवति । न च कुत्रचिद्दृढप्रत्यक्षसिद्धमनुमानेनागमेन वा तदुभयेन वा बाध्यं दृष्टम् । न च
देहात्मत्वं प्रत्यक्षसिद्धं प्रमाणान्तरबाध्यं दृष्टमिति वाच्यम् । मम देह इति भेदस्यैवानुभूयमानत्वात् । अत एव कृष्णोऽहमिति-
वद्देहगतकार्ष्ण्यारोपो देहिनि तत्र कृष्णशब्दः परं शुक्लं पट इव कर्दमलिप्त उपचारेण युज्यते । जातिमूकस्यापि कर्दमलिप्तपटे
कृष्णबुद्ध्युत्पत्तेर्न कृष्णशब्दस्योपचारमात्रत्वं तत्र । किन्तु कार्ष्ण्यमेव कर्दमोपाधिकमस्तीति युज्यते । तर्हि पटस्य यथा स्वतः
शुक्लस्य कर्दमोपाधिकृतं कार्ष्ण्यमेवमात्मनोऽपि स्वतश्चिद्रूपस्य प्रतीयमानकार्ष्ण्यमभ्रान्तमेव देहोपाधिकं भवेत् ।
कर्दमोपाधिकमित्येव प्रतीयमानत्वात् । न हि शुक्ले पटेऽपि कार्ष्ण्यं भ्रान्तम् । तदेतदाह ॥ कथञ्चेति । कार्ष्ण्यं ममेति

न प्रतीयते किमिति काक्वा योजनीयम् । ननु पटकर्दमयोर्भेदेन प्रतीयमानत्वात्कार्ष्ण्यं कर्दमकृतमिति प्रत्येतुं शक्यते । देहात्मनोस्तु भेदेन प्रतीत्यभावान्न देहोपाधिनिबन्धनमात्मकार्ष्ण्यमिति प्रतीतिरुपपद्यते । कृष्णोऽहमिति देहात्मनोरभेदप्रतीतिरित्यङ्गीकृत्य मम देह इति भेदस्तु मम चैतन्यमितिवदौपाधिक इत्येतदपि वक्तुं शक्यत्वात् । न हि पश्वादीनां तत्तुल्यं मनुष्याणां च देहात्मभेदज्ञानं सम्भावितमित्याह ॥ कथमिति । यथा जातिस्मरणं पूर्वदेहानुभूतानुसन्धानात्नृणां देहात्मभेदज्ञानं सिद्धम् । एवमिष्टसाधनत्वेन सहसाऽन्नपानादेः पूर्वदेहानुभूतान्वयव्यतिरेकव्याप्त्यनुसन्धानेनैव बाल्यदशायां मनुष्यादीनां प्रथमस्तनपानादौ प्रवर्तमानत्वादस्त्येव तेषां देहात्मभेदज्ञानम् । अतो गृहादौ नष्टे नष्टोऽहं समृद्धे समृद्धोऽहमिति व्यवहारवद्गौरोऽहमिति व्यवहारोऽपि न देहात्माभेदप्रत्ययनिबन्धनः किन्त्वौपचारिक एव । ननु गृहादेरिव देहात्मनोर्भेदज्ञानमस्ति चेन्मदीयदेहो गौरा न त्वहमिति व्यवहारो लोकस्य किं न स्यादित्याशङ्क्याह ॥ व्याप्तत्वादिति । यथाऽन्तर्बहिरग्न्याक्रान्तमयःपिण्डमग्नेः सकाशाद्विविच्य व्यवहर्तुमशक्यत्वादग्न्यविवेकेनायो दहतीति व्यवहरत्यनिपुणो लोकः । प्रत्यक्षसिद्धेऽप्यग्न्ययसोर्भेदे तथा स्वेन व्याप्तत्वात्स्वस्माद्विविच्य व्यवहर्तुमशक्तेन लोकेन देहः स्वाविवेकतव्यवह्रियते प्रत्यक्षसिद्धेऽप्यात्मदेहभेदे । अतो देहात्मभेदो न प्रत्यक्षो न प्रमाणान्तरबाध्यश्च । चन्द्रस्य प्रादेशमात्रप्रत्यक्षं तु दूरत्वदोषयुक्तत्वेनापटुत्वात्प्रमाणान्तरेण बाध्यते । दृढप्रत्यक्षं तु न केनापि बाध्यमिति तत्सिद्धस्य जगतो न कदाचित्प्रमाणान्तरबाध्यतेति युज्यते । ननु दृढप्रत्यक्षमपि वर्तमानार्थग्राहकमेव न तु तत्कालीनायां मोक्षदशायां विश्वस्याबाध्यत्वं गृह्णाति । प्रत्यक्षस्योत्तरकालीनार्थागोचरत्वा-

दित्याशङ्क्य परिहरति ॥ तदिति । यदेष्यदर्थं सर्वथा न गोचरयेत्प्रत्यक्षं तर्ह्युत्तरकालस्तद्गतो बन्धमोक्षश्च न सिद्ध्येदेव यत्र विश्वबाध आशङ्क्येत । न चोत्तरकालादेरत्यन्ताप्रसिद्धस्यागमेन सिद्धिर्वक्तुं शक्यते । अनुमानस्येवागमस्यापि सामान्यतः प्रत्यक्षसिद्धार्थविषयत्वात् । यस्त्वप्रसिद्धो विशेष आगमबोध्यः स तु पदार्थस्य पदान्तरविशिष्टत्वाख्यो न तु पदार्थमात्रम् । प्रत्यक्षतोऽप्रतीतत्वे तस्य पदेन वाच्यवाचकसम्बन्धग्रहणं न स्यात् । न ह्यप्रतीतेन सम्बन्धो गृहीतुं शक्यते । अतश्चातीतानागतपदार्थेषु सामान्याकारेण साक्षिप्रतीतेषु पदानां वाचकशक्तिर्गृहीतेति तेषां पदार्थानां संसर्गो वाक्येन बोध्यते नान्यथा । यदि वर्तमान एव घटादिः प्रत्यक्षस्तत्रैव च घटादिशब्दसम्बन्धग्रहणं तर्ह्यतीतानागतं च घटादिकं न बोधयेत् । घटादिपदसम्बन्धग्रहणं च पदस्यावर्तमानार्थे प्रतीत एव घटते नान्यथा । सम्बन्धग्रहणकाले दृष्टं घटत्वादिसामान्यं तदेव कालान्तरेऽपि गृहीतशक्तिको घटादिशब्दो ज्ञापयति । घटादिव्यक्तयस्त्वतीतानागताश्च सामान्याधारतयाऽर्थाज्ज्ञायन्ते । अतो न तासां घटादिशब्दसम्बन्धग्रहणार्थं प्रत्यक्षतोऽवगतिरपेक्षितेति यद्युच्यते तर्हि वर्तमानवस्तुस्वरूपेष्वेव दृष्टेषु गृहीतशक्तिको वस्तुस्वरूपशब्दोऽतीतानागतवस्तुरूपेष्वगृहीतशक्तिक इति तानि न ज्ञापयेत् । स्वरूपत्वसामान्यस्य स्वरूपशब्दवाच्यस्याभावादेव न तदाधारतया ज्ञापयतीत्यपि युज्यते । न हि स्वरूपत्वसामान्यं केनचिदङ्गीकृतम् । घटे प्रतियोगिकत्वाच्चात्यन्तव्यावृत्ताकार एव स्वरूपशब्दार्थो वस्तुनिष्ठान्यसाधारणाकारः । अन्यसाधारणं तु घटव्यक्तेर्वस्तुत्वं तत्तदीयान्यसाधारणं द्रव्यत्वं ततोऽपीषत्साधारणं घटत्वमत्यन्तासाधारणं तु स्वरूपत्वमेवेष्यते । अन्यथा वस्तुनो

व्यावृत्ताकारः क इति प्रश्नस्य स्वरूपमित्येवोत्तरं नोच्यते। यदि भेद इत्युत्तरमुच्यते तर्हि स एव स्वरूपपदार्थ इत्यस्मन्मतमेव सिद्धम्। अत एव परस्परव्यावृत्तेष्वप्यतीतानागतवर्तमानेषु स्वरूपेषु स्वरूपशब्दसम्बन्धग्रहणार्थं विशेषतो ज्ञानाभावेऽपि सामान्यतो ज्ञानमवश्यमित्यभ्युपगन्तव्यम्। अत एव वस्तु सर्वमपि सामान्यविशेषात्मकं विशेषबलादेकमेव व्यावृत्तरूपं सामान्यरूपं चेति युज्यते। न च सामान्यस्यैवानेकपदार्थधर्मत्वमाशङ्कनीयम्। रूपादिवद्गोत्वादेरपि प्रतिव्यक्तिभिन्नस्यैव दर्शनात्। न हि खुरपुच्छसास्नादिमत्त्वलक्षणसादृश्यमुक्त्वाऽन्यद्गोषु गोत्वं नामैकमुपलभ्यते। अतो गोत्वाश्वत्वादिसामान्यस्यानेकवर्तिनः शब्दप्रवृत्तिनिमित्तस्य प्रत्यक्षवेद्यस्याभावाद्गवादिसर्वपदार्था गवादिशब्दसम्बन्धग्रहणार्थं केनचिदाकारेण वेत्तव्या एव साक्षिणा। अन्यथा सर्वमिति विज्ञानं सर्वेषां न स्यात्। न हि सर्वं प्रमाणप्रमेयरूपं सामान्याकारेणापि साक्षिणमन्तरेण विषयीकर्तुं शक्यते। तथा तेनापि विषयीकृते च सर्वस्मिन्न हि सर्वशब्दस्य व्यक्तिर्गृहीतुं शक्यते। साक्षिप्रत्यक्षात्तस्य सर्ववस्तुष्वपि सामान्याकारेण प्रवृत्तिं स्पष्टयति॥ किञ्चिदिति। यथेमे दृश्यमानाः सास्नादिमन्तोऽर्था गवादिशब्दवाच्यास्तथा तत्सदृशाः सर्वेऽपि देशकालान्तरस्था गवादिशब्दवाच्या इति। तत्र शब्दसम्बन्धग्रहणान्यथाऽनुपपत्त्या तत्सदृशाः सर्वेऽपि देशकालान्तरस्था गवादिशब्दवाच्या इति। तत्र शब्दसम्बन्धग्रहणान्यथाऽनुपपत्त्या सामान्याकारेण साक्षिप्रत्यक्षेणातीतानागतवस्तुप्रतीतिः सिद्धेत्यर्थः। स्मरणलक्षणप्रत्यक्षस्य मानसस्यातीतकालविशेषितार्थविषयत्वाच्च न वर्तमानविषयत्वं प्रत्यक्षस्य युज्यते। स्मरणं चाबाधितार्थविषयं यदा भवति तदैव प्रमाणं। अनुभूतत्वविशिष्टार्थविषयत्वान्न पूर्वानुभवगृहीतार्थमात्रविषय-

त्वेनाप्रामाण्यमाशङ्क्यम् । न हि पूर्वानुभवोऽनुभूताकारेण वस्तु गृह्णाति तदाह । प्रत्यक्षस्य वर्तमानैकविषयत्वमित्यपि न वाच्यम् । प्रत्यभिज्ञाप्रत्यक्षस्यातीतवर्तमानकालसम्बन्धवस्तुविषयत्वात् । न चातीतकालसम्बन्धांशस्मरणसंश्लिष्टमेतज्ज्ञानमिति वाच्यम् । तदिदं वस्त्विति प्रत्यभिज्ञाप्रत्यक्षस्य विषयवदैक्यप्रतीतेः । अतो न वर्तमानैकविषयत्वं प्रत्यक्षस्य युज्यते । तदाह ॥ मानत्वमिति । एवं मानमातृप्रमेयरूपस्य सर्वस्य प्रत्यक्षतः सार्वकालीनाबाध्यत्वं साधयितुं प्रत्यक्षस्य वर्तमानैकग्राहित्वं निषिद्धम् । तत्र विषयत्वातिरेकेण प्रमेये प्रागुक्तलक्षणं प्रमित्याख्यं प्रमाणतोऽन्यन्नास्तीति तावदाह ॥ न चेति । अतो ज्ञानज्ञातृज्ञेयरूपमेव विश्वम् । तत्र प्रत्यक्षबलादेव सर्वदाबाध्यमभ्युपगन्तव्यम् । न हि स्वप्नस्थस्याधिष्ठानमात्रप्रमेयरूपस्य प्रपञ्चस्य कदाचिद्बाधो दृश्यते । उत्तरकाले तु जाग्रत्त्वमेव बाध्यते स्वप्नस्य न स्वप्नः । अतो जाग्रत्त्ववत्स्वप्नावस्था सत्यैव । जाग्रदवस्थाऽप्यात्मवत्सत्या यथाऽऽत्मनि स्वतन्त्रकर्तृत्वभ्रमो जात इत्येतावताऽऽत्मा न मिथ्या । एवं स्वप्ने जाग्रत्त्वभ्रमो जाग्रदवस्थायां च क्वचिच्छुक्तिरजतादिभ्रमो जात इत्येतावता न स्वप्नजागरिते मिथ्या । यथाऽऽत्मन्यन्यथादृश्यमान एवांशो मिथ्या न तु सर्व आत्मा । एवं स्वप्नजाग्रदवस्थयोरन्यथादृश्यमान एवांशो मिथ्या न तु सर्वे स्वप्नजाग्रदवस्थे च । स्वप्नोऽ-भूतो जाग्रदनुभूतमित्येव व्यवहारोऽनुवर्तते न भ्रमोऽयं जात इति व्यवहारः कदाचित्कस्यचिन्न किञ्चिद्भ्रान्तत्वासादकं प्रमाणं सम्भवति प्रत्यक्षादिसर्वप्रमाणासिद्धस्य जाग्रदादिप्रपञ्चस्य । अपि च । यो वादी सर्वं भ्रान्तिपरिकल्पितमिति वदति स सर्वमध्यपतितत्वात्स्वमतस्य भ्रान्तिमूलत्वमङ्गीकरोत्येव । प्रतिवाद्यपि तन्मतस्य भ्रान्तिमूलत्वमेव प्रतिपादयतीति तस्य तत्रा-

विप्रतिपत्तिरेव । सम्प्रतिपत्त्या भ्रान्तत्वापादकं । एवं भ्रान्तिमूलत्वेनाप्रामाण्यमिति जगतः सत्यत्वं दुर्वारमेव । अपि च । स्वमतस्यापि भ्रान्तित्वं दुर्घटत्वं च भूषणं वदताऽनिर्वाच्यत्वादिना हेयत्वमेव स्वीकृतमिति तन्मतमुन्मत्तोऽपि कथं स्वीकर्तुमिच्छेत् । न ह्युन्मत्तः स्वमतं भ्रान्तमिति नियमेन वदति । नन्वशेषदोषदुष्टत्वेनोन्मत्तेनाप्यनिर्वाच्यवादिमतं हेयं चेत्कथं लोके प्रवृत्तमित्यत आह ॥ ईशेति । अचिन्त्येशशक्त्या प्रेरितैर्महोन्मत्तैः प्रवर्तितमित्यर्थः । अतश्चानिर्वाच्याभावादेवानिर्वाच्यत्वं नोच्यते । स्वप्नस्य मायामात्रपदेन सूत्रगतेन किं तर्ह्युपादनभूतया जीवप्रज्ञया निमित्तया न निमित्तत्वं जीवप्रज्ञाया निरपेक्षतया भ्रान्तत्वमेव तस्य तेनोच्यते । मायावादिनमाभिमुखेति प्रज्ञाया इति प्रज्ञावाचित्वेनाभिधानात् । तदाह ॥ अत इति । एतदेव विवृणोति ॥ उभाभ्यामिति । ननु मनोगतवासनामयस्य स्वप्नप्रपञ्चस्य प्रज्ञोपादानत्वं कथमित्यत आह ॥ प्रज्ञात्मकमिति । कार्त्स्न्येनानाभिव्यक्तस्वरूपत्वादिति सूत्रशेषार्थमाह ॥ मनोविकारा इति ॥ १ ॥ पराभिध्यानात्तु तिरोहितमिति सूत्रं विवृणोति ॥ ईशेच्छयेति ॥ २ ॥ स्वप्नप्रपञ्चवत्तिरोधानवत्सुषुप्तिप्रबोधादिकं जीवस्य परेशेणैव हरिणा भवति स्वतन्त्रेण न तु कालकर्मादिनेत्याह ॥ सुषुप्तीति । न च केषुचिदेव जीवेषु स्वप्नादेर्हरिर्नियन्तेति वाच्यम् । प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव तु । परमः पुरुषो विष्णुस्ततोऽन्यो नास्ति कश्चन । देशकालविशेषेषु स्वप्नादीनां स एव हि । तिरस्कर्ता च कर्ता च न खण्डेशः स राजवदिति वचनविरोधात् । अनेन तदभावो नाडीषु तच्छ्रुतेरात्मनि ह । अतः प्रबोधोऽस्मादिति सूत्रतात्पर्यमुक्तं

भवति ॥ ४ । ५ । ६ । ७ ॥ नन्वेकस्यापि परमात्मनो जाग्रत्स्वप्नसुषुप्त्यादिस्थानभेदाज्ज्ञानशक्त्यादितारतम्यं जीवस्येव किं न स्यादित्येतामाशङ्कां परिहरतो न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हीति सूत्रस्यार्थमाह ॥ न स्थानेति । सर्वस्थानेष्वपि निर्दोषः पूर्णषड्गुणार्णव एव विष्णुर्न स्वरूपगततारतम्ययुक्तः । सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत इति श्रुतेः । सर्वेषु भूतेषु स्थितं विष्णुं ब्रह्मेत्येव पूर्णगुणक इत्येवाचक्षत इत्येवार्थः । न चैतद्विरुद्धार्थम् । न सत्यं नापि चानृतं प्राज्ञः किञ्चन संवेत्ति तुर्यं तत्सर्वदृक् सदेत्यादिवचनम् । तुरीयनामा परस्तुरीयावस्थजीवं प्रति सर्वं दर्शयतीति सर्वदृक् प्राज्ञनामा हरिः सम्प्रसुप्तं न वेदयतीति न संवेत्तीत्येवमविरुद्धार्थत्वेन वक्तुमशक्यत्वात् । वेत्तीत्यन्तर्गर्भितणिजर्थो व्यपदेशः । अन्यथा तस्य प्रयोजनवदर्थवत्त्वव्याहत्या प्रामाण्यनिश्चयो न स्यात् । प्रमाणवदर्थवत्त्वं च वेदस्येश्वरे गुणपूर्णत्वमज्ञानादिदोषराहित्यं चावेदयत एव स्यान्नान्यथा । यतो विष्णोर्निर्दोषाशेषगुणवत्त्ववेदनमेव तत्प्रीतिद्वारा दुःखरहितसुखावाप्तिसाधनम् । एतदेव श्रुतिस्मृतिवाक्यैः समर्थयति ॥ यो मामेवेत्यादिना । यो मामेवमसम्मूढो जानाति पुरोषत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारतेत्यादि । तद्भगवद्वाक्यम् । खलेन पुरुषान्प्रतिहन्मि भूरि किं मां निन्दन्ति शत्रवोऽनिन्द्रा इति श्रुतेरयमर्थः । इन्द्रं परमेश्वरं मामनिन्द्रा अनीश्वराः सन्तः शत्रव आसुरप्रकृतयः किं निन्दन्ति । दोषाभावेन मम निन्दितुमशक्यत्वात् । निर्निमित्तं निन्दितस्तान्बहुतरानपि खल इव परुषान्धान्यानि प्रतिहन्मि चूर्णयामि । परमेश्वरो गुणोत्कर्षज्ञानेनैव प्रीयते न निन्दयेत्युक्तं भवति । परमेश्वरस्य गुणोत्कर्षज्ञानमेव तत्प्रीतिद्वारा मुक्तिसाधनमित्येतल्लोकानुसारादपि सिध्यति । लोके राजगुणोत्कर्षज्ञानस्य

राजप्रीतिद्वारा श्रृङ्खलादिबन्धनिवृत्तिसाधनत्वदर्शनादित्याह ॥ लोकेत इति । अतो विष्णौ दोषित्वं निर्गुणत्वादिकं न वेदेन प्रतिपाद्यते । तस्य परमप्रयोजनवदर्थवत्त्वविरोधात् । निर्दोषतया महागुणवत्तया च पुरुषोत्तमत्वमेव स्वस्य वेदार्थ इति स्वयं विष्णुरेव सतात्पर्यमुक्तवान् । यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । इति गुह्यतमं शास्त्रमिति । तदाह ॥ महातात्पर्येति । अतः सुषुप्त्यादिस्थानभेदेन मनुष्यपश्वादिशरीरभेदेन न जीवात्मनीव परमात्मनि हीनोत्तमादिभावानुमानमखिलशास्त्रविरुद्धत्वेनाप्रमाणमेवेति स्वगततारतम्यरहितानन्तरूपो विष्णुः सिद्ध इत्युपसंहरति ॥ अत इति ॥ ८ ॥ अधुनेशेनेशरूपाणां चिद्रूपाणामिव जीवस्याप्यभेदः किं न स्याच्चेतनत्वादित्याशङ्क्य श्रुतिभिराभासत्वोक्तेर्न तस्येशेनाभेद इत्याह ॥ न चेति । श्रुतीरुदाहरति ॥ यथेति । यथैवेत्यस्य विवरणं छाया यथेत्यादि अनेन प्रतिबिम्बस्य बिम्बाधीनत्वप्रतिपादनेन जीवपरमात्मनोर्बिम्बप्रतिबिम्बभावेऽप्यभेदः किं न स्यादित्येतच्चोद्यं परिहृतं भवति । विशेषकौ गरुडशेषावित्यर्थः । उक्तार्थमनूद्याक्षिपति ॥ आभासत्वमिति । अयमर्थः । कृष्णादिवदीशस्यांश एव जीवो नाभासत्वम् । आभासत्वे देहाद्युपाध्यायत्तस्य देहाद्युपाधिनाशे नाशः स्यात् । पुरुषाद्याभासस्य दर्पणाद्युपाधिगतस्य दर्पणाद्यपगमेऽपगमदर्शनात् । अतो जीवानां नित्यत्वेनाभासत्वायोगात्कृष्णादिवदंशभूतानां चिद्रूपत्वेनेशाभेद एव स्यात् । निखिलचेतनसमुदाये हीशाख्या यथा कृष्णादिरूपसमुदाये सिद्धान्त्यभ्युपगता समुदायान्तरेण भेदेऽपि समुदायाकारेणाभेदो नानुपपन्नः । अत एव पृथगुपदेशादित्यत्र यत्पृथक्त्वमुदितं तच्चिद्रूपस्येशस्यांशयोः कृष्णादिलक्षणजीवलक्षणयोर्भवेत् । तच्च

जीवानां देहेन्द्रियोपाधिकृतं न सहजम् । अतस्तदुपाधिनाशे तेषामीशरूपैः कृष्णादिभिः साम्यमेव स्यात् । तदेतत्परिहरति ॥ इत्याशङ्क्येति । अत एवचोपमा सूर्यकादिवदिति सूत्रकृता प्रतिबिम्बितसूर्यकादिविलक्षणत्वेन जीवस्योक्तत्वादीशाभासत्वेऽपि न तस्यानित्यत्वमित्यर्थः । ननु नित्यानां जीवानामीशाभासत्वं किं निमित्तम् । किञ्च तेषां सूर्याभासादिवैलक्षण्यमित्यत आह ॥ यदुक्तमिति । यथा सूर्याभासस्य स्वबिम्बाधीनत्वं स्वबिम्बसादृश्यमेवमीशाभासस्य जीवस्य न तु तद्वदुपाध्यधीनत्वम् । न हि दृष्टान्तदार्ष्टान्तिकयोः सर्वं साम्यम् । कुत्रचिदीशादाभासते ईशवदवभासते ईशादासमन्ताद्भवत्यस्तित्वं च तत इति हीशाभासो जीवः । सर्वदा तस्मादुपाधिनोत्पन्नस्यापि जीवस्याभासत्वं हेत्वाभासवत्तद्वदेव कल्पितत्वं च युज्यते । अतो यदेतत्पूर्वं प्रतिपादितं स्वबिम्बाधीनत्वं स्वबिम्बेन किञ्चित्सादृश्यं च जीवस्य तद्द्वयमेवकारचकाराभ्यामुपादायात एव सूर्यकाद्युपमा श्रुतिस्मृतिषु क्रियते न तूपाध्यधीनत्वेनेति सूत्रोक्तं भवतीत्याह ॥ तदधीनत्वमिति । ननूपाध्यधीनाभासत्वाभावे जीवस्य मत्स्याद्यवतारवदीशाभेदः किं नेष्यते । चिद्रूपत्वाविशेषादित्यत आह ॥ जीवेशेति । न हि दुःखादिदोषवता जीवेनाशेषदोषरहितस्येशस्याभेदो युज्यते । अशेषदोषराहित्यं च तस्य स्वातन्त्र्यादिसर्वशक्तिमत्त्वेन सिध्यति । न हि स्वतन्त्रे दोषीति भवितुं शक्नोति । एतदेव हि समर्थितम् ॥ सर्वोपेता च तद्दर्शनादिति सूत्रेण । लौकिकदृष्टान्तेन जगत्कर्तरि प्राप्तश्रमाचिन्तादिदोषपरिहारपरेण । अपि च । ऐक्ये जीवेशयोः स्वस्वानुभववदीश्वरोऽहमिति जीवस्य जीवोऽहमितीशस्यानुसन्धानं स्यात् । अननुसन्धाने तु तयोरैक्यं न स्याद्घटेनेव जीवस्य ।

न हि कुत्राचिदेकस्य चेतनस्य स्वस्मिन्ननुभवाननुभवावेकविषयौ दृश्येते स्वस्मिन्नप्यतीतजन्मस्थे। अधुनाऽननुसन्धानं तु कालव्यवधानाद्युज्यते। अतः स्वपादादिगतसुखाद्यनुसन्धानवदीशादिचेतनानामन्योन्यसुखदुःखाद्यनुसन्धानाभावाद्वृक्षाणामिव समुदायाकारेणैक्यमन्तरेण नान्यदैक्यं भवेत्। अपि च। ईशस्य दुःखिभिर्जीवैरैक्यानुसन्धानायोगात्तेन सर्वज्ञेनाननुसन्धीयमानमिति न मुक्तावप्यनुसन्धातुं शक्यते। विद्यमान ऐक्याननुसन्धानत्व ईशस्याप्यज्ञत्वप्रसङ्गः। अतो जीवो मोक्षात्प्रागननुसन्धीयत इति वाच्यम्। कुत्रापि सप्तमरसस्योत्पत्तिवच्चेतनस्य चेतनेन पूर्वविद्यमानैक्योत्पत्त्यदृष्टेः। अतो मत्स्याद्यवतारवदीशाभिन्नांशत्वं जीवानां दूरोत्सारितमित्येवाह ॥ समुदायेति। अतो यावदेव विष्ण्वंशांशिरूपादिकं निर्दोषं गुणबृंहितं विष्णुना स्वाभिन्नत्वेनानुभूयमानं तावद्दूर एवेश्वरत्वम्। तत्र स्वगतभेदो नास्त्येव। इन्द्रो मायाभिः पुरुरूप ईयते। युक्ता ह्यस्य हरयः शतादशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च। तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा। यश्चायमस्मिन्तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयः पुरुषोऽयमेव सोऽयमात्मेतीदममृतमिदं ब्रह्मेति। नेह नानास्ति किञ्चनेत्यादिश्रुतिः। ननु जीवस्येशांशत्वेऽपि तदभेदाननुसन्धानमिन्द्राद्यंशभूतार्जुनादीनामिन्द्राद्यभेदाननुसन्धानवद्युज्यत इत्याशङ्क्य दृष्टान्तेऽप्यननुसन्धानमदृष्टमित्याह ॥ जीवांशा इति। इन्द्रादीनामंशेन भूमाववतारितानां मध्येऽप्यल्पेनाप्यंशिनांऽशगतसुखदुःखाद्यनुसन्धानमात्मीयत्वेनानुसन्धीयतेऽशेन त्वंशिगतसुखदुःखादिकं किञ्चिदेवानुभूयते। ज्ञानशक्त्यादेरंशिन्यतिशयोंऽशे न्यूनतेति विशेषादीशेन घटितो भवेत्। ईशस्याचिन्त्यशक्तित्वादप्यंशिनोः परस्परविशेषघटकत्वं युज्यते।

न चैवं सत्याचिन्त्यशक्त्यैवेश्वरः स्वाभिन्नत्वेऽपि जीवस्य पारतन्त्र्यादिविशेषं घटयतीति वाच्यम् । अस्वतन्त्रेणाभिन्नस्याचिन्त्यशक्तित्वासम्भवेनाघटितघटकत्वानुपपत्तेरित्याह ॥ सेशतेति । सर्वप्रमाणविरुद्धं नेशानीशयोरैक्यं केनापि बोधयितुं शक्यते । श्रुतिरपि किमीश्वरं प्रमाणसिद्धमधिकृत्यानीशभावं बोधयत्युतानीशजीवं प्रमाणसिद्धमधिकृत्येश्वरभावम् । उभयथाऽप्युपजीव्यप्रमाणविरुद्धत्वान्न तत्र प्रमाणम् । एवमयमुपजीव्यप्रमाणविरुद्धोऽप्यभेद ईश्वरस्य शक्त्या घटित इति न वक्तव्यम् । अनीशेनाभिन्नस्येशत्वासिद्धेरुक्तत्वात् । अतोऽनीशाद्भेदेनेशे सिद्ध एव । तच्छ्रुत्याऽन्यदघटितमपि घटितमिति वक्तुं शक्यते । न तु पुनरेकस्मिञ्जीवेंऽशांशभाववति । शक्त्यादितारतम्यमिवेश्वरः स्वस्मिन्नपि तच्छ्रुतितात्पर्यविचारशून्यप्रतीतिप्राप्तमीशत्वपरिपन्थिनं घटयतीति । ईशस्यानीशभावविरोधात् । ब्रह्मतर्के चायं विरोध इत्युक्त इत्याह ॥ ईशोऽनीश इति । यथा जगन्मिथ्येत्येतस्य मिथ्यात्वे जगतो मिथ्यात्वं व्याहतं यथा च भेदो नेति भेदतन्निषेधयोर्भेदेन भेदनिषेधो व्याहतः । एवमीशस्यानीशभावो व्याहत इत्यर्थः । न चेशत्वानीशत्वादिवदणिममहिमादेरप्येकस्मिन्विरुद्धत्वेनानीश्वरत्वमीशत्वविरोधि स्यात् । तदेतच्च ब्रह्मतर्केण समर्थयति ॥ नायुक्तमिति । अमानं निष्प्रमाणकमित्यर्थः ॥ १० ॥ नन्वत्र विष्णौ प्रमात्वनिरूपकत्वेन या भक्तिरभिप्रेता न सा बहुमानपूर्वकप्रेमलक्षणा । तस्मिन्नाकाशवन्मूर्तत्वेन सौन्दर्यादिगुणरहिते सम्भवति । अमूर्तश्चासौ दिव्यो ह्यमूर्तः पुरुष इति श्रुतेः । मूर्तत्वे विष्णोर्घटवदनित्यत्वं स्यादित्यत आह ॥ स चेति । यदा पश्यः पश्यते रुक्मवर्णम् । य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते । हिरण्मयश्मश्रुर्हिरण्मयकेश आप्रणखात्सर्व एव सुवर्णः ।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभातीत्यादिश्रुतिभिरानन्दादिगुणात्मकसुन्दरतररूपत्वेनोक्तत्वान्नामूर्तो विष्णुः प्राकृतमूर्तिशून्यत्वादमूर्त इति श्रुत्योच्यते। अत एव न तस्यानित्यत्वम्। मूर्तत्वेऽपि प्राकृतरूपवत्त्वं ह्यनित्यत्वेन व्याप्तं घटादौ। अजरोऽमरोऽच्छेद्योऽयमिति स्मृतिभिश्च विष्णो रूपेषु नित्यत्वमवगम्यते जरामरणनिषेधात्। न ह्यरूपे जरादिप्रसक्तिरस्ति। अत एव ब्रह्मणि रूपत्वारूपत्ववचनयोर्व्यवस्थितविषयत्वान्न विरोधः शङ्कनीयः। लोके रूपशब्दस्य प्राकृतरूपेष्वेव प्रसिद्धस्याप्राकृतरूपे भगवति प्रयोगं सदृष्टान्तमुपपादयति ॥ यथेति। अस्तमित आदित्ये याज्ञवल्क्यचन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यस्यां श्रुतौ यथा सूर्यादेर्बाह्यद्योतस्याभावदशायां सुप्तावस्य जीवस्य स्वरूपसुखादिद्योतके भगवत्यप्राकृतप्रकाशे ज्योतिःशब्दः प्रयुक्तः। प्राकृतप्रकाशैकविषयतया लोकप्रसिद्धोऽप्येवं रूपशब्द इत्यर्थः॥ अनेनारूपवदेव हि तत् प्रधानत्वात्प्रकाशवच्चावैयर्थ्यमित्यादिसूत्रं स्पष्टीकृतं भवति ॥ ९ ॥ अत्र भगवतः प्रभावनिरूपणफलत्वेन या भक्तिरभिप्रेयते तद्विषयविष्णौ न्यूनातिरेकभावाभावेऽपि सा न्यूनातिरेकभाववत्येव। न हि ब्रह्मादिमनुष्योत्तमपर्यन्तानामेकविधैव भक्तिः। अत एव तेषां श्रुत्युक्तमानन्दतारतम्यं सिध्यतीत्याह ॥ भक्तीति ॥ १२ ॥ ब्रह्मादिगतानन्दस्य नारायणानन्दप्रतिबिम्बभूतस्य बिम्बभूतानन्दवैचित्र्याभावेऽप्याश्रयगुणवैचित्र्याद्वैचित्र्यमुपपन्नमित्याह ॥ प्रतिबिम्बवदिति। एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या भगवदानन्दलेशाभासत्वमेव ब्रह्माद्यानन्दस्योच्यते। न

त्वसौ भगवदानन्दस्य साक्षाल्लेशतया तेनाभिन्न इति । अन्यज्ज्ञानं परस्येत्यादिश्रुतिविरोधात् । अनेन वृद्धिर्ह्रासभाक्त्वमित्यादिसूत्रं स्पष्टीकृतं भवति ॥ १७ ॥ अधुना भगवद्भक्त्युद्रेकाय जगत्स्थितिरपि तदधीनेत्येतदाक्षिप्य समर्थयति ॥ स्रष्टीति । नन्वस्तु जगतः सृष्टिनाशयोरेव हर्यधीनत्वं पूर्वमेव प्रपञ्चितत्वात् । सृष्टवस्तुस्थितेरुपसंहारपर्यन्तं स्वभावत एव सिद्धत्वेन हर्यनधीनत्वमिति चेन्मैवम् । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्तीति सर्वस्वभावस्यापि हर्यधीनत्वश्रवणात् । अस्मिन्नर्थे श्रुतिश्च । नैतावदेना परोऽन्यदस्त्युक्षा स द्यावापृथिवी बिभर्तीति । एना अनेन विश्वकर्मणा परमेश्वरेणैतावदस्त्येषेत्यादिना पूर्वप्रस्तुतसृष्टिसंहाराख्यमेव कार्यं भवतीति न किं तर्हि स उक्षा पुरुषर्षभो द्यावापृथिवी बिभर्ति धत्ते पुष्णाति चेत्येतदन्यदपि परतः परेशात्साध्यमस्तीत्यर्थः । अनेन प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति सूत्रं स्पष्टीकृतं भवति ॥ १३ ॥ ननु यदुक्तं भक्तितारतम्यस्य मुक्तावानन्दतारतम्यं साध्यमिति तन्न । यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीति दर्शनसाध्यत्वस्य श्रवणात् । न च दर्शनसहितभक्तितारतम्यस्य हरिविषयस्य मुक्त्यानन्दतारतम्यं साध्यमिति वाच्यम् । यदेकमव्यक्तमनन्तरूपः । न चक्षुषा पश्यति कश्चिदेनमिति हरेरदृश्यत्वश्रवणादित्यत आह ॥ अव्यक्तइतीति । अभक्तानामेवादृश्यत्वादव्यक्त इत्युच्यते हरिः । साधनान्तरस्य तद्व्यक्तीकरणसामर्थ्याभावेऽपि स्वशक्त्यैव भक्तैर्दृश्योऽसौ । तथा च तस्यैव वाक्यम् । भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपेति ।

अनेन तदव्यक्तमाह हि । प्रकाशश्च कर्मण्यभ्यासादिति सूत्रं स्पष्टीकृतं भवति ॥ १४ ॥ नन्वनन्तगुणवान्हरिरिति तदुक्त्यर्थमत्र यत्प्रतिपादनं तन्न युक्तम् । गुणानां हरेश्च परस्परभेदानभ्युपगमेन गुणगुण्यादिभावानुपपत्तेरित्याशङ्क्य विशेषबलादुपपन्नो गुणगुण्यादिभाव इत्याह ॥ तदभिन्ना इति । नन्वस्यानन्दादिभिरकादाचित्कैरभेदो हरेरविरोधाज्जगत्स्रष्टृत्वादिधर्मैः सर्जनादिकर्मभिश्च कादाचित्कैस्तु नाभेदो युज्यते । अनित्यधर्माभिन्नस्य हरेरप्यनित्यत्वापत्तेरित्यत आह ॥ विशेषात्मतयेति । सर्जनशक्तिरूपेण भगवति नित्यं सतामेव सर्जनादिक्रियादीनां पुनः पुनरपि व्यज्यमानत्वान्नानित्यत्वम् । न चाभिव्यक्तरूपस्यानित्यत्वमाशङ्कनीयम् । नित्यशक्तिरूपाभिन्नत्वात्तस्य । शक्तिरूपं व्यक्तिरूपमिति पृथग्व्यवहारस्तु विशेषनिबन्धनः । विशेषतद्वतोरभेदेऽपि विशेषणविशेषिभावः स्वनिर्वाहकत्वात्सिध्यति । अभिन्नेऽपि वस्तुन्ययमेव विशेष्यांशोऽयमेव विशेषणांश इत्येव प्रमाणैर्ज्ञायमानत्वाद्व्यवस्था सिध्यति । न च भेदहीने परमात्मनि विशेषो नास्तीति वाच्यम् । स इमान् लोकानसृजतेत्यादिश्रुत्या तत्स्रष्टृत्वादिविशेषप्रतीतेः । सोऽसृजतेति सामानाधिकरण्यात्स इति शब्दनिर्दिष्टस्य परमात्मनः स्रष्टृरूपेणाभेदप्रतीतेश्च । यस्त्वत्र सविशेषाभेदमसहमानो धर्मधर्मिणोर्भेदं वदति स प्रष्टव्यः । किमस्यापि भेदस्य धर्मिभ्यो भेद उताभेदो निर्विशेषाभेदो वा । नाद्यः । भेदस्य भेदे तस्यापि भेद इत्यनवस्थानात् । न द्वितीयः । भेदवद्धर्मस्यापि धर्म्यभेदापत्तेः । तद्भेदस्याङ्गीकर्तुमशक्यत्वात् । न तृतीयः । धर्मधर्मिभ्यां भेदस्य निर्विशेषाभेदे तस्याप्यभेद इति व्यवहारस्याभावप्रसङ्गात् । तस्य विशेषनिबन्धनत्वात् । विशेषाभावे घटस्य भेद इति घटस्य घट इत्युक्तं भवति । तत्र तत्प्रतियोगि-

कतयैकस्य वस्तुभेदस्य बहुधा व्यवह्रियमाणत्वाच्च न निर्विशेषत्वं युज्यते । किञ्च योऽयं भेदस्य भेदो धर्मिणा तस्य ततो भेदस्तस्यापि भेद इत्यनवस्थापत्तेरभेद इति वक्तव्यम् । ततश्च तयोर्भेदाभेदयोरेकवस्तुस्वरूपत्वेन परस्परमप्यभिन्नयोर्विशेषाभावे भेदाभेदशब्दयोः पर्यायत्वं स्यात् । न हि तयोः पर्यायत्वं केनचिदप्यभ्युपगतम् । ननु न विशेषो भेदाभेदयोः किन्तु भेद एवाभेदस्तु तयोर्धर्मिणा सहेत्याशङ्क्य परिहरति ॥ भेदोऽन्योन्यमिति । एवमपि भेदाभेदयोर्विशेषत्वं भवेदेव । तयोर्धर्मिणा निर्विशेषाभेदे धर्मितावन्मात्रत्वं स्यात्तदा कथमभेदो भेदिना भिन्नो भेदो भेदिना भिन्नस्तयोर्भेदाभेदयोश्च परस्परं भेद इत्ययमर्थः सिद्ध्येत् । किन्तु धर्मिशब्द एव बहुश उच्चारितो भवेत् । यद्येतद्दोषपरिजिहीर्षया भेदभेदयोर्धर्मिणा भेदेऽपि न धर्मितावन्मात्रत्वं किन्त्वस्ति विशेष इत्युच्यते । तर्ह्यभेदभेदयोरपि विशेष एव स्यात् । किं भेदेन विशेषबलादेव व्यवहारसिद्धौ पदार्थबहुत्वकल्पनाया अन्याय्यत्वात् । न च कल्पनागौरवापत्तेर्गोवतुरगादेरपि धर्मधर्मिवत्सविशेषाभेद एवास्त्विति वाच्यम् । तेषामैक्यप्रतीत्यभावात् । न हि गौरेवाश्व इति प्रतीतिरस्ति । धर्मधर्मिणोस्तु भेदाप्रतीतेः सविशेषाभेदो युक्तः । आनन्दो ब्रह्मेत्यादिप्रमाणाच्च । न केवलं सच्चिदानन्दादेर्ब्रह्मणस्तु धर्मधर्मिभावमङ्गीकुर्वता तदन्यथाऽनुपपत्त्या स्वीकार्यो विशेषः किन्तु तमनङ्गीकुर्वता वैदिकाभासेनापि स्वीकार्य इत्याह ॥ सच्चिदिति । सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्राखण्डार्थं प्रतिपादयता मायावादिनाऽपि सत्यादिपदानामपर्यायत्वसिद्ध्यर्थं ब्रह्मणि विशेषोऽवश्यमभ्युपगन्तव्यः । अन्यथा सत्यपदेनैव गतार्थस्य ज्ञानादिपदस्य वैयर्थ्यप्रसङ्गादित्यर्थः । प्रकृते किमायातमित्यतः सर्वात्मना विष्णुरेवोच्यत इत्याह ॥ अत इति ॥ १५ ॥ न

चानन्दत्वाज्ज्ञानत्वादित्यादिहेतुना भगवदानन्दादीनां लोकगतानन्दादिवदपूर्वत्वादिकमाशङ्क्यम् । एष ह्येव परम आनन्द इत्यादिश्रुतिविरोधात् । अलौकिकेष्वपि भगवदानन्दादिगुणेषु लौकिकानन्दादिसादृश्यादनुकूलत्वादेवानन्दादिशब्दप्रवृत्तिर्मृन्मयघटसादृश्यात्सौवर्णघटे घटशब्दस्येव युज्यते । तदेतदाह ॥ न चेति । अनेन परमतःसेतून्मानसम्बन्धभेदव्यपदेशेभ्यः । बुद्ध्यर्थः पादवदिति सूत्रद्वयतात्पर्यं विवृतं भवति ॥ १६ ॥ ननु विष्णावतिशयितभक्तिसिद्ध्यर्थं यदत्र सर्वगुणाढ्यत्वं प्रतिपाद्यते तच्च न युज्यते । कर्मण एव स्वर्गादिफलदत्वेन विष्णोः फलदातृत्वगुणाभावादित्यत आह ॥ स एवेति । पुण्येन पुण्यं लोकं नयतीत्यादिश्रुतेः । विष्णुरेवानन्तजीवानां तत्तत्कर्मानुसारेण फलदाता । कर्मणस्त्वचेतनत्वान्न फलदातृत्वं युज्यते । न हि सेवैव फलं ददाति । राजादिर्हि सेवानुसारेण फलदाता दृष्टः । कृष्यादिकर्माऽपीशत एव फलति न स्वतः फलति चेत्कदाचिद्विफलं न स्यात् । पादार्थमुपसंहरति ॥ तस्मादिति ॥ २० ॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां तृतीयाध्यायस्य द्वितीयः पादः ॥ ३—२ ॥

श्रीगुरुभ्योनमः ॥ हरिः ॐ ॥ अस्मिन्नध्याये पादाः सर्वे हेतुहेतुमद्भाववन्त एवेत्युपासनापादस्याप्यस्य भक्तिपादेन हेतुहेतुमद्भावाख्यैव सङ्गतिः । विष्णोरापरोक्ष्यसाधनस्य निरन्तरध्यानलक्षणस्य निरन्तरशास्त्रविमर्शनलक्षणस्य चोपासनस्य प्रेमातिशयलक्षणभक्त्याविनाऽनुपपद्यमानत्वात्प्रेमामात्रे विस्मरणप्रसङ्गात्प्रेमास्पदं हि लोके पुनः पुनः स्मर्यते । द्वेषान्नि-

रन्तरध्यानं तस्याप्रियत्वान्न तद्विष्णोस्तत्त्वापरोक्ष्यजननसमर्थमतो नैतत्पादप्रतिपाद्यम् । तदेतदाह ॥ वैराग्यत इति । अधुना वैराग्यादिपदानां सङ्गतिप्रतिपादनप्रसङ्गात्प्रथमसूत्रमारभ्योपासनापादपर्यन्तानां पादादीनां सङ्गतिस्पष्टीकरण-पूर्वकं सङ्क्षेपतो ब्रह्मजिज्ञासामावर्तयितुं तस्यामधिकारिणं तावन्निरूपयति ॥ युक्तितत इति । वेदमुख्यार्थो विष्णुः । स च युक्त्यविरुद्धं तद्विरुद्धमप्रमाणं वेदवाक्यानां परस्परविरोधो नास्ति । संसारो हेयो मोक्ष एव परमपुरुषार्थ इत्यधीतवेदवाक्येष्वापाततः प्रत्ययो जायते । एवं निगमनिरुक्तादिना व्युत्पन्नपदपदार्थस्य सात्त्विकप्रकृतेर्जन्मान्तरसंस्कार-वशात्स एव प्रत्ययो ब्रह्ममीमांसया दृढीक्रियते । कथमन्यथा समयान्तरपरित्यागेन तस्यामेव प्रवृत्तिर्घटते । अतः सामान्यतो ज्ञातवेदार्थस्यैव ब्रह्मजिज्ञासाधिकार इत्यर्थः । तामेव विष्णुजिज्ञासामावर्तयति ॥ कर्तव्येत्यादिना । योऽसावुक्तलक्षणोऽधिकारी अथातो ब्रह्मजिज्ञासेत्यत्राथशब्दनिर्दिष्टस्तस्य ब्रह्मजिज्ञासाविधाने कुत इति शङ्का जायते । तन्निवृत्त्यर्थमत इति पदं प्रयुक्तम् । तेन को हेतुर्निर्दिष्ट इत्यपेक्षायां यद्व्यासाख्येन भगवतोक्तं जन्माद्यस्य इति सूत्रं तस्यार्थमाह ॥ सृष्टीति । सूत्रद्वयफलितार्थमाह ॥ यत इत्यादिना । यतो जिज्ञासाजनितज्ञानेनातिप्रीत एव विष्णुर्मोक्षदो न तु यजनादिनेषत्प्रसन्नोऽतो जिज्ञास्योऽसाववश्यं मुमुक्षुणेत्यर्थः । त्रयीसूत्रमवतार्य विष्णोरेव मोक्षदत्वं समर्थयति ॥ मोक्षादीति । ननु विष्णोरेव मोक्षदत्वं न शास्त्रात्सिध्यति । प्रत्यक्षादिवेद्यस्यापि मोक्षदत्वसम्भवादित्याशङ्क्य परिहरति ॥ प्रत्यक्षेति । प्रत्यक्षगम्यत्वे मोक्षदस्य सुलभत्वेन प्रजानामनादितः

संसारानुवृत्तिर्न स्यात् । श्रुतिशिरोदुर्गस्थत्वे तु मोक्षदस्यासुलभत्वात्सा युज्यत एव । विमतो न मोक्षदः पुरुषत्वात्सम्मतवदिति प्रत्यनुमानेन पराहतत्वात् । अनुमानेनापि न मोक्षदोऽनुमातुं शक्यते । तस्माच्छास्त्रैकवेद्यो मोक्षद इत्युपसंहरति ॥ तदिति । ननु शास्त्रवेद्या अपि बहवः सन्ति । तत्र कथं विष्णुरेव मोक्षद इति निश्चय इत्यत आह ॥ शास्त्रगम्य इति । स्वतन्त्रत्वाद्विष्णुरेव मोक्षदत्वेन शास्त्रवेद्यो न पद्मजादिः परतन्त्रत्वात् । परतन्त्रस्तु स्वयमेव संसारादनुत्तीर्णः कथमन्यमुद्धरेत् । ननु राज्ञोऽनुज्ञया स्वसेवकानां मान्य इव निगडमोक्षदः कश्चित्परतन्त्रोऽप्यन्तरङ्गभूतो विष्णोस्तदनुज्ञया स्वोपासकेभ्यो मोक्षं दास्यत्यथो व्यर्था विष्णुजिज्ञासेत्याशङ्क्य परिहरति ॥ अन्येति । न ह्यमन्दमतिर्भगवान्स्वानुपासकायापि मोक्षमन्येन प्रसादितो ददातीति युज्यते । न ह्यस्वतन्त्रोऽसौ । अतोऽन्यद्वारकमोक्षार्थमपि जिज्ञास्यो मुमुक्षुभिर्विष्णुः । स एव हि ज्ञातो मोक्षद इत्येतद्यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामित्यनया तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते इत्यनया च श्रुत्या सिद्धमित्याह ॥ यमेवैष इति । यं पुरुषमेष विष्णुर्मदुपासकत्वान्मदीयोऽयमिति वृणुते स्वीकरोति तेनैव स्वीकृतेन लभ्यो भवति । तस्य स्वीकृतस्य स्वरूपभूतां चिदानन्दात्मिकां तनुमेष आत्मा विवृणुते प्रादुर्भावयति । अतस्तं विष्णुमेव विद्वानमृतो भवति नान्य इति श्रुत्यर्थः । एतदेव विष्णुलिङ्गं श्रुत्या द्रढयति ॥ य एनमिति । यमन्तः समुद्रे कवयो वयन्ति । यतः प्रसूता जगतः प्रसूतीत्यादिना क्षीराब्धिशायित्वेन प्रकृत्यादिप्रसवितृत्वेन च प्रकृतो यः स एव तदेव ब्रह्म परमं कवीनामिति परब्रह्मत्वेनावधारितस्तमेतं ये विदुस्त एवामृता भवन्तीत्यतो विष्णुरेव

मोक्षदत्वेन मुख्यार्थः सर्वशास्त्रगम्यो नान्य इत्यर्थः । तदेव तृतीयसूत्रमवतार्य समर्थयति ॥ शास्त्रयोनित्वामिति ।
एतच्चतुर्थसूत्रेण दृढीकृतमित्याह ॥ निर्धारणायेति । ननु मोक्षादिदे विष्णावेव सर्वशास्त्राणां समन्वयः कथं घटते ।
अनधीयमानशास्त्रेष्वन्यथोक्तिसम्भवात् । न ह्यसर्वज्ञेनानन्तवेदगतिसामान्यं विष्णावेवेति निश्चेतुं शक्यते । नैतत्साधु ।
सर्वज्ञेनाप्तेन भगवता वेदव्यासेन गतिसामान्यादित्यनन्तवेदगतिसामान्यं विष्णावेवेति निश्चेतुं शक्यते । नैतत्साधु ।
सर्वज्ञेनाप्तेन भगवता वेदव्यासेन गतिसामान्यादित्यनन्तवेदगतिसामान्यस्य विष्णावेवोक्तत्वात्सर्वे वेदा यत्पदमामनन्तीत्यादि-
श्रुत्या च निश्चेतुं शक्यत्वात् । अतो विष्णौ सुघट एव निखिलश्रुतिसमन्वयः । तदेतदाह ॥ कथमित्यादिना । अयमेव
समन्वयश्चतुर्धा विभज्य प्रदर्शितोऽस्मिन्नध्याये । प्रथमपादे तु प्रधानमल्लनिबर्हणन्यायेनान्यत्रप्रसिद्धानां विष्णौ समन्वयः
प्रदर्शितः । अन्यत्रैव प्रसिद्धानां विष्णौ समन्वयस्यातिप्रधानस्यापि प्रथमतोऽनिरूपणे कारणमाह ॥ इन इति । प्रथमपाद-
सङ्गतियुक्तत्वेन द्वितीयपादार्थमाह ॥ इत्यन्यत्रेति । पूर्वपादसङ्गतत्वेन तृतीयपादार्थमाह ॥ उभयगतत्वमिति ।
पूर्वपादसङ्गतत्वेन चतुर्थपादार्थमाह ॥ एवं चेति । प्रथमाध्यायसङ्गतत्वेन द्वितीयाध्यायार्थमाह ॥ एवमशेषेणेति । प्रथम-
द्वितीयाध्यायसङ्गतत्वेन तृतीयाध्यायार्थमाह ॥ समन्वयाविरोधाभ्यामिति । यदर्थं भक्त्यादिकं निरूपितं प्रकृतामुपासना-
मधुना विदधाति ॥ वक्तव्येति । धारणा आदिर्यस्य प्रत्याहारप्राणायामादिकस्य तद्धारणादिकम् । अधुनाऽस्य पादस्योपा-
सना विषयस्याधिकरणेषु पूर्वपक्षयुक्तीरभिधाय क्रमेण सिद्धांतयुक्तीराह ॥ पृथगिति । तत्र तावत्सर्ववेदान्तप्रत्ययं चोद-

नाद्यविशेषादित्येतत्प्रथमाधिकरणं प्रपञ्चयति ॥ यथाशक्तीत्यादिना। आत्मज्ञानानुरूपत इत्यस्यापि विवरणमात्मज्ञानानुरूपत्वं यथाशक्तिविचारणादिति । यथाशक्त्यखिलवेदार्थविचारणपूर्वकं ब्रह्मोपासनाऽनङ्गीकारे बाधकमाह ॥ वेदः कृत्स्न इति। अनेन वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मनेत्यादिस्मृतिं स्वाध्यायोऽध्येतव्य इत्यादिश्रुतिं चोपादत्ते । निर्णीतं ब्रह्मसूत्रादि शृणुयाद्यदि स ज्ञानप्राचुर्यमुपलभ्यत इत्यस्यार्थः । यस्मिन्नसम्यग्ज्ञानमल्पं सम्यग्ज्ञानं प्रचुरमुपलभ्यते तस्मात्पुरुषाच्छृणुयादिति । सत्सिद्धान्तमहापयन्नित्यनेन प्रस्तुतसत्सिद्धान्तोऽभिधीयते ॥ अशेषेत्यादिना। तदन्वयो भवेदित्यर्थः। तस्याप्यभेदभिन्नानामभेदस्याभावादित्यर्थः । पूर्वभेदे संसारदशायामभेद इत्यर्थः । तदनन्तरता नारायणतेत्यर्थः। एतदेवेति श्रुतिः पञ्चरात्रादिकं परामृश्यते । ब्रह्मदर्शनं भवतीति शेषः । सम्यग्विषमेत्यस्यायमर्थः । परब्रह्मादिवस्तुषु सम्यग्ज्ञानतारतम्यात्सुखतारतम्यं भवत्यसम्यग्ज्ञानतारतम्याद्दुःखतारतम्यं भवतीति ॥ १ ॥ एतद्दोषविवर्जितो विषयसंसर्गादिदोषवर्जित इत्यर्थः। सत्स्वन्यत्र ततो दयेति स्वस्माद्धीनेषु सज्जनेषु दया कार्या न दुर्जनेष्वित्यर्थः। किमुताधिक्येत्यादेरयमर्थः। लक्ष्म्यादीनां विष्णोः सकाशादाधिक्यं पश्यंस्तस्य निर्गुणत्वं दोषं वा पश्यन् जीवेनाभेदं भेदाभेदौ वा पश्यन्नन्धन्तमो व्रजतीति किमु वर्णनीयमिति। अतः सर्वोत्तमो विष्णुरेव तीव्रं भक्तिपूर्वध्यानेनैवोपास्यः। यत्तु तस्मिन्द्वेषानुसन्धानस्यापि मुक्तिसाधनत्ववाचकम्। कामं क्रोधं भयं स्नेहं मैत्र्यं सौहृदमेव वा। नित्यं हरौ विदधते यान्ति तन्मयतां हि त इत्यादि भागवतवाक्यं तन्मानस्तेनेभ्यो येऽभिद्रुहस्पदे निरामिणो रिपवोऽ

न्येषु जागृधुरित्यादिश्रुतिविरुद्धत्वादर्थान्तरपरतया वर्णनीयम् । हरावधं नित्यं विदधतस्तत्फलस्य नित्यानिरयस्य प्राप्तावपि
 दृढं संसारवशात्तन्मयतां क्रोधमयतां यान्ति । सौहृदादिकस्य भक्त्यविरुद्धत्वाद्धरौ विदधतोऽपि विमुक्तौ तन्मयतां
 सौहृदादिमयतां यान्तीति । अन्यथा हिरण्यकशिपुश्चेत्यादिपूर्वापरबहुवाक्यविरोधः स्यात् । अवजानन्ति मामित्यादिश्री-
कृष्णवाक्यैर्यो द्विष्यादित्यादिमोक्षधर्मवचनैश्च विरोधः स्यात् । हिरण्यकशिपुस्तु शापादसुरावेशाच्च भगवद्विडपि पूर्वं भागवतत्त्वात्पुत्रानुभावाच्चान्धन्तमोऽत्यगात् । सहजभगवद्द्वेषिणो मोक्षप्राप्तौ न किञ्चित्प्रमाणम् । तदेतदाह ॥ द्वेषा इति । अत्र मोक्षस्यैवाभावात्साधनविचारोऽनुपपन्न इति वदतो लोकायतिकस्य मतं दूषयितुमनुवदति ॥ नैवेति ॥ ३१ ॥ दूषयति ॥ तत्केनेति । न ह्यतीन्द्रियस्य मोक्षस्य भावो मोक्षभावो वा केनचिद्दृष्ट इति निश्चेतुं शक्यते प्रत्यक्षैकप्रमाणवादिना लोकायतिकेन । अतः कस्यचिन्महात्मनो मुक्तिदर्शनं सम्भाव्यत एव । मोक्षाभावं वदतस्तु महात्मत्वं न युज्यत एव । न ह्यहं पश्यामि मोक्षमन्येऽपि न पश्यन्तीति स्वस्येतरेषां चाज्ञत्वेन साम्यं प्रतिपादयन्नन्येभ्योऽधिको भवति । न च माहात्मान एव न सन्तीति वाच्यम् । दृश्यमानत्वादित्याह ॥ दृश्यन्त इति । लोकायतिकस्य त्वितोऽपि महात्मत्वं न युज्यत इत्याह ॥ अप्रमाण्यमिति । महात्मत्वं पुरुषाणां वेदोक्तानुष्ठानसामर्थ्यादेव । न च वेदस्योन्मत्तवाक्यवदप्रामाण्यम् । प्रत्यक्षवदव्यभिचरितार्थत्वादित्याह ॥ अत इति । अतः प्रत्यक्षार्थातिरिक्तार्थत्वाभाववादिनः शास्त्रं निरर्थकमेवेत्याशयः ।
अथ मोक्षमभ्युपगम्य तत्साधनं जिनवाक्यमेकविहितमेव न वेदविहितमिति वदतां जैनानां मतं दूषयितुमनुवदति ॥ अस्ती-

त्यादिना । धर्मज्ञाने एव मोक्षसाधने । तयोश्चानुमानावगतप्रभावस्य जिनस्य वाक्येन सिद्धिः । धर्मो हिंसापूर्वक एव । ज्ञानं पुद्गलदर्शनमित्येतद्दूषयति ॥ कथमिति । न हि जिनाप्तत्वेन कस्यचिद्धेतोरविनाभावो दृष्टः । अतो नानुमानबलेन जिनवाक्यं प्रमाणम् । यथा स्वसम्बन्धार्थप्रकाशकत्वमेव प्रत्यक्षलक्षणं यथा वा समन्ताद्धर्माद्यत्यन्तातीन्द्रियगमकत्वमेवागम-लक्षणमेवं प्रत्यक्षेणागमेन वा गृहीतव्याप्तिमूलत्वमेव ह्यनुमानलक्षणम् । प्रकारान्तरेण तत्सिद्ध्यसम्भवात् । अतो नानुमानसिद्ध-प्रमाणभावं जिनवाक्यं धर्मं पुद्गलं दर्शयितुं शक्नोतीत्यर्थः । न च वाच्यं किञ्चिद्यथार्थं जिनवाक्यं दृष्टमाप्तत्वं जिनस्य निश्चेतुं शक्यमिति । कायपरिमाणः पुद्गल इत्याद्ययथार्थप्रलापित्वात् । पुद्गलकायपरिमाणत्वस्य प्रागेव दूषितत्वात् । दुःखाभावरूपत्वादानन्दस्य नासौ पुद्गलात्मक इत्यप्ययथार्थप्रलापित्वात् । सुखस्याभावरूपत्वाभावादित्याह ॥ स्वरूप इति । कथं सुखस्याभाव इत्यत आह ॥ मात्रेति । दुःखवत्सुखस्य तरतमभावोपेतत्वान्नाभावत्वं युज्यते । अनुभूयते विषयसेवातारत-म्यात्सुखतारतम्यम् । यद्येवमपि सुखस्य दुःखाभावत्वं तर्हि दुःखस्यापि सुखाभावत्वं किं न स्यादविशेषत्वात् । यदि कस्यचिद्विधिप्रत्ययवेद्यस्य भावत्वमङ्गीक्रियते तर्हि सुखस्यैवाभावत्वं कथं विधिप्रत्ययवेद्यस्येत्यर्थः । न च वाच्यमसुखं न भवतीति सुखमदुःखं न भवतीति दुःखमिति निरूपणेन सर्वेषामप्यन्योन्याभावरूपत्वात्सुखस्याप्यभावरूपत्वमित्यभावा-भावस्य भावत्वादेवेत्याह ॥ यदीति । एतदेव विवृणोति ॥ भावत्वमिति । नन्वसुखं न भवतीति निषेधमुखवेद्यस्यापि सुखस्य भावत्वे भावाभावयोरव्यवस्था स्यादित्यत आह ॥ प्रथमेति । इतोऽपि जिनस्याप्तत्वं न युज्यते । पुद्गलविज्ञाना-

न्मोक्षो भवतीत्ययथार्थप्रलापित्वात् । पुद्गलविज्ञानस्य मोक्षसाधनत्वाभावादित्याह ॥ न चेति । पुद्गलस्तज्ज्ञाताऽपि स्वमोचने नेश एव । ईशत्वे तस्य दुःखित्वायोगात् । पुद्गलविज्ञानस्य दुःखादिबन्धमोचकत्वे पुद्गलविज्ञानोत्पत्त्यनन्तरं देहवतोऽपि दुःखादिकं न स्यात् । न हि देहत्यागानन्तरं दुःखं निवर्तयिष्यामीति विमृश्यकारित्वं ज्ञानस्य युज्यत इत्यर्थः । स्वपक्षे तु नायं दोष इत्याह ॥ ईशेति । विष्णवधीनत्वान्मोक्षस्य विष्णुज्ञानवतोऽपि कालान्तरेण मोक्षो युज्यते दातृवशत्वात्प्रतिग्रहस्येत्यर्थः । पुद्गलज्ञानवत्पञ्चमलधारणकेशोल्लुञ्चनादिकर्मणोऽप्यशेषदुःखनिवर्तकत्वं न युज्यत इत्याह ॥ कर्मेत्यादिना । अन्येनाननुमितं कर्म देहत्यागोत्तरकालेऽपि दुःखं न निवर्तयत्येव । निवर्तयति चेदिदानीं निवर्तयेत् । न ह्युत्तरकाले निवर्तयिष्यामीति विमृश्यकारित्वमचेतनस्य तस्य युज्यते । न च जिनविहितस्य कर्मणो मोक्षसाधनत्वमनुमातुं शक्यते । दृष्टान्ताभावात् । न च तत्र प्रमाणान्तरं सम्भवति । अन्यस्येशस्य कारुण्येन जीवबन्धविनाशे तु देशेशकारुण्यकृतनिगडमोक्षादिदृष्टान्तोऽस्त्येव न तु स्वस्वरूपज्ञानेन । न हि कश्चिन्निगडबन्धः स्वज्ञानेन स्वकारुण्येन वा मुच्यमानो दृष्टः । अतो हिंसैव धर्मेषु परो धर्म इत्यादेर्जिनभाषणस्य मूलप्रमाणशून्यस्यादरणीयत्वे हिंसैव धर्मो मोक्षहेतुश्च धर्मो न सुखसाधनमित्यादि विप्रलम्भकवाक्यमप्यादरणीयं स्यादिति न जिनविहितं मुक्तिसाधनमित्यर्थः । प्रागुक्तन्यायेन माध्यमिकस्याप्ययथार्थप्रलापित्वात्तेन विहितशून्यज्ञानादिकं न मुक्तिसाधनमित्याह ॥ न चेति । इतोऽपि तन्न मुक्तिसाधनमित्याह ॥ यदीत्यादिना । शून्यस्य ज्ञानं भगवता च मुक्तिसाधनं चेत्तद्वतां पुरुषाणामिदानीमेव मोक्षः स्यात् । ॥१७॥

विलम्बकारणाभावात् । कारणसमनन्तरमेव बौद्धेन साध्यसिद्ध्यङ्गीकाराच्च । परेशस्य प्रसादाधीनत्वपक्षे मोक्षस्य साधने सत्यपि विलम्बो युज्यते । राजेच्छयैव फलस्य निष्पत्तावपि सेवायाः । न हि परेच्छाधीनत्वाभावे साध्यस्य विलम्बो घटते जातेऽपि साधने इत्यर्थः । न च वाच्यं पुरुषेच्छाधीनत्वाभावेऽपि साध्यस्य विलम्बो युज्यते । जातेऽपि साधने हरीतकीभक्षणे जातेऽपि तत्फलस्यैव विरेकस्येति । ईशेच्छानिमित्तकत्वाङ्गीकारात्सर्वविलम्बानामन्यथासम्भवादित्याह ॥ अन्यत्रेति । अतः शून्यज्ञानादेर्मुक्तिसाधनत्वदूषणन्यायेन योगाचाराभिमतमुक्तिसाधनमपि ज्ञानाद्वैतवेदोऽग्रेः सेकसाधनत्ववदयोग्यतापराहतमित्य भिप्रायः । माध्यमिकाभिमतमुक्तिसाधनादिकं निरस्तमित्याह ॥ विज्ञानेति । ज्ञानार्थयोर्नानात्वेन क्षणिकत्वेन च वेदनादिकं यन्मुक्तिसाधनत्वेन वैभाषिकसौत्रान्तिकाभिमतं तदपि तेनैव न्यायेन निरस्तमित्याह ॥ अन्तरिति । वेदप्रामाण्यवादिनाऽपि निरीश्वरसाङ्ख्येनोक्तं मुक्तिसाधनमनूद्य दूषयति ॥ प्रकृतेरिति । ईशत्वादिभिः कणादादिभिरप्युक्तं कणादय इत्यादिनाऽनूद्य प्राहुरित्यादिना दूषयति । तत्रेश्वरात्प्रसन्नान्मुक्तिर्भवतीत्येतावत्समीचीनम् । प्रसन्नोऽपि तस्मिन्प्रारब्धकर्मणामपि योगप्रभावगृहीतबहुशरीरैर्भोगादेव क्षय इत्येतच्चसमीचीनमेव । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशया इत्यादिवाक्यबलात् । दृष्टेनेश्वरेणैव कर्मणा भोगमन्तरेणापि प्रायश्चित्तेनेव विगत्युपपत्तेरित्यर्थः । एवं कायव्यूहेनैव कर्मक्षपणवादिभिः पाशुपतातिरिक्ताच्छिवशक्त्याद्यनुग्रहलक्षणादपि साधनान्मुक्तिर्न सिध्यति । तमेव विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यत इति श्रुतिविरोधादित्याह ॥ न चेति । यस्य सहस्रशीर्षा इत्यादिना प्रस्तुतस्य ज्ञानादन्यः पन्था

नास्तीत्यत्र जलनिधिशयनो हरिः पुरुषशब्देनोच्यते स पुरुषो विष्णुरेवेति श्रुत्यन्तरसंवादेन समर्थयति ॥ सर्वे इत्यादिना। यमन्तःसमुद्रे कवयो वयन्तीत्युपक्रम्य सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । यस्तावज्जलनिधिशयनो हरिः पुरुषशब्देनोक्तः स एव । न तस्येशे कश्चनेत्यनन्याधीनत्वेनोक्तः । विश्वतः परमां नित्यं विश्वं नारायणं हरिमिति बन्धमुक्तादिविश्वाधिकत्वोक्त्या समाधिकत्वेन वाऽभिप्रेतः । सर्वाधिकस्याधिकवत्समस्याप्यसम्भवात् । अतः समाधिकरहितत्वादयमेव मुख्यः पुरुषः स एवोच्यते । पुरुष एवेदं सर्वमित्यनेनापि मुक्तामुक्ताधीश्वरत्वाभिधानात् । अमृतत्वस्येशान इति मुक्तवर्गेश्वरत्वमुच्यते । पुरुषस्य तस्यैव पुरुष एवेदं सर्वमित्यमुक्तेतरसर्वेशानत्वमुच्यते । यो हि मुक्तेश्वरः सोऽमुक्तेश्वर इति किं वर्णनीयम्। उतशब्देन चाप्यर्थेनायमेवार्थः सम्पद्यते । न केवलमस्य सर्वस्येशानः किन्त्वमृतस्यापीशान इति । एतावानस्य महिमा ज्यायांश्च पुरुष इति वाक्यशेषेणाप्यैश्वर्यादिमहिमापरामर्शकेनायमेवार्थोऽध्यवसीयते तस्या ऋचः। अनुक्तस्य परामर्शाभावात् । अन्यथोक्तशब्दवाक्यशेषौ व्यर्थौ स्याताम् । अतस्तत्प्रायस्य यमांशेरि.तिवत्पुरुष एवेदं सर्वमिति सामानाधिकरण्यव्यपदेशो मिश्रीभावाभिप्रायो नाभेदाभिप्रायः । तथा चास्य मन्त्रस्यैकायनं ब्राह्मणं पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यमिति पुरुषेणैवेदं व्याप्तं यद्भूतं यच्च भव्यमिति मिश्रीभावश्च पुरुषविश्वयोरीशेशितव्यभावपरित्यागेनैव । एवमेव हि पूर्वार्धार्थे यदन्नेनातिरोहतीति हेतुत्वेनानूद्यामृतत्वस्येशान इति विदधाति। भावभवित्रोरभेदादमृतत्वशब्देनामृततयोक्तमतिरोहतीति शब्दसामर्थ्यात् । अन्नेनेत्येतदन्नमित्यस्मिन्नर्थे यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनमिति श्रुतेर्ब्रह्मक्षत्रादिकं सर्वमनुक्त-

मन्त्रशब्दवाच्यं यद्यस्मादैश्वर्यप्रभावेनातिरोहत्यतिक्रामति तस्मादमृतत्वस्येशान इति। अयमभिसन्धिः। मुक्त्युत्तरकालेऽपि जीव ईशाधीनो न भवतीति चेत्तर्हीशः पूर्वं स्ववशत्वेन वर्तमानं जीवं किमिति मोचयेत्। न हि कश्चिद्बुद्धिपूर्वकारी किञ्चित्स्वयमेवास्ववशं करोति। अतो मुक्तावमुक्तावप्ययं मदीय एवेति निश्चित्यैव जीवमीशो मोचयतीति मुक्तावपीशवश एवान्यथा न कस्यापि मुक्तिः स्यादिति। अस्मिन्नेवार्थे भागवतवचनम्। सोऽमृतस्योभयस्येशो मर्त्यमन्नं यदत्यगादिति। अत एव तस्य मुक्तामुक्तपरेशस्य मुख्यपुरुषस्य विष्णोर्ज्ञानान्मोक्षो न शिवाद्यनुग्रहात्। तत्पुरुषाय विद्महे महादेवायेत्यादेर्भगवत्पदाविषयत्व-विवक्षया यस्य विष्णोः पुरुषस्तत्पुरुष इति व्याख्या कर्तव्या। रुद्रादेरमुख्यपुरुषत्वादित्यर्थः। कर्मक्षयश्च न कायव्यूहापेक्षया। किन्तु विष्णुज्ञानादेव। तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति श्रुते-रित्याह॥ तद्यथेति। एतदर्थं भगवद्वाक्यैर्दृढयति॥ यथेति। अनीश्वरादिभिर्भाट्टादिभिर्मुक्तिसाधनमभ्युपगतम्। मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषेधयोः। नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेति। तदपि तमेवं विद्वानमृत इह भवति नान्यः पन्था इत्यनेनैव पूर्ववाक्योक्तेन निराकृतम्। एतदेवोक्तम्॥ विद्यैव तु निर्धारणादिति सूत्रेण। तदेतदाह॥ नित्येति। यच्च भास्करेणाभ्युपगतं मुक्तिसाधनं न केवलं कर्म न केवलं च ज्ञानं किन्तूभयमेव तदिति। तदप्यनुपपन्नम्। तमेवं विद्वा-नमृत इह भवति नान्यः पन्था अयनाय विद्यत इति केवलज्ञानस्यैव मोक्षसाधनत्वश्रुतेः। न चैवं सति ज्ञानिनः कर्मकरणं व्यर्थमिति वाच्यम्। ज्ञानेन मोक्षस्य सिद्धावपि कर्मणा तदाधिक्योपपत्तेः। तदाह॥ विनेति। यत्परैरभ्युपगतमादित्यो

ब्रह्मेत्यादिध्यानमयथार्थमपि श्रेयःसाधनमिति । तदनुपपन्नम् । अन्धन्तमः प्रविशन्ति येऽविद्यामुपासत इति श्रुत्याऽन्यथाज्ञानमनुतिष्ठतां नित्यनरकप्राप्तेः प्रतिपादनात् । आदित्यादिप्रतीके परमात्मदृष्टिर्न कर्तव्येति भगवान्सूत्रकारोऽपि वक्ष्यति ॥ न प्रतीके न हि स इत्यतस्तमेवं विद्वानिति श्रुतेर्नैवं ज्ञातव्यो विष्णुः किन्तु पुरुषं महान्तमादित्यमित्याद्युक्तप्रकारेणैव ध्यातव्यो नीरूपत्वेन च । तदाह ॥ अन्यथेति । यतोऽन्येन परेशस्याभेदज्ञानमनर्थकारणमतो जीवेनाभेदज्ञानमप्यनर्थकारणमेव न मुक्तिसाधनम् । जीवस्येशेन मुक्तावपि भेदस्य साधितत्वात् । तदाह ॥ न चेति । एवं मुक्तिसाधनं जीवस्येशेन मुक्तावपि भेदस्य साधितत्वात् । तदाह ॥ न चेति । एवं हर्युपास्तिमन्तरेण मुक्तौ साधनान्तराभावं तर्केण सदागमैश्च निश्चित्य तामेवानुतिष्ठेत् । तद्दुपास्तिश्चात्मेत्येवोपासीतेत्यादिश्रुतिविहिता । तत्र किं विशिष्ट आत्मोपास्य इत्याकाङ्क्षितानां गुणानां प्रतिपादकं विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतं यस्तत्र विधेरशक्यार्थत्वाभावात् । यो यावतो गुणानानन्दादींस्तत्तच्छाखोक्तान्विशिष्टावुपसंहृत्य ध्यातुं योग्यः स तावद्भिरेव गुणैर्विशिष्टं विष्णुमुपासीत । तत्र वेदगर्भस्तु सर्वैर्गुणैरपि विशेषतोऽवबुद्धैर्विष्णुमुपास्ते । सरस्वती तु क्रियाविशेषैरेव कैश्चित्सामान्यतोऽवबुद्धैर्विशिष्टं विष्णुमुपास्ते । रुद्रस्तु गुणविशेषैरपि कैश्चित्सामान्यतोऽवबुद्धैर्विशिष्टं विष्णुमुपास्ते । इन्द्रादयस्तु मूर्तिविशेषैरपि कैश्चित्सामान्यतोऽवबुद्धैर्विशिष्टं विष्णुमुपासते । तदेतदाह ॥ इतीत्यादिना । अनेनोपसंहारोऽर्थाभेदादित्यादिसूत्रतात्पर्यमुक्तं भवति ॥ २९ ॥ ब्रह्मरुद्रेन्द्रादीनां भगवदुपासकत्वादौ तारतम्यमधिकारितारतम्यकृतसाधनतारतम्यं मुक्तावानन्दतारतम्यविशेषो ब्रह्मादीनां तथा ज्ञानादिगुणतारतम्यं

चास्त्येव । न च लौकिकवत्तेषां मुक्तानां परमात्मचेतसां परगुणोत्कर्षेणोपतापादिकमाशङ्कितुं शक्यम् । निरस्ताविद्यादिसकल-दोषत्वात् । अतो यथा सच्छिष्यो गुरुणा न स्पर्धते तत्प्रसादोपात्तविद्यादिगुणः । एवं मुक्तावप्युत्तमैर्नावराः स्पर्धन्ते तत्प्रसादा-यत्तगुणास्तद्दासभूताः । तदाह ॥ अधिकारेत्यादिना । अनेन यावदधिकारमवस्थितिराधिकारिकाणामक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तामिति सूत्रद्वयस्यार्थ उक्तः । यत्पुनरस्यार्थत्वेनोच्यते परेण यावदारब्धकार्यं कर्मानुवर्तते तावत्पर्यन्तमेवाधिकारिणां ब्रह्मादीनां तत्तत्पदेऽवस्थानमनन्तरं मुक्तिरिति ॥ तत्त्वनारब्धकार्ये एव तु पूर्वे तदवधेः । भोगेन त्वितरे क्षपयित्वाऽथसम्पत्स्यत इति सूत्रद्वयेनोत्तराध्यायगतेनानारब्धकार्ययोरेव पुण्यपापयोर्ज्ञानेन नाश्यमारब्धकार्ययोस्तु भोगेनैव नाशानन्तरं मुक्तिरित्यर्थप्रतिपादकेन पुनरुक्तमित्युपेक्षणीयम् । अतो यावद्यावदधिकारिणां तावत्तेषां मोक्षस्थित्याधिक्यमित्येतदेवात्र युक्तम् । तदेतदाह ॥ न चेति । प्राण एतावदेवाधिकारि-तारतम्यं बृहतीसंहितागतभगवद्वाक्यैः समर्थयति ॥ उषा इत्यादिना । उषास्वाहे अग्न्यग्निपत्नौ प्रवहो भूतविशेषवायुः । अनिरुद्धोऽत्र कामपुत्रः । यत एते ह्युषाद्या मुक्तावपि गुणैरुत्तरोत्तराधिका मुख्यमारुतान्ताधिकारिणः । त एव हि वाग्वाव नाम्नो भूयसीत्यारभ्योत्तरोत्तरभूयस्त्वेन छान्दोग्ये पठिताः । नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नापस्तेजआकाशस्मराशा-प्राणानामन्यत्रशब्देन वक्ष्यमाणाहङ्कारिकप्राणः कर्मेन्द्रियाद्यधिष्ठानाद्यनिरुद्धादुत्तम इन्द्रादवरो ज्ञेयः । पत्नी वारुणी । रुद्रो वरो ज्ञेयः । एषामुषादीनां मध्ये एकैकेन समा द्वयोर्द्वयोर्मध्ये गताश्चान्ये देवा निर्दिश्यन्ते ॥ सूर्येत्यादिना । तारा

बृहस्पतिपत्नी । प्रसूतिर्दक्षपत्नी विराडनिरुद्धपत्नी । वारुणी वरुणपत्नी । संज्ञा सूर्यपत्नी । रोहिणी चन्द्रपत्नी । धार्मी यमपत्नी । प्रावही प्रवहपत्नी । विघ्नवित्तपौ विनायकवैश्रवणौ । मित्रतन्मध्ये मित्राभ्योर्मध्ये । ब्रह्मपुत्रका मरीच्य-त्र्यङ्गिरपुलस्त्यपुलहक्रतुर्वशिष्ठाः । कस्तूनुवत् वसिष्ठवदित्यर्थः ॥ अश्विपश्चादन्ये ततोऽवरा इति । येऽन्ये ततोऽवरा वैवस्वतमनोरवराः स्वायम्भुवतापसमनुव्यतिरिक्ता मनव उत्तमरैवतादयस्तेऽश्विभ्यामनन्तरा इत्यर्थः । वैन्यः पृथुर्है-हयः कार्तवीर्यस्तद्वदुत्तमादिवत् । अत्रापि च्यवनादिष्वित्यर्थः । तद्वत् च्यवनादिवत् । तदन्याः शतदेवताः पर्जन्यमित्रान्तराले तदन्ये तु ततोऽवरा इति सोमाहुतियोग्या ये वस्वादयः । शतसङ्ख्याका देवास्ते तत्र पूर्वोक्तवस्वा-दिव्यतिरिक्तवसुरुद्रादित्यनारदोपेते पर्जन्यमित्रान्तरालगतास्तदन्ये येऽनतिप्रसिद्धा अधिकारिदेवास्ते पर्जन्यादवरा इत्यर्थः । तत्समो नास्ति श्रियः समो नास्तीत्यर्थः ॥ अनेनेयदामननादित्यादिसूत्रं विवृतं भवति ॥ २१ ॥ अधुना तन्निर्धारणे-त्यादिसूत्रतात्पर्यमुक्त्वा पादार्थमुपसंहरति ॥ दृष्टिरपि योग्यतानुसारत इति । योऽधिकारी यावद्गुणविशिष्टं विष्णु-मुपासितुं समर्थस्तस्य तावद्गुणविशिष्टविष्णुदर्शनं भवतीत्यर्थः ॥ २२ ॥ समे विकल्प इत्यस्यायमर्थः । पूर्वस्वीकृतगुरुसम-गुर्वन्तरे पूर्वपूर्वानुग्रहायोपसत्तेः करणमकरणं वा निरुध्यते । उत्तरगुरुप्राप्तेः पूर्वस्वीकृतादुत्तमगुरुप्राप्तेरित्यर्थः । उपदेश इत्यस्यायमर्थः । इहलोके परलोके वा चतुर्मुखाद्ब्रह्मोपदेशं प्राप्त एव विमुच्यत इति ॥ २८ ॥ स्वाधिकृत्वेनेति । स्वस्मिन्यथा प्राप्तिस्ततोऽधिका प्रीतिरित्यर्थः ॥ ३४ ॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्याय-रत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां तृतीयाध्यायस्य तृतीयः पादः ॥ ३—३ ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ यदेतद्भगवतो दर्शनमुद्दिश्य प्राक् शक्तिपूर्वकोपासना विहिता । तद्दर्शनादसति प्रारब्धप्रतिबन्धे ज्ञानफलं सर्वं सिध्यतीत्येतदन्यच्च प्रसक्तमस्मिन्पादे निरूप्यते । विशेषतो मोक्षाख्यं फलमधिकृत्योत्तराध्यायविचारः प्रवर्तिष्यते । अपेक्षितफलं च तारतम्यादेव । कृष्यादीनां स्वस्वयोग्यतानुसारेणैव सिध्यति नान्यथा । तथा च श्रुतिः । यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामांस्तदात्मज्ञं ह्यर्चयेद्भूतिकाम इति । परमात्मज्ञानेनैवापेक्षितार्थस्य सिद्धावपि कर्मणा तदाधिक्योपपत्तेः । न ज्ञानिनः कर्मकरणं व्यर्थम् । एतदधि बादरायणमतम् । जैमिनिस्तु मोक्षव्यतिरिक्तफलं कर्मणैव सिध्यदपि ज्ञानेनाधिकं सिध्यतीति मन्यते । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुतिबलात् । भगवन्मतजैमिनिमतयोः सामान्यविशेषभावेनाविरोधो ज्ञातव्यः। ज्ञानिसामान्यविषयमपि भगवन्मतं जैमिनिमतानुरोधेन देवादिषु व्यवस्थाप्यते । जैमिनिमतं तु ज्ञानवन्मनुष्यविषयम् । वेदादिष्वपि प्रबलप्रारब्धप्रतिबन्धवचनाज्ज्ञानिनो मोक्षव्यतिरिक्तफलापेक्षा सर्वथा नास्तीति वाच्यम् । सौभर्यादेर्दर्शनात् । तदेतदाह ॥ एवमिति । अनेन पुरुषार्थोऽतःशब्दादिति बादरायणः । शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिरित्यादिसूत्रं विवृतं भवति ॥ १ ॥ ननु यथा कारीर्यादिकर्म निरपेक्षज्ञानं वृष्ट्यादिफलं जनयदेव क्वाचित्प्रतिबद्धं न जनयति । तथा कर्म प्रतिबद्धमोक्षमपि न जनयत्विति । अत आह ॥ विकर्मेति । न प्रेक्षावज्ज्ञानी विकर्मभिर्लिप्यते । अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः । स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति श्रुत्या ध्यानादिकं निष्पाद्य

ब्रह्मापरोक्षतया ज्ञानतो विधिमतिक्रम्य यथेष्टाचरणेनालिप्तत्वप्रतिपादनात् । ज्ञानोत्तरविकर्मभिरपवित्रत्वाभावेऽपि ज्ञानिनो गुणह्रासो भवत्येव । हिरण्यगर्भस्य गुणहानिर्नास्त्येव । विकर्माभावात् । तथा हि भागवते हिरण्यगर्भवाक्यम् । न भारती मेऽङ्ग मृषोपलक्ष्यते न कर्हिचिन्मे मनसो मृषा गतिः । न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदोत्कण्ठवता धृतो हरिरिति । हिरण्यगर्भेतरदेवानां स्वक्लृप्तानन्दादिगुणादधिकं यत्प्रयत्नातिशयेनार्ज्यते तदेव कुत्रचिन्महता विकर्मणा ह्रसति । न तत्क्लृप्तमानन्दादिकम् । प्रायशः क्लृप्तादधिकस्यार्जनं ह्रासश्च क्लृप्त एवेति न क्लृप्तहानिनियमभङ्गः । तथा हि । क्लृप्तादधिकं यदार्जितं चन्द्रस्य राजसूयेन तस्य हानिरभवत् । स्वोत्तमबृहस्पतिभार्यापरिग्रहदोषेण स्वोत्तमदेवेन्द्रांशवालिभार्योपभोगदोषेण सुग्रीवस्यापि सूर्यांशस्य रामसेवातिशयेन क्लृप्तादधिकं यदार्जितं तस्य हानिरभवत् । क्लृप्तिश्च देवानन्दादेः । सैषाऽऽनन्दस्य मीमांसेत्यादिश्रुतिसिद्धा मनुष्यादीनां तु क्लृप्तसुखस्यापि विकर्मणा ह्रासो भवेत् । विशेषतस्तु स्वोत्तमापराधाच्च । अनेन स्तुतयेऽनुमतिर्वेति सूत्रतात्पर्यमुक्तं भवति । न च वाच्यं ज्ञानिनि कर्मलेपो नास्तीति यदुक्तं तदुत्तराध्यायगतेन तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति सूत्रेण पुनरुक्तमिति । तत्र ज्ञानोत्तरावेन ज्ञानिनोऽश्लेषोऽशुचित्वमव्यवहार्यत्वमघटकार्यं निषेद्धुं प्रतिपादितः । अत्र तु ज्ञानान्मुक्तिर्नियतैव ज्ञानिनो न केनापि कर्मणा निहन्यत इत्येतदर्थं तेनालेप उक्त इति तात्पर्यभेदादित्याह ॥ ज्ञानेति । अत्र यदुपमर्दं चेति सूत्रं तत्र किञ्चिदुपभुक्तयोरेवारब्धकार्ययोः पुण्यपापयोर्ब्रह्मज्ञानेनोपमर्दमभिदधाति । यथा ज्ञानी प्रारब्धकर्मफलं सर्वं भुक्त्वैव क्षपयति तथा न ज्ञानीति हि

भगवान्वक्ष्यति ॥ भोगेन त्वितरे क्षपयित्वेत्यत्र तुशब्देन । तथा चोक्तं भागवते । न वै जनो जातु कथं च नाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिमिति । न च विषभक्षजमरणस्यैव निवर्तयितुमशक्यतया प्राप्तस्य प्रारब्धकर्मफलस्य नेषदपि ह्रासः केनचिदिति वाच्यं । तथा सति क्षयरोगादेर्निवृत्तिकामं प्रति तन्निवृत्त्युपायविधायकशास्त्रवैयर्थ्यापत्तेः । ब्रह्महा क्षयरोगी स्यादित्यादिना क्षयरोगादेः प्रारब्धकर्मविपाकत्वात् । अतो नाविशेषादित्यनेन सूत्रेण निर्दिष्टाधिकारतारतम्यवतां देवादीनां ज्ञानतारतम्यात्प्रारब्धकर्मोपमर्दतारतम्यं युक्तं मुक्तावानन्दतारतम्यं च । तदेतदाह ॥ प्रारब्धेति । यदेतत्पादमारभ्योक्तं तत्तन्त्रभागवते विस्तृत्योक्तमित्याह ॥ एवमिति । यदेतन्मुक्तावानन्दतारतम्यं ब्रह्मादीनामुक्तं तत्कथमङ्गीक्रियते बहुवादिविप्रतिषिद्धमित्याशङ्क्य श्रुत्या समर्थयति ॥ तारतम्यमिति । स यो मनुष्याणां राट् समृद्धो भवत्यन्येषामधिपतिः । सर्वैर्मानुष्यकैर्भोगैः सम्पन्नतमः स मनुष्याणां परमानन्दः । अथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणां चिरलोकलोकानामानन्द इत्यारभ्यानन्तरं पितृभ्यः शतानन्दादधिकानन्दत्वेन किञ्चिद्विशिष्टगन्धर्वलोकं तच्छताधिकानन्दत्वेन कर्मदेवाञ्छताधिकानन्दत्वेन आजानदेवांश्चाम्नायोक्तं यश्च श्रोत्रियो वृजिनोऽकामहत इत्यादि वाजसनेयके । तत्र यथा ब्रह्मोपासकं मनुष्याधिपमारभ्य ब्रह्मान्तानां पूर्वपूर्वेभ्य उत्तरोत्तरेषां शताधिकानन्दत्वमुच्यते । एवं तेषामेव मनुष्याधिपादीनां मुक्तिगतानामकामहतावृजिनादिशब्दवाच्यानां पूर्वपूर्वेभ्य उत्तरेषां शताधिकानन्दत्वमुच्यते । एतच्च मुक्तानामानन्दतारतम्यानङ्गीकारे न घटत इत्यर्थः । ननु केषुचिदमुक्तेष्वानन्दतारतम्यं यश्च श्रोत्रियोऽवृजिनोऽकामहत इत्यनेनोच्यत इति किं न

स्यादित्याशङ्क्य परिहरति ॥ संसार इति । अकामहतावृजिनशब्दयोरमुक्तिविषयत्वे मुख्यार्थपरित्यागः स्यादित्यर्थः । तत्र तावदकामहतत्वं मुख्यं मुक्तस्यैवेत्यत्र प्रमाणमाह ॥ कामस्येति । कृधि कुर्वित्यर्थः । नन्वत्र सर्वकामविषयावाप्तिर्मुक्तस्य प्रतीयते न त्वकामहतत्वमित्यत आह ॥ कामाहतिरिति । यस्तु कामितं नियमेन प्राप्नोति सोऽकामहत इत्युच्यते । स च मुक्त एवभवितुमर्हतीत्यर्थः । ननु मुक्तोऽकाम एव न त्वकामहत इत्यत आह ॥ चेतनस्येति । अत्र प्रयोगः । मुक्त्यवस्थो जीवः सकामश्चेतनत्वात्सांसारिकवत् । सुप्त्यवस्थेऽप्यव्यक्तकामाङ्गीकारान्न तत्र हेतोर्व्यभिचारः । सोऽश्नुते सर्वान्कामान्सहब्रह्मणा विपश्चिता । परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा । एतमानन्दमयमात्मानमुपसङ्क्रम्य इमान् लोकान्कामान्नीकामरूप्यमनुसञ्चरन् एतत्साम गायन्नास्ते इत्यादिश्रुतिभ्यश्च सकामत्वं मुक्तस्य सिद्ध्यतीत्याह ॥ सर्वेति । अत एव यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमर्त्यो भवतीत्यनया श्रुत्याऽन्तःकरणपरिणामानामेव कामानां मुक्तौ निवृत्तिरुच्यते न तु जीवस्वरूपभूतानाम् । अन्यथा हृदिस्थिता इति विशेषणं व्यर्थं स्यात् । न चान्तःकरणादन्यत्र कामानामभावः । मुक्तानामपि श्रुतिषु कामित्वश्रवणात् । अतो मुक्तानामेवाकामहतशब्दार्थत्वं मुख्यं युक्तम् । निर्निमित्तं मुख्यार्थपरित्यागस्तु मायिव्यतिरिक्तवादिभिरनुचित एव कर्तुम् । तदेतदाह ॥ कामा इति । तच्च वृजिनरहितत्वेनावृजिनशब्दार्थो मुक्त एव भवितुमर्हति । वृजिनशब्दश्च दुःखपापयोर्वाचित्वेन पठितोऽप्रियं वृजिनमित्यादिना शब्दनिर्णयात्संसारिणश्चामुक्तेः पापं दुःखं चास्त्येवेति

नावृजिनशब्दवाच्यत्वं युज्यते । तदेतदाह ॥ अपापत्वमिति । मनुष्याधिपपदे कामरहितः पित्रादिपदे कामवान्सोऽपि मनुष्याधिपतुल्यानन्दः । तस्माच्छतोत्तरानन्दा ये पितृपदे कामरहिता विशिष्टगन्धर्वादिपदे कामवन्त इत्येवं ब्रह्मपर्यन्तं काम निवृत्तितारतम्यादानन्दतारतम्यं सममुक्तेष्वेव । निष्कामेषु यश्च श्रोत्रियोऽवृजिनोऽकामहत इति कल्पनेऽश्रुतकल्पनम् । अस्मिन्पदे कामरहितस्तस्मिन्पदे सकाम इति विशेषश्रवणभावाद्धतशब्दश्च व्यर्थः स्यात् । अकामहत इत्येतावता पूर्णत्वात् । अनुभवविरोधश्च स्यादेवमानन्दतारतम्यकल्पने । तथा हि । कर्मदेवपदे कामरहितादाजानदेवशब्दवाच्येन्द्रादिपदे कामसहितस्य शतोत्तरानन्दो नामेन्द्राद्यानन्दसदृशो न मनुष्यस्य युज्यते । अत्यन्तासम्भावितत्वात् । कामानिवृ त्त्यैवेन्द्रादिपदसुखसिद्धौ शतक्रत्वादिगुरुतरसाधनानुष्ठानवैय्यर्थ्यापत्तेश्च । तदाह ॥ तस्मादिति । उपसंहरति ॥ तस्मादिति । अतो मुक्तानामानन्दतारतम्यं मुक्तानामानन्दतारतम्येन समुच्चिनोति यश्च श्रोत्रिय इत्यादिश्रुतिरित्येतदेव युक्तम् । चशब्दसामर्थ्यात् । तथा हि । प्रथमं तावदमुख्यतया राद्धादिशब्दवाच्यस्यामुक्तचक्रवर्तिन आनन्दोऽपि तेनैव वाक्येन निर्दिश्यते । स मनुष्याणां परमानन्द इति वाक्येनानन्तरं स सिद्धत्वान्मुख्यराद्धादिशब्दवाच्यस्यान्येषां मुक्तमनु- ष्याणामधिपतेः । मुक्तसार्वभौमस्य यश्च श्रोत्रियोऽवृजिनोऽकामहत इति निर्दिष्टस्यानन्दोऽपि तेनैव वाक्येन निर्दिश्यते । तत्र मुक्तचक्रवर्त्यानन्दशतगुणितानन्दममुक्तपितॄणां निर्दिश्य मुक्तचक्रवर्त्यानन्दशतगुणितानन्दोऽपि पितृशब्दवाच्यस्य यश्च श्रोत्रियोऽवृजिनोऽकामहत इति निर्दिष्टस्य स एकः पितॄणामानन्द इत्यनेनैव वाक्येन निर्दिश्यते । इत्येवमेव ब्रह्मपर्यन्तमा-

नन्दतारतम्यं द्रष्टव्यम् । यश्च श्रोत्रियोऽवृजिनोऽकामहत इत्येतदाजानदेवादिष्वेव श्रुतमप्युपलक्षणत्वात् । मनुष्याधिपत्यादिषु श्रुत्यन्तरानुरोधेनार्थसिद्धं द्रष्टव्यमविशेषात् । अत्र ते ये शतमिति शतशब्दो न्यूनसङ्ख्याव्यवच्छेदार्थो न त्वधिकसङ्ख्याव्यवच्छेदार्थः । सार्वभौममनुष्यगन्धर्वदेवगन्धर्वपित्रादीनामुत्तरोत्तरशतानन्दत्वश्रवणात् । तैत्तिरीयके । आशिष्ठो दृढिष्ठो बलिष्ठस्तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्स एको मानुष्य आनन्द इत्यादिनाऽत्रापि युवादिशब्दानां मुक्तामुक्तसार्वभौमाविषयत्वं मुख्यामुख्यवृत्तिभेदाद्द्रष्टव्यम् । अत्र तेषां मुक्तसार्वभौमे प्रवृत्तिं दर्शयति ॥ साधुनेति । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यादिति वित्तेन पूर्णपृथिवीपतित्वव्यपदेशो मुक्तसार्वभौमस्य भूतपूर्वगत्या युज्यते । स एको मनुष्य आनन्द इति मुक्तामुक्तसार्वभौमानन्दो निर्दिश्यते । तत्र ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्द इत्यमुक्तसार्वभौमानन्दशतगुणितानन्दं मुक्तमनुष्यगन्धर्वाणां निर्दिश्य श्रोत्रियस्य चाकामहतस्येत्याह । यः श्रुतिफलं प्राप्तत्वेन श्रोत्रियशब्दवाच्योऽकामहतो मुक्तमनुष्यगन्धर्वस्तस्यापि मुक्तसार्वभौमानन्दशतगुणितानन्द इत्यर्थः । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्येत्यादि स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्येत्येतदन्तं वचनमुक्तप्रकारेणैवामुक्तेष्विव मुक्तेष्वपि गन्धर्वादिष्वानन्दतारतम्यं प्रतिपादयतीति सिद्धम् । युक्तियुक्तं चैतदित्याह ॥ युक्तं चेति । ज्ञानिष्वेव सुगादिष्वेकेनात्र तदनुष्ठितत्वात्साधनादतिशयितसाधने परस्य वृत्तिर्दृश्यते । एतच्च प्रवर्तनं साध्ये मोक्षे साधनानुरूपविशेषाभावे न स्यात् । न ह्यमन्दमतिः प्रयोजनरहिते प्रवर्तते । मुक्तास्तु पूर्णकामत्वाद्भगवद्ध्यानार्चनप्रणामादौ

लीलया प्रवर्तन्त इति युज्यते । ज्ञानिनस्तु वैदिकानुष्ठानेऽधिकाधिकं क्लेशतः प्रवर्तमानाः फलविशेषाभावेऽपि प्रवर्तन्त इति न युज्यत एवेत्यर्थः । अतिक्लेशतोऽपि विचित्रतपआद्यनुष्ठानं ब्रह्मज्ञानिनां दर्शयति ॥ दशेत्यादिना । साधनतारतम्याय-त्तमोक्षतारतम्ये भगवद्वाक्यं दर्शयति ॥ दैवीति । याऽतिशयितज्ञानभक्त्यादिलक्षणा दैवीसम्पद्वृष्ट्यादिसम्पन्मोक्षाय मता विशिष्टमोक्षायैव मतेत्यर्थः । तमेवेत्यादिवाक्येन पुराणगतेनाधिकारतारतम्यावसितपरमपुरुषार्थे मोक्षे तारतम्यं सिध्यति । अक्षण्वन्त इत्यादिश्रुतिवाक्येन च मुक्तानां तारतम्यं सिध्यति । तत्र मनोजवेष्वसमा बभूवुरिति श्रवणात् ह्रदा इव स्नात्वेत्यमृतह्रदेषु स्नानाद्ध्रदा इव गम्भीरास्तापरहिताश्चेत्यर्थः ॥ उत्वे ददृशे इति । केचिद्ददाशिर इत्यर्थः । एषैव हि श्रुतिर्मुक्तिविषयतयोपवर्णिता ब्रह्मसारे । श्रुत्वा विष्णुं कर्मफलं प्राप्तत्वात्करणसंयुताः । अक्षण्वन्तो दर्शनाच्च विष्णोर्मुक्तास्तु ये गणाः । तारतम्यं च तेषां तु श्रुता उदितमञ्जसा । क्षीरसागरदघ्नास्तु केचित्तिष्ठन्ति मुक्तिगाः । उपस्थिता ब्रह्मवचनं केचि-दश्वत्थमण्डलम् । ऐरे ह्रदे केचिदपि देवा एव सदा हरिं । नामभोगशयं मुक्ता ददृशेऽधिकमोदिनः । सागरादिस्थिता विष्णुं पश्यन्ति क्वचिदेव हीति । तदाह ॥ तमेवेति । यच्च क्वचित्साम्यवचनं मुक्तानां तद्दुःखादिदोषराहित्येनैव साम्याभिप्रायं न तु सर्वगुणाभिप्रायम् । यतो भक्त्यादिगुणतारतम्यकृतमतुल्यत्वमुक्तं मुक्तानां शान्तिपर्वणि । श्रुतिर्हि गुणे प्रवदत्यतुल्यतामिति । तदेतदाह ॥ दुःखेति । मुक्तानामतुल्यत्वापादकं ज्ञानभक्त्यादितारतम्यं तच्च श्रुतिस्मृति-वचनैः साधयन्नाह ॥ साधनेति । तत्र तावदुक्तेयमित्यादिवाक्येन वैकायससंहितागतेन भगवतो नृसिंहस्य रूपं

देवतादिभिरपि साकल्येन दुर्ज्ञेयमित्युक्त्वा किमु मुक्तैरित्युच्यमानत्वान्मनुष्येभ्योऽतिशयितज्ञानं देवादीनां सिध्यति। तथा कठवल्लीषु यमवाक्यं कृतमिति। तत्र देवासुराणां मदामदहर्षविषादौ यस्माद्भगवतस्तं मदामदं विष्णुमन्यः को ज्ञातुमर्हतीत्युक्तत्वाद्यमस्यान्येभ्योऽतिशयितं ज्ञानं सिध्यति। तच्च न सर्वेभ्योऽतिशयितं शङ्कनीयम्। ब्रह्मैव किञ्चिज्जानाति न तदन्यो हि कश्चनेत्यादिवचनविरोधात्। अतः को ब्रह्मा ज्ञातुमर्हतीति च ज्ञातव्यम्। मुक्तानामित्यस्य भागवतश्लोकस्यायमर्थः। मुक्तानां मध्ये य उद्योगातिशयेन समग्रविभूतयः स्वयोग्यानन्दादिसिद्धास्तेषां कोटिष्वपि नारायणैकायत्तत्वेन नारायणपरायणो यः स दुर्लभः। स च ब्रह्मादिरेव भवितुमर्हति। अन्ये तु नारायणात्मना एवेति। एष श्लोको जीवन्मुक्तानामपि ज्ञानिनां तारतम्यप्रतिपादकत्वेन योजयितव्यः। इयं विसृष्टिरिति मन्त्रस्यायमर्थः। यत इयं विसृष्टिराबभूव। जगद्धारणे तु मुख्यवायोरपि भगवन्नियोगात् यदि वा दधे यदि वा नेत्युक्तम्। यश्चास्य जगतोऽध्यक्षो हिरण्यगर्भः सोऽपि परमे व्योम्नि वर्तमानं भगवन्तमद्धा वेद यदि वा न वेद। अन्ये त्वद्धा न विदुरेव। अङ्गेति कस्याचित्सम्बोधनम्। अनेन हिरण्यगर्भस्यान्येभ्योऽतिशयितज्ञानं प्रदर्शितं भवति। यः स्वात्मेति हिरण्यगर्भवाक्यस्यायमर्थः। यो विष्णुः स्वशक्तिविस्तारं स्वयमेव ज्ञातवान्नाहं वेदगर्भोऽपि जानात्यद्धा नापि नभस्वान्मुख्यवायुर्जानाति। अन्ये तु तद्भगवच्छक्तिविस्तारं न जानन्तीति किमु वर्णनीयमिति। नमस्त इति हिरण्यगर्भवाक्यम्। नाहं परायुरिति रुद्रवाक्यम्। ईशेति विष्णोः सम्बोधनम्। अहं महेन्द्र इति यमवचनम्। यः स्वात्मेत्यादिश्लोका भागवतस्थाः। एषु कैमुत्येन कथनान्यथाऽ-

नुपपत्त्या हिरण्यगर्भादीनां तारतम्यं सिध्यति । सर्वस्यादाविति मोक्षधर्मवचनम् । न त्वामिति भगवद्वाक्यं ब्रह्माणं प्रति । मनुष्याणामित्यादिभगवद्वाक्यानामयमर्थः । मनुष्याणामपरिमितसहस्रेषु कश्चिदेव मुमुक्षुवर्गो मुक्त्याख्यसिद्धौ यतति । यततां मध्येऽविघ्नेन केचिदेव सिद्धिं गच्छन्ति । सिद्धिं गतानां भगवन्तं जानतां मध्येऽपि विशेषेण कश्चिदेव ब्रह्मरुद्रादिर्वेत्तीति परमं गुह्यं वेत्ता शास्त्रस्य प्रवक्त्रध्येतृश्रोतृषु यमित्यादिना भगवत्प्रीतितारतम्यश्रवणात्तेषां मुक्तौ तारतम्यं सिध्यति । साधनवैचित्र्याद्भगवद्दर्शनवैचित्र्यमपि देवादीनां तस्मादेव मोक्षवैचित्र्यं ध्यानेनेत्यादिना सिध्यति । साङ्ख्यशब्देनात्र परोक्षज्ञानमुच्यते । ध्यानयोगादीनां मिलितानामेव दर्शनं प्रति साधनत्वेनैकैकस्य साधनत्वकथनं प्राचुर्याभिप्रायेणोपपन्नम् । दर्शनवैचित्र्यमेव विस्पष्टयति ॥ सुसूक्ष्मैरित्यादिना । तत्र ब्रह्मादीनां दर्शनतारतम्यमेव साधनायत्तं न तु विष्णुलक्ष्म्योर्दर्शनतारतम्यम् । ब्रह्मा जगदन्तर्बहिःस्थितमव्यवच्छेदेन प्रपश्यति । सरस्वती तु पञ्चाशत्कोटिविस्तीर्णब्रह्माण्डपरिमितदेशमारभ्य महदाद्यावरणरूपात्त्रैगुण्यात्परतस्तच्छतोत्तरपरिमितदेशपर्यन्तं स्थितं विष्णुं पश्यति । गिरिशगरुडौ तु महत्तत्त्वस्यावरणेन तु शतोत्तरेण तमोगुणेन परिमितदेशपर्यन्तं स्थितमेव विष्णुं पश्यतः । उमासुपर्ण्यौ तु तमोगुणात्परिमाणतो दशहीनेन महत्तत्त्वेन परिमितदेशपर्यन्तं विष्णुं पश्यतः । इन्द्रकामौ तु महत्तत्त्वात्परिमाणतो दशहीनेनाहङ्कारेण परिमितदेशपर्यन्तमेव स्थितं विष्णुं पश्यतः । मनुबृहस्पत्यादयोऽहङ्कारात्परिमाणतो हीनेन बुद्धितत्त्वेन परिमितदेशपर्यन्तमेव स्थितं विष्णुं पश्यन्ति । सोमसूर्यौ तु बुद्धितत्त्वात्परिमाणतो हीनेन मनस्तत्त्वेन परिमितदेशपर्यन्तं स्थितं विष्णुं पश्यतः । वरुणादयस्त्वाकाशवाय्वादिभूतैः क्रमेण

परिमाणतो दशहीनैः परिमितदेशपर्यन्तमवस्थितं विष्णुं योग्यतानुसारेण पश्यन्ति । तस्यापि भागस्यानन्तधाविभक्तस्यैकमेव भागं सरस्वती पश्यतीत्येतद्रुद्रगरुडयोर्भगवद्गुणदर्शने तारतम्यमवगन्तव्यम् । उमापि यावतोनारायणस्य गुणान्पश्यति तावतां शतधाविभक्तानामेकमेव भागं शक्रः पश्यति । तस्यापि भागस्यानन्तधाविभक्तस्यैकमेव भागमनिरुद्धः पश्यतीत्येवमेव प्रवहादीनां भगवद्गुणदर्शने ह्रासक्रमोऽवगन्तव्यः । इतोऽपि साधनतारतम्यानुसारेण मुक्तेषु तारतम्यमङ्गीकर्तव्यम् । नन्वेकरूपसेवयाऽधिकफलमल्पसेवयाऽल्पफलं च राजादिदत्तं सिद्धं दृष्टम् । बहुकर्मणो बहुस्वर्गोऽल्पकर्मणोऽल्पस्वर्गश्च वेदात्सिद्धोऽन्यथा कर्मबाहुल्यस्य वैयर्थ्यं स्यात् । एवं दृष्टं न्यायसिद्धमोक्षतारतम्यं परित्यज्य विपरीताङ्गीकारे दृष्टहानिरदृष्टकल्पनादोषौ प्रसज्येयातां सर्ववादिनाम् । तत्रातिदूषणदुष्टेष्वन्येषु प्रपञ्चमिथ्यात्वादिषु मायावादिना सह विवदमानैरन्यैर्वादिभिरत्र मुक्तानां तारतम्ये श्रुतहान्यश्रुतकल्पनादिदोषदुष्टे संवादोऽनुचित एव कथं क्रियते । मायावादिनस्तु श्रुतहान्यश्रुतग्रहदोषावपि न लज्जाकराववाच्यब्रह्मवादिनः । ननूच्चनीचताभावे लोकवन्मुक्तेष्वप्युच्चान्दृष्ट्वा नीचानामीर्ष्यादिकं किं न स्यादित्यत आह ॥ निःशेषेति । पूर्वमेव बहुजन्मानुष्ठिततपोज्ञानादिभिरशेषदोषान्निरस्यानन्तरं विष्णुमपरोक्षीकृत्य मुक्तिं गतेषु नेर्ष्यादिदोषशङ्का । यद्येवमुच्चनीचभावो मुक्तानामीर्ष्यादिकमापादयेत् तर्हि समत्वमप्यादयेदेव । लोके विद्यैश्वर्यादिना समान्दृष्ट्वाऽपीर्ष्यादिकं कुर्वतामेवाविवेकिनां दर्शनात् । अतोऽन्वयव्यतिरेकाभ्यामविवेकादिदोष एवेर्ष्याद्युत्पत्तौ कारणमित्यवगन्तव्यम् । न तु परेषामुन्नतिः । समत्वं वा कारणम् । न हि विवेकादिगुणवत्सु परोन्नत्याऽतोषतापादिकमुत्पद्यते प्रत्युत हृष्यन्ति

सन्तः परोन्नत्या। अतो निरस्ताशेषदोषाणां मुक्तानामुच्चनीचभावो नेर्ष्यादिदोषापादकः। एवं निरस्तदोषत्वेनैवेर्ष्यादिनिवारणं समीचीनं मुक्तस्य न त्वन्यादर्शनेन। तथा सत्यरत्यादिप्रसङ्गात्। एकाकित्वेनान्यमपश्यतो लोके भीत्यादिदर्शनात्। श्रूयते हि जगदादौ तथाविधस्य हिरण्यगर्भस्याप्यरतिः। स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छदिति। नन्वपश्यतोऽपि मुक्तस्य नारत्यादिकमापादयितुं शक्यते। इच्छारहितत्वात्। न हीच्छारहितस्य वटस्यान्यमपश्यतोऽप्यरतिर्वा भीतिर्वा दृश्यत इत्याशङ्क्याह ॥ यदीति। साधनभेदादुच्चनीचभावस्तावदस्य स्वकाममुक्तेषु। तत्रान्यदर्शनेच्छाराहित्यकल्पनेन निष्प्रमाणकेनेर्ष्यादिनिवारणाद्वरं श्रुत्युक्तनिर्दोषत्वेनैव निवारणम्। अतः श्रुत्योक्तं कामं परित्यज्य परहितकल्पनवच्छ्रुत्युक्तं तारतम्यं परित्यज्य मुक्तानां साम्यकल्पनमपि प्रमाणरहितेनाग्रहमात्रेणैव विजृम्भितमित्यर्थः। तत्र तारतम्यमनुमानेनापि साधयति ॥ मोक्ष इत्यादिना। मुक्तब्रह्मादयस्तारतम्योपेताश्चेतनत्वात्संसारिब्रह्मादिवत्। न च तारतम्यवन्मुक्तेषु दुःखादिकमेतदनुमानं साधयतीत्यप्रसङ्गादिति वाच्यम्। बहुश्रुतिभिर्बाधितत्वेन मुक्तेषु दुःखादेरनुमातुमशक्यत्वादाह ॥ साध्येति। यदि विषमसाधनानुरूपेण विषममेव मोक्षं मुमुक्षुभ्यो न दद्यादीश्वरस्तर्हि तस्य वैषम्यनैर्घृण्ये स्याताम्। अधिकसाधनवते यावन्तं मोक्षं ददाति तावन्तमेवानाधिकसाधनवतेऽपि ददाति चेदीश्वरो विषमः स्यात्। अल्पसाधनवते यावन्तं मोक्षं ददाति तावन्तमेवाधिकसाधनवतेऽपि ददाति चेन्नैर्घृण्यं स्यात्। न चेश्वरस्य वैषम्यनैर्घृण्यदोषावङ्गीकर्तुं शक्येते। वैषम्यनैर्घृण्ये न सापेक्षत्वादिति पूर्वमेव निराकृतत्वात्। अतो ज्ञानादि-साधनतारतम्यमनुसृत्य मोक्षतारतम्यकर्तृत्व एवेशस्य वैषम्यादिदोषराहित्यं सिध्यति नान्यथा। मुक्तेः साधनान्यनेकविधानि

कारयितुं समर्थस्यापीशस्य पुरुषाणामनादिजन्मकृतादृष्टवैचित्र्यमपेक्ष्य बहुविधानि कारयति न वैषम्यादिकं शङ्क्यम् । अनाद्यदृष्टवैचित्र्यं स्वेच्छयैवानुसरतो विष्णोर्निरङ्कुशैश्वर्यमप्युपपन्नं च । तच्च पूर्वमेवोक्तं भगवता । न कर्मविभागादिति चेन्नानादित्वात् । उपपद्यते चाप्युपलभ्यते चेति । न चात्र साधनतारतम्यं केनचिन्मानेन विरुद्धं दृश्यमानत्वाल्लोकवेदयोः । लोके तावदधिकमुक्तेषु दुःखादेरनुमातुमशक्यत्वात् । श्रूयते तेषु निर्दुःखत्वमवाप्तकामत्वं च । तरति शोकमात्मवित्तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति । तद्वदेवं मनो येनानन्द्येव भवति । अथो वै न शोचति । यं यमन्तमभिकामो भवति । यं यं कामयते सोऽस्य सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीति । एतदेव प्रतिपाद्यते सर्वे नन्दन्ति यशसाऽऽगतेन सभासाहेन सख्या सखायः। किल्बिषत् पितुषणि ह्येषामलं हितो भवति वाजिनायेति मन्त्रेण। अस्यार्थः। सभां सहत इति सभासाहस्तेन स्वसभावमण्डनेन यशसा जगद्विख्यातेन सख्या विष्णुनाऽऽगतेन प्राप्तेन मुक्ताः सखायः सर्वे नन्दन्ति। य एषामसौ तदा किल्बिषः स्पर्धाऽनिष्टापात्तिप्राप्तिबन्धकः पितुषणिर्दिव्यान्नदाता वाजिनाय सर्वेन्द्रियविषयोपभोगाय वाऽलमत्यर्थं हिता भवतीति । अत एव श्रुतिविरुद्धं दुःखादिकं परित्यज्य मुक्तानां तारतम्यं साधयदनुमानं नातिप्रसङ्गीति तेषां तारतम्यमुक्तप्रकारेण श्रुतियुक्तिसिद्धमित्यर्थः ॥ ४ ॥ न केवलं मुक्तानामेव तारतम्यं श्रुतियुक्तिसिद्धत्वेन निराकर्तुमशक्यं किन्तु ब्रह्माणमारभ्य कलिपर्यन्तमपकर्षतारतम्यं श्रुतियुक्तिसिद्धत्वेन निराकर्तुमशक्यम्। किन्तु ब्रह्माणमारभ्य कलिपर्यन्तमुत्कर्षतारतम्यं च सर्वजीवानामपि निवारयितुमशक्यमेव श्रुतियुक्तिबलोद्धतत्वादित्याह ॥ अनादीति । तत्र तावद्वेदगर्भजीवस्या-

नादितः सर्वजीवादधिकत्वे युक्तिमाह ॥ ब्रह्मण इति । ततः पूर्वतनकालो हिरण्यगर्भजीवस्य हरिः श्रीर्जुगणव्यतिरिक्तेभ्यो यदाधिक्यं तद्युक्तः कालत्वाद्यथाऽयं कालः । एवमनेनानुमानेन रुद्रजीवस्यापि हरिः श्रीब्रह्मपदयोग्यव्यतिरिक्तेभ्यो आधिक्यं साध्यम् । तथेन्द्रादिजीवेष्वनादित आधिक्यक्रमोऽनुमातव्यः । तथा मुक्त्युत्तरकालोऽपि मुक्तहिरण्यगर्भस्य हरिः श्रीहिरण्यगर्भान्तरव्यतिरिक्तेभ्यो यदाधिक्यं तद्युक्तः कालत्वाद्यथाऽयं कालः । एवं मुक्तरुद्रादीनामप्याधिक्यतारतम्यमनुमातव्यम् । नन्वयं दृष्टान्तः साध्यविकलः । अमुक्तब्रह्मणोऽस्मिन्काले मुक्तमनुष्याद्युत्तमत्वाभावादित्यत आह ॥ उत्तमत्वमिति । न हि बलज्ञानादिगुणाज्ज्येष्ठादमुक्तब्रह्मणो मुक्तमनुष्यादेराधिक्यं युज्यते । न ह्यनिर्णिक्तसौवर्णपुत्रिकाया निर्णिक्तरजतपुत्रिका श्रेष्ठा भवति । अतो नागन्तुकब्रह्मादीनामाधिक्यतारतम्यम् । अनेन न्यायेन कल्याद्यसुराणामपकर्षतारतम्यमप्यनागन्तुकमेवावगन्तव्यम् । श्रुतिस्मृतिभिरप्येतदेव विविच्य दर्शयति ॥ शृण्व इत्यादिना । यो य उग्रोऽसुरप्रकृतिस्तं तं दमायन्नधोऽधो नयन्योऽयमासुरप्रकृतेरन्यो दैवप्रकृतिस्तं तमधिकं पदं स्वकीयमतिशयेन नयन्नैश्वर्यादिन्द्रनामको विरोध्य वसताऽन्तगामीर्विष्णुः शृण्वे श्रूयते स्म । स एवेधमानस्य स्वायोग्यपदं कामयतो द्वेष्टुभयस्य दैवासुरवर्गद्वयस्य च राजा । मध्यममनुष्यांस्तु विशः प्रजाः केवलराजसस्वभावान्नान्धन्तमो नापि मोक्षं नयति किन्तु संसारमण्डल एव चोष्कूयते परिभ्रामयति । स एव पूर्वेषां पूर्वादिष्टानामुग्रशब्दोक्तानां सख्यानि परावृणक्ति विनाशयति । न कदाचिदप्यसुरैः शठमतिभिः कृतानि सख्यानि स्वीकरोतीत्यर्थः । अपरेभिरनन्तरदुष्टैरुग्रेतरैर्दैवप्रकृतिभिः सह नितर्तुराणो विशेषेण त्वरन् सख्यान्येति । अनानुभूतीः

सम्यगनुभवयोग्यताशून्यानध एव धुन्वानः पूर्वीः शरदोऽनादित आरभ्यातीतसंवत्सरांस्ततर्तरीति तीर्णवान् उत्तरकालेऽप्येवमेव वर्तिष्यते भगवान् । नन्वनादितो वर्तमानां व्यवस्थामतिक्रम्य सुरप्रकृतीनामनुग्रहं दैवप्रकृतीनां निग्रहं करिष्यतीत्यर्थः । दिवे दिवे इत्यनयार्चाऽपि देवासुरवर्ययोर्दैवभाग्यादन्यमासुरमेवार्धं भगवानधो नयतीत्युच्यते । तथा हि जायन्त इति जा असुरप्रजाः करचरणादिमत्त्वेन दैवभागसादृश्येऽपि याः कृष्णाः केवलतामस्यस्ता एव दिवे दिवे प्रतिदिवसं सदा सद्मनः स्वर्गलोकाशाश्वता-द्वृषभोऽपासेधन्निवारितवान् । न कदाचिदप्यासुरप्रजाः स्वीकरोतीत्यर्थः । तथा यौ दासौ लोकं क्षपयन्तौ वर्चिनशम्बरनामानाव-सुरौ तावप्युदव्रजे समुद्रतीरेऽहन् जघानेत्यर्थः । अत्र हननं नामासुराणां नित्यनरकपातनमेव विवक्षितं तद्योग्यत्वात् । देहवियो-गस्तु देवानामपि सर्वकारणेन भगवतैव क्रियते न त्वसुराणामेवेति विशेषोऽस्ति । तं भूतिरिति श्रुतेरर्थस्त्वैतरेयसंहितयोक्तः ।स एव भूतिनामाऽपि ज्ञानैश्वर्यादिभूतिदः । अज्ञानादिप्रदातृत्वात्स एवाभूतिनामकः । सुखज्ञानादिगुणपूर्णं सर्वगुणैः प्रभुमुपासते तं वाय्वादिदेवास्तस्माच्च तेऽखिला बभूवुः । सुखज्ञानपूर्वैः सर्वैर्गुणैर्युतो देवानामपि सर्वेषां प्रधानोऽद्यापि मारुतः । स्थित्वा गुसेषु विष्णुं तं भूर्भुरित्येव शंसति । भूशब्दार्थोऽभूरिति वैपरीत्येन चासुराः । अभूतिकारणोऽस्माकमैश्वर्यादिगुणोज्झितः । इत्येवोपासनं तस्मात्पराभूताश्च तेऽखिलाः । ज्ञानैश्वर्यादिभिर्हीनाः पेतुरन्धे तमस्यथेति । तद्यथेति श्रुतेरर्थोऽन्यत्रोक्तः । इदं शरीरं भूतेषु विलापयति केशवः । अविद्यां चैव जीवस्य गमयेज्ज्ञानं च सर्जनात् । स्वर्णकारो यथा स्वर्णमलमग्नौ निहत्य च । शुद्धेन तेन चात्मेष्टं कुरुते रूपमञ्जसा । एवं स भगवान्विष्णुर्जीवस्वर्णस्य यन्मलम् । अविद्याकामकर्माद्यमात्मामग्नौ नाश्य सर्वकृत् । स्वेच्छ-

या कुरुते रूपं यथायोग्यं यस्य मुक्तिगम् । पितृजीवस्य पित्र्यं स गान्धर्वं तस्य चैव हि । दैवं तु देवजीवस्य प्राजापत्यं प्रजापतेः । ब्रह्मणो ब्राह्ममेवेति नित्यानन्दस्वरूपकम् । न योग्यतां विना क्वापि पूर्वप्रज्ञाश्रुतेः सदा । यदा मुक्तो भवेद्ब्रह्मा तदा ब्रह्मा स मुख्यतः । एवं प्रजापतिश्चापि तथैवान्येऽपि सर्वशः । यथा हि स्वर्णरूप्याद्यं मलहानौ हि तद्भवेत् । पूर्वं तु योग्यतामात्रं द्विजत्वं बालके यथेत्यादि । पुरा सत्ययुगे देवि विशुद्धमतयोऽखिलाः यजन्ति विष्णुमेवैकं ज्ञात्वा सर्वेश्वरेश्वरं । प्रयान्तीत्यादि पद्मपुराणवचनम् । अवजानन्तीत्यादि भगवद्वाक्यम् । द्विविधो भूतसर्ग इति विष्णुधर्मवचनम् । देवानामित्यादि वामनपुराणवचनम् । य एते विष्णुभक्त्यादयो धर्मा अनादितस्तारतम्येन स्थिता ब्रह्मादीनां स्वाभाविकलक्षणेनोक्ताः श्रुतिस्मृतिसामर्थ्यात् ये तु विष्णुप्रातिकूल्यादयो दोषा अनादितस्तारतम्येन स्थिताः कल्यादीनामसुराणां स्वाभाविकलक्षणत्वेनोक्तास्तेषामनादित्वानङ्गीकारे बाधकमाह ॥ यदीति । न च प्रशस्तपूर्ववासनादिकमन्तरेणाकस्मादेव कदाचित्कस्यचिद्देवप्रकृतिरासुरप्रकृतिश्च कस्यचित्प्रशस्तपूर्ववासनादिकमन्तरेणेति वाच्यम् । स्वर्गनरकादेरप्याकस्मिकत्वप्रसङ्गेनादृष्टसाध्यत्वाभावापत्तेः। जयादेस्तु देवस्वभावस्य हिरण्यकशिप्वादिजन्मस्वासुरभावः स्फटिके जपाकुसुमप्रयुक्तलौहित्यवदसुरावेशप्रयुक्त एव । तथा हि । जयविजययोः शापो दत्तः सनकादिभिः । यथोक्तं भागवते । लोकादितो व्रजतमन्तरभाव दृष्ट्वा पापीयसस्त्रय इमे रिपवोऽस्य यत्रेति । यत्र येषु लोकशब्दवाच्येषु देहेष्वस्य भगवतस्त्रयो रिपवोऽसुरजीवाः प्रविशेयुस्तान्पापीयसो लोकतो वैकुण्ठाद्युवां व्रजतमिति । अतोऽस्मादेवानादिदेवस्वभावस्तारतम्येनानुवृत्तस्तेष्वेव तस्य तारतम्येनैव केवलदुर्दुर्को घटते नात्यन्तमविद्यमानस्योत्पत्तिः । तं

विद्याकर्मणी समन्वारभेते । पूर्वप्रज्ञा चाजन्मजन्म यदभ्यस्तं ज्ञानमध्ययनं तपः । तेनैवाभ्यासयोगेन तथैवाभ्यासते पुनः । हिंसाहिंसे मृदुक्रूरे धर्माधर्मावृतानृते । तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते । सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति । जन्मान्तरसहस्रेपुर्या बुद्धिर्भविता पुरा । तामेव भजते जन्तुरित्यादिवचनसामर्थ्यात् । सर्वथाऽपि तु त एवोभयलिङ्गादित्यादिसूत्रसन्दर्भाच्चेत्यर्थः । ननु भगवतो बहुरूपस्य निर्भेदतया निर्दोषतयैव दर्शनादपेक्षितफलप्राप्तिरिति यदस्मिन्पादे प्रतिपादयितुमारब्धं तन्न युज्यते । भगवतो रूपेषु रामादिषु जीवेष्विव भेदादिदर्शनादित्याशङ्क्य बृहत्संहितावचनेन परिहरति ॥ न चेति । विष्णुं पश्यतोऽपि तत्स्वरूपेषु यदा भेदं न पश्यन्ति । तदा स्वयं विष्णुर्न पश्यतीति किमुवर्णनीयम् । प्रत्यभिज्ञायमानत्वेन स एवायं गकार इतिवदेक एवासौ बहूच्चारितत्वेन बहुधा प्रतीयते । न च भगवतोऽवतारेषु मच्छकूर्मादिष्ववयवविन्यासवैचित्र्यं प्रत्यभिज्ञाविरोधीति वाच्यम् । अनेकधा स्वावयवविन्यासं रचयतीव नटवदतो न प्रत्यभिज्ञाविरोधः । अतः स्वगतभेदशून्यस्यैव विष्णोर्मत्स्यादिरूपेण बहुभावो विशेषनिबन्धन एव । मुष्टदृष्टीनां तु भगवद्रूपेषु प्रतीयमानेष्वपि परस्परभेदाभेदयोरग्रहणं हरीच्छाकृतमित्यर्थः । न च भार्गवरामस्य दाशरथिरामेण स्पर्धाद्यभिधायकं पुराणवाक्यं तद्भेदे प्रमाणमिति वाच्यम् । अयं वै हरय इत्यादिवेदवाक्यविरोधापत्तेः । अतो यथा लोके कश्चित्केनचित्स्पर्धादिकं करोति तदनुकरणप्रतिपादनपरं पुराणवाक्यं न भगवद्रूपेषु निर्भेदप्रतिपादकेन वेदवाक्येन विरोद्धुं शक्नोति । यथा तेषु यद्भेदग्राहकत्वेन मनुष्यादिप्रत्यक्षमाशङ्क्यते पुराणवाक्यात्तदपि परीक्षितमेव तेषु

भेदं गृह्णन्न निषेद्धुं शक्नोति । परीक्षितमेवाभेदं गृह्णन्ज्ञानी प्रत्यक्षमपरीक्षापूर्वदर्शनस्याबलवत्त्वात् । यथा दूरस्थितं विष्णुमित्रमपरीक्षितमेव देवदत्तत्वेन गृह्णन् दैवदुर्बलं प्रत्यक्षं परीक्षितं तु विष्णुमित्रत्वेन गृह्णन्प्रत्यक्षं प्रबलम् । न च भगवदवतारेषु परीक्षापूर्वदर्शनभेदं गृह्णाति । प्रत्यक्षे क्वचिदपि पुराणवाक्यमुपलभ्यते किन्तु तत्सम्मुग्धमेव । तथा तेषु तच्चिदात्मके स्वपरीक्षितं वेधादिकं गृह्णत्प्रत्यक्षमपरीक्षितेन न निर्दोषत्वग्राहकेण ज्ञानिप्रत्यक्षेण बाध्यते । ज्ञानिनस्तु विष्णुं सर्वावतारेषु निर्दोषमेव पश्यन्ति विरोधादिदोषरहित एव । विष्ण्ववतारेषु केचिदपरीक्षितदृष्ट्यैव स दोषो दृश्यत इत्यत्र निर्दोषमेवेत्यादिश्रुतयः प्रमाणम् । तदेतदाह ॥ न पुराणगमित्यादिना । निषेद्धुं शक्नुयादित्यत्र पूर्वश्लोकगतेनात्रानुषङ्गः कर्तव्यः । रुद्रो द्रागद्राक्षीदित्यर्थः । नन्वैन्द्रजालिकेनेव भगवता क्वचिदवतारविग्रहे विद्यमानमेव छेदादिकं प्रदर्श्यमानं गृह्णत्प्रत्यक्षमपरीक्षत्वेनाप्रमाणम् । अच्छेद्यत्वादिनिदर्शनं तु परीक्षितत्वेन प्रमाणं चेत्परीक्षाधीनं प्रामाण्यं ज्ञानम् । तथा च ज्ञानिनामपि परीक्षयैव प्रामाण्यनिश्चयः स्यात् । परीक्षाया अपि परीक्षान्तरेणैव यथार्थत्वनिश्चयः स्यात् । तस्याप्येवमनवस्था स्यादित्यत आह ॥ न परीक्षेत्यादिना । यत्रान्यथात्वाशङ्का तत्रैव परीक्षापेक्षा साक्षिसिद्धे तु नान्यथात्वाशङ्का । साक्षिदर्शनस्य निर्दोषत्वनियमात् दोषशङ्का तु मानस एव दर्शने स्यात् । यद्यन्निरस्तान्यथात्वाशङ्कं ज्ञानं तत्साक्षिदर्शनं यथेच्छादिदर्शनम् । न हि काश्चिदियं सतीच्छोपलभ्यते उतासतीत्यादि संशयन् दृश्यते । यन्मनोवृत्तिज्ञानं तदेव क्वचित्क्वाचित्व्यभिचारि यथा स्मरणम् । क्वचिदयथार्थं यन्मानसज्ञानं यथार्थत्वेन साक्षिणाऽवधृतं तदेव प्रमाणम् । तथा चाक्षुषादि-

ज्ञानानामपि यज्ज्ञानं यथार्थत्वेन साक्षिणाऽवधार्यते तदेव प्रमाणं नान्यदिति । न हि चक्षुरादिभिर्दृष्टं सर्वमपि प्रामाणिकमेवेति नियमः । शुक्तिरजतादौ व्यभिचारात् । यत्केवलसाक्षिवेद्यसुखदुःखादिकं तत्प्रामाणिकमेवेति नियमोऽस्त्येव । जातेऽपि दुःखे जातं दुःखमित्यादिभ्रमाभावात् । कस्यापि न हि मानसादिज्ञानप्रामाण्यवत्साक्षिप्रामाण्यमन्यनिश्चेयं किं स्वनिश्चेयमेव साक्षिणः स्वयं प्रकाशत्वात् । अहं जानामीति हि सर्वोऽनुभवति । अतः स्वानुभवस्य मानत्वं स्वेनैव ग्राहकेण मितं भवितुमर्हति । मानसज्ञानानि तु दोषरहितानि चेत् । प्रमाणानीति साक्षी निश्चिनोति । तत्र मानसादिषु परीक्ष्य दोषाभावं निश्चिनोति । साक्षी परीक्षामन्तरेणैव परीक्षानिर्दोषत्वं स्वानिर्दोषत्वं च स्वयमेव निश्चिनोतीति नानवस्था । अतोऽक्षजलिङ्गजादिज्ञानानां सर्वेषामपि प्रामाण्यमिति साक्षिनिश्चितत्वाभावात्तत्र कस्यचिदप्रामाण्येऽपि न साक्ष्यध्यवसायस्यान्यथाभावः । अतो यत्साक्षिणा प्रमाणत्वेनावधृतं तत्प्रमाणमिति प्रमाणलक्षणम् । साक्ष्यनुभवस्य हि सुखादिविषयस्य प्रामाण्यनियमः । अक्षजादिज्ञानेषु निर्दोषं प्रमाणम् । यतश्च दोषाभावत्वेन साक्षिणा परीक्षितमेव प्रमाणं नान्यदतो भगवदवतारेषु वेधभेदादिदोषदर्शनमप्रमाणमेव निर्दोषत्वेनापरीक्षितत्वात् । न ह्यपरीक्षदृष्टिः काऽप्यर्थसाधिकेत्याह ॥ दोषाभाव इत्यादिना । यथाऽत्रागमविरोधेन प्रत्यक्षमप्रमाणम् । एवं प्रत्यक्षविरुद्धार्थे नागमोऽपि प्रमाणम् । यत्रासौ प्रत्यक्षमुपजीव्य प्रवर्तते तत्रागमाविरुद्धार्थे प्रत्यक्षं प्रमाणम् । यत्रागममुपजीव्य तत्प्रवर्तत इत्याह ॥ प्रत्यक्षेति । कस्मिन्विषये प्रत्यक्षमुपजीव्यं कस्मिंश्चागम इत्यपेक्षित आह ॥ लौकिक इति । ननु भगवदवतारदोषग्राहिप्रत्यक्षस्यागमोपजीवनं कथम् । येनोपजीव्यविरोधेनाप्रामाण्यं तस्य

स्यादित्यत आह ॥ आगमेनेति । जगदीश्वरो देवकार्यार्थमवतीर्ण इत्यागमैकवेद्यो यो विष्णुः स एव नागपाशैर्बद्धः शस्त्रविद्धश्चेति तत्कालीनानां केषांचित्प्रत्यक्षं गृह्णातीति वक्तव्यं प्रत्यक्षेण विष्णौ दोषमापादयता । तथा सत्युपजीव्यागमविरुद्धत्वेन तत्प्रत्यक्षमप्रमाणं स्यात् । सर्वदर्शी सर्वेश्वरः सर्वशक्तिः समृद्धिमानेवावृद्धिरनून आप्तो वशी स्वाधीनोऽनादिरनन्तो व्यपगतनिद्राभयक्रोधतन्द्री व्यपगतेच्छाभयकामव्याधिर्निर्दोषो निरनिष्टो निरवद्यो ये भगवन्तं वासुदेवं विदुस्त एव विदुर्नैवं विदुर्न ते विदुः । अच्छेद्योऽयमदाह्योऽयमित्यादिश्रुतिस्मृतिभिर्विष्णोर्वेधादिदोषराहितत्वेनैव सिद्धत्वात् । अथोपजीव्यविरोधपरिहारायात्र सर्वथाऽऽगममुपजीव्यप्रत्यक्षं प्रवर्तत इत्युच्यते तर्हि तत्प्रत्यक्षमन्यस्य कस्यचिद्दोषविधायकं स्यान्न विष्णोः शास्त्रमनुपजीव्य विष्णोरधिकर्तुमशक्यत्वात् । यदि श्रीवत्सादिलक्षणलक्षितः कृष्णराघवादिः कथमविष्णुरित्युच्यते । तर्ह्यत्र शास्त्रमुपजीव्यं स्यात् । न हि तद्विहाय श्रीवत्सादिलक्षणवतो विष्णुत्वं ज्ञातुं शक्यते । अतः श्रीवत्सादिलक्षणवन्तं विष्णुमधिकृत्य तत्र दोषं विदधतः प्रत्यक्षस्योपजीव्यागमविरोधेनाप्रामाण्यं दुर्वारमेव । आगमेन विष्णोर्निर्दोषत्वेनैवोक्तत्वादित्यर्थः । उक्तमेव स्पष्टयति ॥ कस्यचिदिति । शास्त्रमनुपजीव्यैव केषांचित्प्रत्यक्षं विष्णुर्दोषवानिति गृह्णातीत्यत्र न प्रत्यक्षं प्रमाणमस्ति नापि पुराणवाक्यम् । तस्य श्रुत्युपजीवकत्वेन श्रुतिविरुद्धार्थे प्रामाण्याभावादित्याह ॥ केचिदिति । अतः सच्चिदानन्दादिविग्रहस्य विष्णोः प्राकृतदेहदर्शने छेदभेदादिदर्शनमपरीक्षितमुत्पद्यमानमप्रमाणमेव । यदि प्रमाणं तर्हि यज्ञदत्ते देवदत्तभ्रमोऽपि प्रमाणं स्यात् । अपरोक्षत्वाविशेषत्वादित्याह ॥ अपरीक्षितेति । ननु भगवदवतारेऽयं दोषवानित्येवमुत्पद्यमानं दर्शनमुपजीव्यप्रवृत्तस्य नायं दोषवा-

निति बाधकप्रमाणस्याप्युपजीव्य विरोधः स्यादित्यत आह ॥ यावदिति । यावच्छक्तिपरीक्षितमेवोपजीव्यं बाधयितुं न शक्यते । अपरीक्षितं तूपजीव्यमपि बाध्यत एव । शुक्तिकाशकले रजतमिदमित्यपरीक्षितज्ञानगृहीतमिदमंशमुपजीव्य नेदं रजतमिति बाधदर्शनादित्यर्थः । अत्र यन्मायिभिरुच्यते यथा यदिदं रजतं सा शुक्तिरित्येतेन प्रमाणेनेदमंशमात्रमुपजीव्य तस्य शुक्तित्वं विदधता रजतांशो बाध्यते । एवं यत्सर्वज्ञत्वादिलक्षणलक्षितं ब्रह्म तत्त्वमसीत्यनेन प्रमाणेन ब्रह्मस्वरूपमात्रमुपजीव्य तेन जीवस्याभेदं बोधयता सर्वज्ञत्वाद्यंशो बाध्यताम् । ततश्च जीवदोषैर्ब्रह्मणोऽपि दोषित्वमिति तत्प्रतिषेधति ॥ न चैवमिति । सार्वज्ञ्यादिलक्षणविशिष्टत्वेन ब्रह्मणः परीक्षितत्वान्न तत्र किञ्चिद्बाधितुं शक्यते तत्त्वमसीति वाक्येन । यतश्चैतद्वाक्यं सर्वज्ञत्वादिलक्षणविशिष्टमेव ब्रह्मस्वरूपमुपजीव्य तेन जीवस्याभेदं बोधयति । अतो धर्मिग्राहकप्रमाणविरुद्धमेव । न च ब्रह्मस्वरूपमात्रमुपजीव्य तेन जीवस्याभेदो बोध्यत इति वाच्यम् । सर्वज्ञत्वादिलक्षणं विहाय येनकेनचित्पदार्थत्वादिना घटादिसाधारणेन ब्रह्मस्वरूपं निर्धार्यमित्यङ्गीकर्तव्यं न तु लक्षणं विहाय स्वरूपमात्रमुपजीव्यमिति निर्धारयितुमशक्यत्वात् । सर्वज्ञत्वादिलक्षणात्मकं ब्रह्मस्वरूपमङ्गीक्रियते चेत्सिद्धो नः पक्षः । शब्दानामन्विताभिधायकत्वात् । ब्रह्मशब्देन सामान्यतो विज्ञानादिभिरन्वितमेव हि तद्ब्रह्मोच्यते । विज्ञानादिशब्दसहितेन ब्रह्मशब्देन धर्मराशेर्ब्रह्मस्वरूपत्वं विज्ञानं ब्रह्मेत्यादिसामानाधिकरण्येन न तु व्यावृत्तत्वात् । कारणप्रतीतमेवोपजीव्यं चेदयं चैत्र इति देवदत्ते चैत्रभ्रमो न स्यात् । तत्रेदमंशस्योपजीव्य सर्वतो व्यावृत्तिप्रतीतेः । न हि चैत्रादिभ्यो व्यावृत्तत्वेन प्रतीते वस्तुनि चैत्रभ्रमो युज्यत इत्यत आह ॥ पुरोवर्तित्वेति । केनाचित्सा-

दृश्यादिदोषेण चैत्रमात्रादेव व्यावृत्ततयेदमंशो न प्रतीयते न त्वन्यस्मात्पुरोवर्तित्वादिव्यावर्तकधर्मैः पुरोवर्त्यादिसर्ववस्तुव्यावृत्ततया प्रतीयमानत्वात् । अन्यथा तत्र चैत्रभ्रमवदिदमित्यादिभ्रमोऽपि स्यात् । न चैवं येनकेनचिद्व्यावर्तकधर्मेण यतः कुतश्चिदर्थाद्व्यावृत्ततया प्रतीतमेव ब्रह्मोपजीव्यमिति वक्तुं शक्यं मायिना । निर्विशेषत्वेनाङ्गीकृतत्वात् । येनकेनचिद्व्यावृत्तं कुतश्चिद्व्यावृत्तं तत्त्वमिति बोधने सिद्धसाधनदोषोऽपि स्यात् । प्रत्यक्षेणैवात्मनो यतः कुतश्चिद्व्यावृत्तत्वेनानुभूयमानत्वात् । न च चिन्मात्रं ब्रह्म तत्त्वमिति बोध्यत इति वाच्यम् । निर्विशेषत्वेनाङ्गीकृते ब्रह्मणि चिन्मात्रत्वविशेषस्याङ्गीकर्तुमशक्यत्वात् । अङ्गीकारे वा तद्वत्सर्वज्ञत्वादिविशेषस्याङ्गीकारः स्यादविशेषात्सिद्धसाधनदोषश्च स्यात् । जीवस्य चिन्मात्रवस्त्वभेदसाधने चिदात्मकेन स्वेन स्वस्याभेदेनानुभूयमानत्वाच्छास्त्रमन्तरेणेत्यर्थः । ननु सर्वसापेक्षत्वेनावस्तुभूतत्वात्सर्वज्ञत्वस्य न तच्चेतनत्ववदङ्गीकर्तुं शक्यत इत्याशङ्क्य परिहरति ॥ सर्वेति । यद्यन्यसापेक्षत्वेन सर्वज्ञत्वमवस्तुभूतं स्यात्तर्हि चेतनत्वं नाम ज्ञत्वं ज्ञेयसापेक्षत्वेनान्यसापेक्षमित्यवस्तुभूतं स्यात् । न च स्वस्यैव ज्ञातृज्ञेयभावेन शब्दपरोक्षत्वं नास्तीति वाच्यम् । सविशेषत्वापत्तेः । तथाऽणुमहतोरिव स्वपरयोरपि परस्परप्रतियोगिकत्वेन व्यवहारात्स्वशब्दार्थस्य परापेक्षत्वेनावस्तुभूतं स्यात् । परव्यावृत्तरूपं हि स्वशब्देनोच्यते । अन्यथा स्वरूपशब्दः सार्थको न स्यात् । परव्यावृत्तरूपस्य स्वपररूपयोः साधारणत्वात् । पररूपव्यावृत्त्यर्थं हि स्वशब्दः प्रयुज्यते । रूपशब्देनैव स्वशब्दार्थस्योक्तौ स्वशब्दो व्यर्थः स्यात् । तथा चेतनस्य भावश्चैतन्यमिति ज्ञानमुच्यते । तच्च ज्ञातृज्ञेयसापेक्षत्वेन परापेक्षमित्यवस्तुभूतं स्यात् । ज्ञेयज्ञातृनिरपेक्षं ज्ञानं तु ज्ञेयज्ञानहीनज्ञवन्निष्प्रमाणकमेव । यदिदं किञ्चि

ज्ज्ञानं ज्ञातृज्ञेयहीनं भवेत्तर्हि भोगहीनं भोजनमपि किञ्चिद्भवेत् । ताडनमपि ताडयितृताविहीनं स्यादविशेषादित्यर्थः । ननु भोजनादीनामनित्यत्वात्कर्तुः कर्मापेक्षानित्यस्य ज्ञानस्य किं तयोरित्याशङ्क्य परिहरति ॥ नित्यत्वादिति । यदि नित्यं ज्ञानज्ञेयज्ञातृहीनं स्यात्तर्हि नित्या वेदवागपि वाच्यवक्तृविहीना स्यादविशेषादित्यर्थः । न च सा कदाचिदपि वाच्यादिरहिता भवतीत्याह ॥ नहीति । यथा नित्याऽपि वेदवाक् वाच्यवक्तृविहीना न भवति । एवं नित्यमपि ज्ञानं ज्ञातृज्ञेयविहीनं न भवेदेव । यथा च वाक्वाच्यहीनः कश्चिन्नित्यो वक्ता नास्ति । एवमेव नित्योऽपि ज्ञो ज्ञेयज्ञानहीनो न स्यादित्याह ॥ न हीति । ननु यावदन्यान्यसापेक्षनिरूपणं ज्ञातृज्ञेयादिवत्सर्वमवस्तुभूतं भवतीत्यत आह ॥ किञ्चेति । न तावत्सर्वस्य लोपे किञ्चित्प्रमाणमस्तीत्याह । न च सर्वाभाववचनम् । तथा हि । किं सर्वाभावशब्देन सर्वाभाववचनतदर्थौ गृहीत्वाऽनयोर्मिथ्यात्वमङ्गीक्रियते न वा । अङ्गीक्रियते चेत्सर्वाभावस्याभावत्वं स्यात् । नाङ्गीक्रियते चेत्सर्वस्यापि मिथ्यात्वं नाङ्गीक्रियतामविशेषात् । अनयैव रीत्या नेह नानास्ति किञ्चनेति वाक्यस्यापि सर्वनिषेधपरत्वे व्याहतिः स्यात् । न ह्यनुपपन्नार्थे श्रुतिरपि प्रमाणम् । श्रुत्युपपत्त्योः श्रुतिरुत्सर्गतो बलीयसी । सावकाशश्रुतेरनन्यगतिकोपपत्तिरपि बलीयसी । उत्सर्गत एव ह्युपक्रमोपसंहारादीनामुत्तरोत्तरप्राबल्यम् । श्रुतिलिङ्गवाक्यादीनां पूर्वपूर्वप्राबल्यं च । एवं हि ब्रह्मतर्के निर्णीतम् । अतः प्रमाणान्तराविरुद्धार्थे भगवतः स्वगतनानात्वाभावलक्षणे सम्भवति नेह नानेति वाक्यस्य न सर्वाभावार्थत्वेन युज्यते । प्रत्यक्षेणोपपत्त्या बहुभिरागमान्तरैश्च सर्वस्य सत्यत्वग्राहकैर्विरोधादसत्यत्वप्रतिपादनस्य प्रयोजनाभावाद्यस्मिन्पञ्चपञ्चजनाकाशश्च प्रतिष्ठित इत्युप-

क्रमादितात्पर्यलिङ्गैश्च विरोधाच्च । न हि सर्ववाक्येष्वापाततः प्रतीत एवार्थः स्वीकर्तुं शक्यते । यस्त्वेवं व्यवस्थापितेषु नेह नानेति वाक्येषु स्वापेक्षितार्थस्याभावादमुख्यार्थत्वं शङ्कते । स तु ब्रह्मणः सर्वज्ञत्वादिगुणप्रतिपादकवाक्यानां निर्निमित्तमेव मुख्यार्थत्वं निवारयन्निर्लज्ज उपेक्षणीय एव । अतः सर्वज्ञत्वादिगुणपूर्णं निर्दोषमित्येव ब्रह्माङ्गीकार्यमित्याह ॥ अत इति । न च सर्वस्याप्यभावात्कथं सर्वज्ञत्वं ब्रह्मण इति वाच्यम् । उक्तरीत्या सर्वस्य निषेद्धुमशक्यत्वात् । यच्चतुर्मुखादिकल्पितजीवानामनादितो विचित्रस्वभावत्वं साधितं प्राक् तदप्यङ्गीकार्यमेव । मुक्तानां तारतम्यं प्रमाणैः प्राक् साधितमप्यातिशयेन दृढीकर्तुं पुनः साधयति ॥ ज्ञानिन इति । येषां ब्रह्मज्ञानमुत्पन्नं तेषां मोक्षस्तावदस्त्येव । तरति शोकमात्मविदिति श्रुतेर्ज्ञानिनामपि शुभानुमानेष्वधिकाधिकप्रवृत्त्यन्यथाऽनुपपत्त्या मोक्षतारतम्यं निश्चीयते । न ह्यफलेषु बुद्धिमतः प्रवृत्तिर्घटत इत्यर्थः । ननु ज्ञानिनां शुभे प्रवृत्तिः प्रयोजनमनुद्दिश्यैव लीलयेशप्रवृत्तिवद्युज्यतामित्यत आह ॥ कृच्छ्रेणेति । ननु ज्ञानिनां क्लेशतोऽपि शुभानुमानादिकमुद्दिश्यैव प्रयोजनं पूर्ववासनावशाद्युज्यतामित्याशङ्क्य परिहरति ॥ तादृशोऽपीति । न चेति । विहितातिक्रमदोषभीत्या शुभस्यैव पुनः पुनराचरणं ज्ञानिनः फलाभिसन्धिरहितत्वेन निष्फलं चेदज्ञस्यापि तथैव स्यादविशेषात् । अब्रह्मज्ञस्य कृतस्य ज्योतिष्टोमादेः फलवत्त्वे स्वर्गकामो यजेतेत्यादिवाक्यं प्रमाणमस्ति चेत् । ब्रह्मज्ञानकृतस्यापि फलवत्त्वे सन्त्येव वाक्यानि स्मृत्यादिगतानि । तान्युदाहरति ॥ निष्कामामित्यादिना । यदि ह वाव अप्यनेवं विन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एव । आत्मानमेव लोकमुपासीत । स य आत्मानमेव

लोकमुपास्ते न हास्यकर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीत्यादिश्रुतिवाक्यैः परमात्मविदाऽनुष्ठितकर्मणः फलमक्षयमुच्यते। अक्षयफलं च मुक्त्यातिशय एव न स्वर्गाद्यतिशये। एवमेवामुत्र पुण्यजितो लोकः क्षीयत इत्यादिश्रुत्या तस्यानित्यत्वप्रतिपादनात्। अतो ज्ञानिभिः परमात्मानमपरोक्षीकर्तृभिरनुष्ठितकर्मतारतम्यान्मुक्तिफलतारतम्यमपि सिध्यत्येवेत्यर्थः। न च वाच्यं स य आत्मानमेवेत्यनया श्रुत्या परमात्माश्रितत्वेन कृतं कर्म फलतोऽक्षयत्वेनोच्यत इति। परमात्मापरोक्षज्ञानरहितसाधनत्वेऽक्षयफलत्वासम्भवादनेवं विन्महत्पुण्यं करोति तद्धास्यान्ततः क्षीयत एवेति श्रुतेः। परमात्मापरोक्षं वेदनं जनयत्तद्द्वारा कर्मक्षयफलत्वेनोच्यत इत्यङ्गीकारेऽपि मुक्तितारतम्यं सिध्यत्येव। कर्म तारतम्यायत्तज्ञानतारतम्यबलादेव ब्रह्मवेदनोत्तरकालकृतकर्मतारतम्यान्मोक्षतारतम्यं तु सुतरामपरिहार्यमेव। न च विदुषः कर्माधिकारो नास्तीति वाच्यम्। अथातो विष्णो विदुषा चिदध्यस्तोमो यज्ञदश्च हविष्मतेति विदुषोऽपि विष्णुयज्ञस्तुत्यादेरध्यत्वसाध्यत्वश्रवणाविरोधात्। न च विदुषो विहितं कर्म ज्ञानसिद्ध्यर्थं पूर्वार्जितं सुकृतैरेव ज्ञानस्योत्पन्नत्वात्। नापि भोगार्थमप्रारब्धकार्यत्वात्। अतः परिशेषान्मोक्षातिशयार्थमेव। अन्यथा ज्ञानिनो विहितकर्मणो व्यर्थं स्यात्। न च नित्यस्यापि कर्मणः सार्थकत्वे काम्यनित्ययोर्विभागो न स्यादिति वाच्यम्। फलसङ्कल्पासङ्कल्पभेदेन विभागोपपत्तेः। अतः फलम सङ्कल्प्य क्रियमाणं नित्यं न तु निष्फलम्। न हि फलमसङ्कल्प्य क्रियमाणं निष्फलमेवेति नियमो दृश्यते। न हि फलमयाचित्वा सेवाकारिणे कृतज्ञः स्वामी फलं प्रयच्छति किन्त्वर्थयाचकाय सेवकाय यावद्ददाति ततोऽधिकं

ददात्येव । एवं स्वकर्मभिराराधयतां ज्ञानिनां ये मोक्षातिशयं प्रार्थयन्ते तेभ्यो यावत्प्रार्थितं विष्णुर्ददाति ततोऽधिकमेवासौ स्वानुग्रहं भक्त्यादिकं विनाऽन्यदयाचमानेभ्यो ददातीति युक्तमेवायाचकत्वम् । अन्यथा याचकादयाचकस्य फलविशेषं ज्ञात्वैव हि विष्णुमाराध्य न याचन्ते महान्तः । अतो ह्युत्तमानामनादितः कृतैः काम्येतरैः सुकृतैरतिबहुभिर्ब्रह्मापरोक्षवैफल्यं ततोऽनन्तरकृतैर्मोक्षसुखवैफल्यं च सिद्ध्यत्येव । अत एव हि श्रुतिरविद्वत्कर्मणः क्षयिष्णुफलमुक्त्वा विद्वत्कर्मणोऽक्षयफलत्वं श्रावयति न हास्यकर्म क्षीयत इति । तदेतदाह ॥ न चात्रेत्यादिना । ननु जन्मान्तरसहस्रेषु तपोदानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते । भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपेत्यादिवचनाद्भक्तेरेवानन्तजन्मार्जितसुकृतैः साध्यत्वं मुक्तिसाधनं च प्रतीयते । तत्कथं तैर्ज्ञानस्य साध्यत्वं मुक्तेः साधनत्वं चोच्यत इत्यत आह ॥ ज्ञानायेति । तथा च तमेवं विद्वानमृत इह भवतीत्यादौ यज्ज्ञानं मुक्तिसाधनत्वेनोच्यते न तत्परोक्षम् । किन्तु क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर इत्यादिश्रुतिबलादपरोक्षमेवाङ्गीक्रियते । तथा स य आत्मानमेव लोकमुपास्ते न हास्यकर्म क्षीयत इत्यादिश्रुतिस्मृतिबलादपरोक्षज्ञानमपि भक्त्यात्मकत्वमेवाङ्गीकर्तव्यम् । उपास्तिशब्दस्य भक्तौ प्रसिद्धत्वाद्भक्तिश्च मुख्या । प्रेमैव भजनं भक्तिरित्याद्या द्वितीया स्मृतिरूपिणी तृतीया स्मृतिरूपा च चतुर्थी प्रेमलक्षणेत्यादिवचनात् । अतः प्रेमात्मकं यद्विष्णुतत्त्वापरोक्षज्ञानं तदेवाभिप्रेत्य बाहुल्येन ज्ञानमेवापवर्गसाधनमिति वदन्ति श्रुतिस्मृतयः। क्वचिद्भक्तिरूपत एव च विविच्यापवर्गसाधनतया वदन्ति । अतश्च पुत्रादिष्विव यद्विष्णोः प्रेम तन्न मुक्तिसा-

धनम् । यच्च तस्मिन्द्वेषात्मकं दर्शनं तदपि न मुक्तिसाधनं किन्तु निरतिशयप्रेमात्मकं यद्दिव्यदर्शनं तदेव मुक्तिसाधनमित्यर्थः । यत्कृष्णादिविग्रहे विष्णौ द्वेषात्मकं दर्शनमासुरप्रकृतीनां तन्न मुक्तिसाधनं बहुश्रुत्यादिविरोधादित्याह ॥ न हीति । तत्र तावत्पैङ्गिश्रुतिविरोधमाह ॥ चेतनस्येति । पैङ्गिश्रुतिगतस्य मुक्ताविति पदस्यार्थमाह ॥ मुक्ताविति । न च क्वचित्पुराणवाक्येन मुक्तिसाधनतयोक्तत्वाद्द्वेषोऽपि विष्णौ भक्तिवन्मुक्तिसाधनं भवत्विति वाच्यम् । महातात्पर्यविरोधापत्तेः । तथा हि । भक्तिरेव विष्णोः प्रसादद्वारा मुक्तिसाधिकेति भक्त्यर्थं विष्णोर्गुणानेव श्रुतिपुराणादयो बोधयन्ति द्वेषस्तु विष्णोरप्रीतिद्वाराऽनर्थसाधनत्वान्न केनचिद्विधातुं शक्यते । फलवदर्थे हि तात्पर्यमुक्तं न त्वनर्थसाधने वाक्यस्य । तथा सति तथाऽऽराधनेऽब्रह्मत्वप्रसङ्गात् । यदि विष्णावप्रीतिरपि मुक्तिसाधनतया पुराणेनाभिप्रेता स्यात् । न तत्प्रतीत्यर्था विष्णोर्द्वेषोक्तिः स्यात् । दोषदुष्टतया ज्ञानं ह्यप्रियं भवति । न च कुत्रचिच्छ्रुतिपुराणादौ द्वेषोत्पत्त्यर्था विष्णुद्वेषोक्तिर्दृश्यते । तदाह ॥ द्वेष इति । ननु तस्मिन्वैरानुबन्धेन युञ्ज्यादिति भागवतपुराणवाक्यं द्वेषेणापि विष्णोः स्मरणं विदधाति । तत्कथं द्वेषोऽनर्थसाधनमित्यत आह ॥ स्मर्तव्य इति । यथा विषं भुङ्क्ष्वेति वाक्यं न हि विषभोजनकर्तव्यतापरं किन्तु विषभोजनमपि वरं न त्वस्याप्रशस्तान्नस्य भोजनमित्यप्रशस्तान्नभोजननिवृत्तिपरमेव । तथा वैरानुबन्धेन युञ्ज्यादित्येतदपि वाक्यं द्वेषेणापि विष्णोः स्मरणं वरं न तु विस्मरणमिति विस्मरणनिवृत्तिपरमेव न तु द्वेषेण स्मरणविधायकम् । यो विष्णुं सततं द्वेष्टि तं विन्द्यान्मारतासुरमित्यादिबहुवाक्यनिषिद्धत्वाद्द्वेषस्य । अतो दुर्जनकृतद्वेषेण न किञ्चिदनिष्टमुत्पद्यते विष्णो-

रिति निरानिष्टत्वादिगुणानेव पुराणकृद्द्वेषकथनव्याजेन प्रतिपादितवान्भगवतः । यद्यसज्जनकृतद्वेषेणानिष्टं किञ्चिद्भवेद्विष्णोस्तर्ह्यसौ तद्द्वेषोत्पत्तिं निवारयदेव । न हि स्वतन्त्रस्यात्मानिष्टनिवारकत्वं सम्भवति । अतो यदेतत्पुराणवाक्यं कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः । आविश्य तदघं हित्वा बहवस्तद्गतिं गता इति तत्पूर्वापरवाक्यैः श्रुतिभिश्च पञ्चरात्रागमैश्च द्वेषनिषेधकैर्विरोधान्न विष्णुद्वेषस्य मुक्तिसाधनत्वे प्रमाणम् । उक्तं हि ।तमोद्वेषेण संयान्तीत्यादिषाड्गुण्यवचनेन द्वेषस्य विष्णोरप्रसादद्वारा नित्यनिरयसाधनत्वम् । अतो द्वेषेण मुक्तिवचनं महातात्पर्यानुरोधेन व्याख्येयम् । अन्यथा भक्त्यैकलभ्यविष्णुप्रसादैकसाध्यमोक्षलाभाख्यमहावाक्यार्थविरोधेनाप्रामाण्यं स्यात् । यो महावाक्यार्थः सर्वैरपि वाक्यैः सम्भूय वक्तव्यः । न हि तस्य केनचित्सन्दिह्यमानार्थवचनपीडा युक्ता । कामाद्द्वेषादित्येतद्वचनं त्वेवं योजनीयम् । ये ये कामेन द्वेषेण भयेन वा तत्तद्गतिं गताः । तत्ते तथा तद्भक्त्या सहितेनैव तेन तेनेश्वरे मन आवेश्य द्वेषादिकृतमघं च यथावद्भक्त्यैव केवलया हित्वा तेनेश्वरेण यद्गम्यते शाश्वतं स्थानं तदेव गता इति । अनेन चैद्यादीनाम ,रावेशकृतद्वेषादिदोषनाशो मोक्षप्राप्तिश्च स्वाभाविकभक्त्यैवेत्युक्तं भवति । अतोऽत्यद्भुतं ह्येतद्दुर्लभैकान्तिनामपि । वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्धिप इत्यादिप्रश्नस्यात्र मातृष्वस्रेयो वश्चैद्यो दन्तवक्त्रश्च पाण्डव पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतावित्यादिपरिहारकथनाच्चैद्यादेर्भक्त्यैव मोक्ष इति ज्ञायते । अन्यथा विष्णुद्वेषिणोश्चैद्यदन्तवक्त्रयोः कथं मोक्ष इत्येतच्चोद्यपरिहारत्वेन पूर्वपार्षदत्वकथनमयुक्तं स्यात् । इदं हि विष्णोर्भक्तवात्सल्यं यदन्यावेशाद्द्वेषवतोऽपि पूर्वभक्तिमपेक्ष्य मोक्षदानम् । अतो भक्त्यैव विशिष्टज्ञानं मुक्तिसाधनमित्यर्थः ।

भक्त्या विना ज्ञानमपि न लभ्यते किमु मोक्ष इत्यत्र श्रुत्यादिप्रमाणमाह ॥ यस्येत्यादिना । बृहत्संहितोक्तयुक्तितोऽपि भक्त्यैव मोक्षो न द्वेषेणेत्येतत्सिद्धमित्याह ॥ न चेति । राजवत्सेवया प्रसन्नोऽपि विष्णुः पुरुषार्थं ददातीत्येतदेवाङ्गीकार्यम् । लोकानुकूलत्वाद्द्वेषेण ददातीत्येतल्लोकाननुकूलत्वान्नाङ्गीकार्यं चेत्सर्वज्ञत्वादिगुणानामशनायादिदोषाभावानामपि लोकाननुकूलत्वाविशेषाद्विष्णावनङ्गीकार्यं स्यादिति चेन्नैवम् । तेषां तस्मिन्नेव वेदविहितत्वानङ्गीकर्तव्यत्वात् । न च तद्वत्समर्थमपि दृष्टाननुसार्येव विष्णावङ्गीकर्तव्यमिति नियामकमस्ति । गुणा दोषाभावश्च वेदानुक्ता अपि महातात्पर्यशक्त्यादिसिद्धत्वाङ्गीकर्तव्या एव किमु वेदोक्ताः । अशेषगुणपूर्णत्वेन निःशेषदोषवर्जितत्वेन च विष्णोर्ज्ञानं हि तदतिशयितप्रीतिद्वारा परमपुरुषार्थसाधनत्वेन वेदैरभिमतामित्यर्थः । विष्णुभक्तिवद्विष्णुभक्तभक्तिरपि कर्तव्या । ये नमस्यन्ति गोविन्दं तेषामपि नमो नम इत्यादिवचनाद्विष्णुभक्तबुद्ध्या क्रियमाणत्वेनैषा विष्णुभक्तिरुच्यते । देवादिवल्लोकतोऽप्येषा कर्तव्येति ज्ञायते । यो यद्भक्तः स तस्य भक्तेषु भक्तो विमुखेषु विमुख इति दृश्यमानत्वात् । तथा हि श्रुतिः । यावन्तः खलु वै राजानमनुयान्ति तेभ्यः सर्वेभ्य आतिथ्यं क्रियत इत्येवंजातीयका । यस्तु स्वामिभक्तो न तद्भक्तेषु प्रीतिमान्नापि तद्विमुखेषु विमुखो नासौ सम्यग्भक्तः किन्तु सदोषैव तस्य भक्तिः । विष्णुभक्तेषु विष्णुलक्ष्मीविरिञ्च्यादिषु विष्ण्वनुग्रहतारतम्यानुसारात्तारतम्येनैव भक्तिः कार्यदृष्टानुगुण्यात् । तथाविधमहिमा विष्णुप्रसादसाधिका । दृश्यते हि देवदत्तस्य प्रीतितारतम्यमनुसृत्य पुत्रादिषु तारतम्यभावेनादरकरणात्तत्प्रीतिविशेषः । अत एव लक्ष्म्यादीनां तारतम्यपरिज्ञानमपि विष्णुप्रीत्यतिशयजननद्वारा पुरुषार्थसाधनं भवति । तदेतदाह ॥ तारतम्येनेति ।

अयमर्थः षाड्गुण्यवचनस्यापि सिद्ध इत्याह ॥ लक्ष्मीत्यादिना । निरतिशयभक्तिर्हि हरौ हरिभक्तेषु मुख्यानुक्रमेण भक्तिर्ह-रिस्मृत्यादिकं च पूर्वपूर्वप्राधान्यानुक्रमेण मुक्तिसाधनमित्येतत्प्रवृत्तपञ्चरात्रवचनेनापि साधयति ॥ हरिभक्तिरित्यादिना । सिंहावलोकनन्यायेन हरिद्वेषस्यानर्थसाधनस्य लक्ष्म्यादिषु मुख्यानुक्रमेण भक्तेर्हरिप्रीतिकारणत्वं तदनुमानेन साधयति ॥ हरिरित्यादिना । हरिद्वेषो न श्रेयःसाधनं सत्पुरुषद्वेषत्वाद्गुरुद्वेषवत् । न हि गुरुद्वेषस्य श्रेयःसाधनत्वं केनचिच्छक्यते वक्तुम् । लक्ष्म्यादिषु मुख्यानुक्रमेणैव या भक्तिः सा हरिप्रीतिकारणं हरिप्रीतिविषयभक्तित्वात् । याऽतिप्रियविषयभक्तिर्या-वत्प्रीतिकारणं पितुरिव पुत्रादिभक्तिः । हरिभक्तिवच्छास्त्रविहितभक्तित्वाद्वा हरिप्रीतिकारणत्वं साधनीयम् । लक्ष्म्यादिषु मुख्यानुक्रमोपेतभक्तिरित्यर्थः । एवं तावच्छमदमाद्युपेतः स्यादित्यादीनाम् । न चाधिकारिकमपि पतनानुमानादित्या-दीनां च सूत्राणां तात्पर्यं प्रपञ्च्य स्वामिनः फलश्रुतेरित्यात्रेय इत्यादिसूत्राणां तात्पर्यं प्रपञ्चयति ॥ ज्ञानेत्यादिना । यदेतज्ज्ञानकर्मादिकं मोक्षतदतिशयमुख्यसाधनत्वेन विचारितं प्रसक्तस्य मनुष्यादिस्थितस्य मुख्यफलं बुद्ध्याद्यधिष्ठातॄणां ब्रह्मादीनां तारतम्येन ज्ञानाद्युत्पत्तौ प्रयोजकत्वं तारतम्यात्तेषामित्यर्थः । न च मनुष्यादिगतस्याशुभस्याप्युत्पत्तौ प्रयोजक-त्वात्तदशुभफलमपि ब्रह्मादीनां स्यादिति वाच्यम् । अशुभप्रतिबन्धसमर्थत्वाच्छुभादिकं भवद्भिः प्रवर्त्यतामिति हरिणा ज्ञापितत्वात् । हर्याज्ञाकरणेन शुभमेव भवेद्ब्रह्मादीनां न त्वशुभम् । यद्गु किञ्चेमाः प्रजा इत्यादिश्रुतिबलादित्यर्थः । युक्त्यंतराणि बृहत्तन्त्राद्युदाहृतान्यस्मिन्नर्थे दर्शयति ॥ युक्तय इति । यतो मनुष्यादीनां देहेषु प्रविश्य तच्चित्तादिप्रेरणासि-

द्भिर्भगवदुपासनस्य फलविशेषरूपतो न तथाऽशुभावाप्तिर्देवानाम् । न हि सद्धर्मफलोपभोगेन पापं जन्यते । न च वासुदेवाज्ञया रागद्वेषौ परित्यज्य पूर्वकर्मानुसारेण प्राणिनः प्रेरयतामशुभाप्तिः सम्भवति । किन्तु हर्याज्ञाविहितं हर्याराधनत्वेन कुर्वतां देवानां शुभमेव भवेत् । अतो देवा अवरदेवमारभ्य चतुर्मुखपर्यन्तमुत्तरोत्तराधिक्येन सर्वप्राणिगतयोर्धर्मज्ञानयोः फलं प्राप्नुवन्ति । अवरदेवानां धर्मज्ञानयोः प्रेरयतामुत्तमदेवानां तद्धर्मज्ञानफलमाधिक्येन भवति ।सर्वदेवान्मनुष्यादींश्च धर्मज्ञानयोः प्रवृत्तयोर्हिरण्यगर्भस्य सर्वेभ्योऽप्याधिक्येन धर्मादिशुभफललाभः । मनुष्यादिभिरनुष्ठितयोरपि धर्मज्ञानयोर्मुख्यफलं देवानामेव द्रष्टव्यम् । स्वातन्त्र्यविज्ञानप्रयत्नाधिक्यात् । चितचित्तादि ज्ञानधर्मयोरुत्पत्तिसाधनम् । तत्स्वामित्वं धर्मब्रह्मविषयोः । ज्ञानं प्रयत्नश्च देवानामेव प्रसादायत्ते । हिरण्यगर्भस्य तु द्रव्यस्वातन्त्र्यादीनामत्यन्ताधिक्याद्देवैरनुष्ठितयोर्धर्मज्ञानयोः फलमत्यन्ताधिक्येन भवेत् । तथा हि । मनुष्यादीनां यस्य द्रव्यस्य स्वातन्त्र्यं ज्ञानं प्रयत्नश्च देवतायतनादिनिर्माणे आधिक्येन दृश्यते तस्य तस्य फलमधिकं भवतीति लोकसिद्धमित्यर्थः । यथा मनुष्यादिभिः कृतशुभफलं ब्रह्मादीनां तारतम्येन भवतीत्येतत्प्रकाशिकावचनेन दर्शयति ॥ अशुभेति । शुभाशुभयोः प्रयोजकत्वप्रयुक्तं महाफलं देवासुराणां कर्तृत्वप्रयुक्तं तु फलं मनुष्यादीनामप्यस्ति । अतः शुभाशुभयुक्तत्वादेव मनुष्योत्तमादयो निरयाद्युपभोगिनः । तत्र देवास्तु मनुष्याद्युपभोगिनो निरयभोगिनः । असुरास्तु स्वर्गादेरिवान्धन्तमसश्च भोक्तार इत्येतत्तत्त्वविवेकवचनेन दर्शयति ॥ यद्यपीति ॥ ७ ॥ ज्ञानस्योपदेष्टॄनाचार्यानारभ्याब्रह्माणं फलस्योत्तरोत्तराधिक्यं गुरुवृत्तवचनेन दर्शयति ॥ ज्ञानेति । गौरवज्ञानस्यापि प्रतिगृहीतुः सकाशाद्दातुरेव फलाधिक्यं

युक्तम् । न ह्येकां गां दत्तवतः फलमप्येकैव गौः । एतदेव य इममित्यादिभगवद्वाक्येनार्थात्साधितम् । तदेतदाह ॥ युक्तमिति । न च शिष्यसकाशादुपदेष्टृमोक्षसुखाधिक्येन बहुष्वुपदेशेनातिबहुमोक्षसुखलाभात्सद्भ्योऽसद्भ्यश्च जनेभ्यो ब्रह्मोपदेष्टव्यमिति वाच्यम् । अपात्रोपदेशस्योषरोप्तबीजवन्निष्फलत्वात् । तथा हि श्रुतिः । विद्या ह वै ब्राह्मणमाजगाम । गोपाय मां शेवधिष्ठेऽहमस्मि । अनार्यकायानृजवेऽशठाय न मां ब्रूयाः । ऋजवे ब्रूहि नित्यमिति । यस्य सामर्थ्यमस्मिन्पादे वक्तुमारब्धं तज्ज्ञानं मुक्तिवदैहिकमेव । यथा मुक्तिरसति प्रारब्धकार्ये प्रतिबन्धकमपहायैव लभ्यते सति तु जन्मान्तरे लभ्यते जातोऽपि ज्ञाने । एवं ज्ञानमप्यसति बन्ध इहैव लभ्यते न तु स्वर्गादि मृत्वैव लभ्यम् । सति प्रतिबन्धके कर्मणि श्रवणादिसम्पत्त्या सत्यामपि ज्ञानं जन्मान्तरे लभ्यते । तथा हि श्रुतिः । श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्येहैव दृष्टिं परमस्य विन्देत् । यद्यारब्धं कर्म निर्बन्धकं स्यात्प्रेत्यैव पश्येदिति । तदेतदाह ॥ एवमेवेत्यादिना । अनेनानाविष्कुर्वन्नन्वयात् । ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् । एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेरिति सूत्रत्रयं व्याख्यातं भवति ॥९-१०-११॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां तृतीयाध्यायस्य चतुर्थः पादः ॥ ३-४ ॥ समाप्तोऽयं तृतीयोऽध्यायः ॥ ३ ॥ श्रीकृष्णार्पणमस्तु ॥ * ॥ * ॥

॥ अयं ग्रंथः खंडो रामचंद्र भिसे इत्यनेन "कर्नाटक प्रिंटिंग वर्क्स, धारवाड" मुद्रणालये मुद्रितः ।

सवणूरकुलोत्पन्नराघवेंद्रसूनुना गोविंदेन धारवाडग्रामे प्रकाशितश्च ॥

॥ इति श्रीमदनुव्याख्याटिप्पणी सन्न्यायरत्नावली समाप्ता ॥

॥ तृतीयाध्यायः ॥

॥ अथ श्रीमदनुव्याख्यानटिप्पणी सन्न्यायरत्नावली प्रारभ्यते ॥

॥ चतुर्थाध्यायः ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥ यस्य समन्वयाविरोधाध्यायद्वयसिद्धस्य विष्णोः प्राप्तिसाधनविचारः कृतः साधनाध्यायेन तत्प्राप्तिलक्षणं फलमस्मिन्नध्याये निरूप्यते । तत्र प्रथमं कतिभिश्चिदधिकरणैः साधनविचारशेषोऽनुवर्तिष्यते । अशेषसाधनानां गताध्याये विचारितेऽपि विशेषतो यदत्यावश्यकमपरोक्षज्ञानसाधनं येन विना मोक्षमात्रमपि न सिध्यति तदत्र विचार्यते । बाहुल्येन फलविचारत्वादस्याध्यायस्य फलाध्यायत्वं न विरुध्यते । तत्र तावदिदं विचार्यते । परमात्मनोऽपरोक्षज्ञानाय प्राग्वर्णितं यच्छ्रवणादि तत्किं सकृदनुष्ठेयमुतासकृदिति । किं तावद्युक्तं सकृदिति ब्रूमः । कुतः । श्रोतव्यो मंतव्य इत्यादिविधिसिद्धस्तावता चरितार्थत्वात् । यथा फलाय सकृदनुष्ठीयते । ज्योतिष्टोमवद्विधेस्तावता चरितार्थत्वात् । अत्रोच्यते । स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्याद्यसकृदुपदेशाच्छ्रवणादेरावृत्तिः कर्तव्यैव । यदि सकृच्छ्रवणादिना दृश्यते परमात्मा तर्हि तस्यासकृदुपदेशोऽनर्थकः स्यात् । न च श्रवणादेः सकृदनुष्ठानेन तद्विधिः सार्थक इति वाच्यं । सकृच्छ्रवणादिनाऽपरोक्षज्ञानानुदयात् । दृष्टं हि फलमपरोक्षज्ञानं । अतः परमात्मापरोक्षज्ञानपर्यंतं श्रवणादेरनुष्ठानेन तद्विधेः सार्थक्यं नान्यथा । यथा व्रीहीनवहंतीत्ययं विधिर्न सकृद्व्रीहीणामवघातेन सार्थकः किं तु तेषां तुषकणविमोक्षपर्यंतावघातेनैव सार्थकः । अवघातस्य दृष्टफलत्वात् । अपि च । ध्यानादिकं ह्यपरोक्षज्ञानसाधनं । ध्यानशब्दश्च न सकृत्स्मरणे प्रसिद्धः किंतु सजातीयप्रत्ययप्रवाहवाचित्वेन प्रसिद्धः । पिता प्रोषितपुत्रं ध्यायति चिंतयतीत्यादौ । विष्णुध्यानादेरावृत्तिर्बृहत्तंत्रे चोक्ता । नित्यशः श्रवणं चैव मननं ध्यानमेव च ॥

कर्तव्यमेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिरिति । तदेतदाह ॥ समन्वयेत्यादिना ॥ अनेनावृत्तिरसकृदुपदेशादिति सूत्रं व्याख्यातं भवति ॥ लिंगाच्चेति सूत्रमनूद्य सत्तत्त्ववचनेनैव व्याचष्टे ॥ लिंगादित्यादिना । इतोऽपि विष्णोः श्रवणादिकमावर्तयितव्यं । उग्रतपः प्रभृतिभिर्महद्भिरावृत्त्यमानत्वात् । तथा हि । लिंगाह्लातव्यनामर्जुरेकोनशतब्रह्मस्वती- तेषु ब्रह्मा भविष्यति । तस्मादुग्रतपा नाम रुद्रपदयोग्य एकोनशतब्रह्ममहाकल्पेभ्यः पूर्वं महाकल्पः स्यादित्यारभ्य ब्राह्ममानपरिगणितपंचसप्ततिसंवत्सरकालं विष्णुगुणान् शुश्राव । ब्राह्ममानपरिगणितपंचविंशतिसंवत्सरकालं तानेव दध्यावपश्यच्च । तथा सुनंदादयोऽपींद्रादिपदयोग्याः स्वस्वशक्त्यनुसारानुष्ठितश्रवणाद्यावृत्त्यैव विष्णुमपश्यन्नित्यर्थः । यदत्यावश्यकसाधनमावर्तयितव्यं तत्प्रदर्शयन् ॥ आत्मेति तूपगच्छंति ग्राहयंति चेति व्याचष्टे ॥ आत्मेत्या- दिना । तत्तावदात्मशब्दार्थो न विष्णोरन्य आशंकनीयः । विष्णावेवात्मशब्दस्य ॥ गौणश्चेन्नात्मशब्दादित्यादि- सूत्रेण पूर्वमेव प्रतिपादितत्वात् । पैंगिश्रुत्यादिभिश्चैतद्दृढयति ॥ आत्मब्रह्मेत्यादिना । अतश्चायमर्थः सूत्रस्य भवति। यो जगदुपास्यः स आत्मा विष्णुरिति ज्ञातव्यः । एवं हि संत उपगच्छंति उपासते । ग्राहयंति उपदिशंति चेति आत्मशब्दश्च सर्वमादत्त इत्यात्मेति स्वामित्वविशिष्टं विष्णुमभिदधाति । स्वामी हि सर्वमात्मीयतयाऽऽदत्ते । अतः स्वस्वामित्वेन विष्णुरुपासितव्य इत्युक्तं भवति । अस्मिन्नर्थे सत्तत्त्ववचनं षाड्गुण्यवचनं च दर्शयति ॥ स्वामीत्यादिना। तथा च श्रुतिः । पतिं विश्वस्यात्मेश्वरमिति । ननु नाम ब्रह्मेत्युपास्त इत्यादिवचनं नामादिप्रतीकं सर्वं विष्णुत्वेनोपास्यं

न तु सपतित्वेन विष्णुरुपास्य इत्याशंकां परिहरति ॥ न प्रतिके न हि स इत्येतत्सूत्रं व्याचष्टे ॥ प्रतीकेत्यादिना । प्रतीकस्य विष्णुत्वाभावात् तस्मिन्विष्णुभावना न कर्तव्या । योऽन्यथासंतमित्यादिवचनैरयथार्थस्य ध्यानस्यानर्थसाधनत्वप्रतिपादनात् । हरौ प्रतीकबुद्धिवत्प्रतीकेऽपि हरिबुद्धिरन्याय्येत्येतदुच्यते ॥ योऽन्यादित्यादिना । न हि विप्रे चंडालबुद्धिवच्चंडालेऽपि विप्रबुद्धेरकरणीयत्वे विशेषः कश्चिद्दृश्यते । न चानर्थसाधनत्वमहौ स्रग्बुद्धिवत् स्रज्यप्यहिबुद्धेः । अतोऽतिहीने प्रतीकेऽत्युत्तमविष्णुभावनां कुर्वतो विष्णूत्कर्षापहारोपदोषेणातिकष्टनरकप्राप्तिर्भवत्येव । इदमेव ह्यभिप्रेत्य प्रतीके विष्णुभावना निषिद्धा भगवता ॥ न प्रतीक इति । एवं तर्हि नाम ब्रह्मेत्युपास्त इत्यादिवचनस्य कोऽर्थ इत्यपेक्षायामाह ॥ प्रतीकेति । अतो न प्रतीकाद्यभेदेन विष्णुर्ध्येयः किं तु सर्वप्रतीकस्थत्वेनैव ध्येयः । न केवलं पतित्वेन ध्येयः किंतु ब्रह्मत्वेन च ध्येय इत्यत्र काशिकावचनमाह ॥ ब्रह्मेति । अनेन ॥ ब्रह्मदृष्टिरुत्कर्षादिति सूत्रं व्याख्यातं भवति । अत्र विष्णोर्विश्वपतित्वमसहमानेनात्मेति तूपगच्छंतीत्यादिसूत्रत्रयस्य यदन्यथाव्याख्यानं कृतमहं ब्रह्मेत्युपासनमत्र विधीयत इत्यादि तद्विघटति ॥ नात्मेत्यादिना । नात्मेति सूत्रमहं ब्रह्मेत्युपासनाविधायकं । जीवब्रह्मणोर्भेदस्य प्रागेव साधितत्वात् । न चात्मशब्दोऽयमहंप्रत्ययवेद्यजीववाची । विष्ण्वेकवाचिनस्तस्य निर्निमित्तमर्थांतरे प्रवृत्त्ययोगात् । न च नारायणादिशब्दवदात्मशब्दो विष्णोरेव वाचक इति वाच्यं । द्युभ्वाद्यायतनं स्वशब्दादिति सूत्रविरोधात् । अनेन हि सूत्रेण यस्मिन्द्यौरित्यादिवाक्ये श्रूयमाणस्य विष्णुत्वे तद्वाक्यगतात्मशब्दो लिंगत्वेन जीवस्या-

त्मशब्दार्थत्व इदं निराकरणमसंभावितं स्यात् । गुणैराततत्त्ववाच्यात्मशब्दो विष्णावेव वर्तितुं योग्यो न जीव इति । यतो विष्णुनोक्तमात्मब्रह्मेत्यादिना नारायणाध्यात्मे । अतो विष्णुरेवात्मशब्दार्थः न तस्य जीवेनैक्यं । यदि तदभिप्रेतं सूत्रकृतस्तेन तर्ह्यात्मशब्दो जीवे न निवार्येत । जीवविष्णोरभेदेन विष्णाविव जीवेऽप्यात्मशब्दः किं न स्यादित्याशंक्य भेदव्यपदेशात् स्थित्यदनाभ्यां चेति सूत्राभ्यां जीवेशभेदं साधयित्वा निवारित आत्मशब्दो जीव इत्यर्थः । आरोपितभेदाभिप्रायेण जीवेन भेदोपपादनं सूत्रेषूपपद्यते चेत्क्वचिदनारोपितभेदेन भाव्यं । आरोपस्यानारोपपूर्वकत्वदर्शनात् । रजताद्यारोपे दृश्यते न ह्यनारोपितं रजतं । नगरादौ क्वचिदनारोपितरजतांगीकारे तन्न्यायेन जीवेशभेदस्यानारोपितस्य सिद्धिर्दुर्वारा तदाह ॥ व्यावहारिकेति । अपि च भेदमात्रमवस्तुभूतमिति वचनं सत्यमनृतं वा । सत्यं चेद्वचनं तदर्थभेदस्य सत्यत्वात् भेदमात्रमवस्तुभूतमित्येतद्व्याहतं स्यात् । अनृतं चेदर्थभावात् भेदो वस्तुभूतः स्यात् । परस्परविरुद्धयोरितरनिषेधस्येतराविधिनांतरीयकत्वात् । उक्तमसत्यं भवति चेत् । सत्यमित्येव सत्यं न भवति चेदनृतमित्येव न हि कस्यचित्संशयः । तदाह ॥ व्यावहारिकमिति । ननु स्वप्नस्य मिथ्यात्वेन तत्रेदं रजतं नेदं रजतमिति व्यवहृतयोरेकत्वतदभावयोरुभयोरपि मिथ्यात्वान्न परस्परविरुद्धयोरितरेतरनिषेधेऽन्यविधिसिद्धिरित्यत आह ॥ न च स्वप्न इति । स्वप्नप्रतीतयो रजततदभावयोः स्वप्नप्रतीत्वमात्रेण बाध्यत्वे स्वप्नद्रष्टुरपि बाध्यत्वं स्यात् । न च स्वप्नगजादिवद्बाध्यत्वं वक्तुं युक्तं । स्वप्नमहमन्वभवामिति स्वप्नोत्तरकालेऽपि तद्द्रष्टुरनुवर्तमानत्वात् । अतः

परस्परविरुद्धयोरुभयोरपि बाधस्य क्वचिदप्यसंभवाद्भिन्नं सर्वमसत्यमित्येतद्वचनतदर्थयोरपि भिन्नत्वेनासत्यत्वापत्त्या न जीवेशभेदसत्यत्वं निराकर्तुं शक्यते । नापीशादन्यत्रात्मशब्दो नेतुं शक्यते । अतो नाहं ब्रह्मेत्युपासनं नाप्यादित्यादिप्रतीकं ब्रह्मेत्युपासनं युज्यत इत्यर्थः । एवमात्मेति सूत्रार्थं परोक्तं विघटय्य न प्रतीके न हि स इत्येतत्सूत्रोक्तन्यायाविरोधेन ब्रह्मदृष्टिरुत्कर्षादित्येतत्सूत्रार्थं परोक्तं विघटयति ॥ न चेत्यादिना । यथाऽऽत्मनः सकाशाद्भिन्नत्वादुपासको स्वात्मतया प्रतीकं नोपास्यं । एवं ब्रह्मणः सकाशादपि भिन्नत्वाद्ब्रह्मतयाऽपि नोपास्यमेवाविशेषात् । अतोऽहंग्रहं प्रतीके निषिध्य तत्र ब्रह्मतोपास्तिमंगीकुर्वतः स्वपूर्वापरवाक्यविरोधो दुष्परिहारः । अथोच्येत । उत्कृष्टत्वाद्ब्रह्मणस्तद्दृष्टिः प्रतीके ब्रह्मव्यतिरिक्तेऽपि योग्य उत्कृष्टस्तद्दृष्टिर्ह्यपकृष्टे क्रियमाणा दृष्टा । यथा क्षत्तारि राजदृष्टिरिति । तद्वात्मदृष्टिरपि मनआदिप्रतीके क्रियेत । तस्मादचेतनादुत्कर्षादात्मनश्चेतनत्वात् । अतोऽन्यस्मिन्नन्योपासनं कथमपि न घटत इत्यभिप्रेतं न प्रतीक इति सूत्रं कुर्वतो भगवत इत्यर्थः । उत्कृष्टतया दृष्टादपकृष्टाल्लोके फलदर्शनाद्ब्रह्मतयोपासीतात्प्रतीकात् फलं भविष्यतीति चेत् । निकृष्टेन प्रतीकेनाभिन्नतया ध्यानाद्ब्रह्मणोऽनर्थोऽपि भवेदेव प्रतीकं तु मनआदिकं ब्रह्मतयोपासितमपि नार्थदं भवितुमर्हति । न ह्यचेतनं क्वचिदुत्कृष्टं संभावितं । तुष्यद्वाऽर्थं ददद्वा दृष्टं । ब्रह्मस्वरूपेण नीचवस्तु ध्यायते । ब्रह्म तु क्रुद्धं सदनिष्टं दद्यादेव लोकवत्तदाह ॥ उत्कृष्टादिति । ननु प्रतीकं ब्रह्मतयोपास्यते न पुनर्ब्रह्म प्रतीकतया । कथं ब्रह्मणः कोप इत्येतामाशंकां लोकवदित्युक्तं विघटय्य परिहरति

॥ चंडाल इत्यादिना आत्मानं स इति प्रोक्तमितिवद्ध्येव कुप्यतीति । स्वात्मानं चंडाल इति प्रोक्तं मत्वा कुप्यतीत्यर्थः । न च वाच्यं प्रतीकस्य ब्रह्मात्मकत्वात्तत्र ब्रह्मदृष्टिः क्रियते न ब्रह्मणः प्रतीकदृष्टिस्तस्य प्रतीकाद्भिन्नत्वादतः कथं ब्रह्मकोप इति । ब्रह्माभिन्नात्प्रतीकाद्ब्रह्मणो भेदासंभवात् । न हि भवति घटः स्वयुक्तघटेनायुक्त इति । अतः प्रतीकस्य ब्रह्मात्मतया ध्यानेऽपि प्रतीकात्मता ध्यातेति तत्कोपो दुष्परिहरः । तदाह ॥ ध्यातइति । न च वाच्यं यथा चंडालादौ राजभावनां कुर्वन्नपि कश्चिद्राजा परिज्ञातो न राज्ञा दंड्यते । एवं ब्रह्मदृष्टिः प्रतीके कुर्वन्नपि कश्चिद्ब्रह्मा परिज्ञातो ब्रह्मणा न दंड्यतामिति । सर्वज्ञत्वाद्ब्रह्मणस्तदज्ञानासंभवादित्याह ॥ न चेति । उपसंहरति ॥ तस्मादिति । साधनदोषविचारं समाप्येतःपरं फलं निरूप्यते । फलं च कर्मक्षयादि भगवत्प्राप्त्यंतं ज्ञानस्य । तत्र तावत्कर्मक्षयं निरूपयति ॥ तथेत्यादिना । यद्यथा पुष्करपलाश आपो न श्लिष्यत एवमेवंविदि पापं कर्म न श्लिष्यते । तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हैवास्य सर्वे पाप्मनः प्रदूयंत इत्यादिबलाद्ब्रह्मज्ञानानंतरं कृतस्य दुष्कर्मणोऽश्लेषः । पूर्वकृतस्यानारब्धकार्यस्य विनाशश्च भवेत् । तथा दैत्यादीनां विष्णावुत्कटद्वेषोत्पत्तेरनंतरं कृतस्य सुकर्मणोऽश्लेषः । पूर्वकृतस्यानारब्धकार्यस्य विनाशश्च । तथा चोक्तमाग्नेये । यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः । एवं सुकर्मणश्चापि पतंतस्तमसि ध्रुवमिति ॥ अनेन तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् इतरस्याप्येवमसंश्लेषः पाते त्विति सूत्रद्वयं व्याख्यातं भवति । ज्ञानिना कृतं दुष्कर्मैव तेन न श्लिष्यते न तु विष्ण्वर्पण-

बुध्याऽनुष्ठितं सुकर्मेत्येतदर्थप्रतिपादकं सूत्रं । यदेव विद्ययेति हीति तदतीताध्यायगतैरधिकोपदेशादित्यादिसूत्रैरुक्तार्थत्वेन व्यर्थमित्याशंक्य परिहरति ॥ यदेवेति । तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापमिति वचनाद्ज्ञानिनो दुष्कृतवत्सुकृतमप्यशेषमेव नश्यत्विति वाच्यं । तत्र साधुकृत्याशब्दस्यानपेक्षितकाम्यकर्मविषयतयोपपन्नत्वात् । अन्यथा न ह्यस्य कर्म क्षीयते इति श्रुतिविरोधात् । न च ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुत इत्यादिवचनादारब्धकार्ययोरपि पुण्यपापयोर्भोगमंतरेण विनाशः किं न स्यादिति वाच्यं । तस्य तावदेव चिरं यावन्न विमोक्षेऽथ यत्संपत्स्यत इति श्रुत्या विरोधात् । अनया यावदारब्धकर्माविमोक्षस्तावज्ज्ञानिजीवस्य प्रतिपादितत्वात् । अतो वचनांतरानुरोधादनारब्धकर्मणामेव ज्ञानेन विनाशो वर्णनीयः । अतः प्रारब्धकर्मोपभुज्यैव विष्णोर्द्विट् तमो ज्ञानी मोक्षमाप्नोति । तदा तत इति प्रारब्धकर्म नैकशरीरसमाप्यं किंत्वधिकमधिकं मोक्षं साधयतामधिकमधिकमेव कालमनुवर्तत इत्यत्र सत्तत्त्ववचनं प्रमाणमाह ॥ ब्रह्मणामिति । ब्रह्मशतकालस्यादौ कियतः कालस्य ब्रह्मपरोक्षज्ञानसाधनार्थं गतत्वादपरोक्षज्ञानसाधनमारभ्य किंचिन्न्यूनं ब्रह्मशतकालमनुवर्तते हिरण्यगर्भत्वयोग्यजीवस्य प्रारब्धकर्म रुद्रपदयोग्यस्य जीवस्याप्येवं किंचिन्न्यूनं पंचाशद्ब्रह्मकालमनुवर्तते । प्रारब्धकर्म इंद्रादिपदयोग्यानामप्येवं प्रारब्धकर्मसु कालतो ह्रासक्रमो भवतीत्यर्थः। अनेन ॥ भोगेन त्वितरे क्षपयित्वाऽथ संपत्स्यते इति सूत्रं व्याख्यातं भवति ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य प्रथमः पादः ॥४-१॥

॥ हरिः ॐ ॥ अभिहितः कर्मक्षयः । उत्क्रांतिरधुनाऽभिधातव्या । उत्क्रांतिमार्गौ तु कर्मक्षयवन्न देवमनुष्यसाधारणौ। देवानामुत्क्रांतिमार्गयोः प्रायेणासंभवात् । कर्मक्षयस्य सुषुम्नयोत्क्रमणस्यार्चिरादिमार्गगमनस्य च ज्ञानसाध्यत्वेन मोक्षांतर्भूतत्वान्न तदभिधानमसंगतमस्मिन्नध्याये । पृथ्व्यादिदेवानां ब्रह्मप्रलये प्रलीयमानानां स्वस्वकारणप्रवेश एव परेशप्राप्तेर्मार्गो न त्वार्चिरादिलोकलक्षणस्तत्स्थतया तदा प्रलीयमानत्वेनाभावात् । उत्क्रांतिश्च स्वस्वकारणेन देवेन ग्रस्यमानदेहानां। सा तु ब्रह्मलय एव भवति । ये मनुष्यादयो ज्ञानेन क्षीणकर्माणो देहादुत्क्राम्यार्चिरादिमार्गेण भगवंतं विष्णुं प्राप्तास्तेषामपि निःशेषबंधमुक्तिर्हिरण्यगर्भस्य मुक्तिसमय एव भवति । तदाह ॥ देवानामित्यादिना । अस्मिन्नर्थे क्ष्मांभ इत्यादिभगवद्वचनं भगवंतमनुप्राप्ता इत्यादिश्रुतिवचनं दर्शयति॥ क्ष्मांभ इत्यादिना । अगताभिमाना अनपगतभगवद्बहुमाना इत्यर्थः । भोगस्त्वंत्यपादाभिधेयो नोत्क्रांतिमार्गवन्मनुष्याणामेव किं तु देवानामपि विद्यत एवेत्याह ॥ भोग इति। एवं सति वाङ्मनसि दर्शनाच्छब्दाच्चेत्यादिसूत्रार्थः को भवतीत्यपेक्षित आह ॥ तत्रेति । वाङ्मनसि संपद्यते मनः प्राण इत्यादिवचनेन केवलं वागादिवृत्तीनां मनआदिषु लयः किं तु वागादिदेवानां मनआदिदेवेषु मुक्तौ प्रवेशश्चोच्यते। उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृत इत्यादिवागादिशब्दानामभिमानिव्यपदेशत्वावगमादित्यर्थः । ननु सर्वाविप्रतिपन्नो मोक्षः किमित्यत्र प्रतिपाद्यत इत्यत आह॥ तत्र मोक्षेति । ननु मोक्षमेकधैव सर्वे किमिति न प्रतिपादयंतीत्यत आह ॥ पुंसामिति । सत्त्वरजस्तमोगुणभेदात्सम्यगीषत्सम्यगसम्यग्ज्ञतयः संसारिणो जायंते । उत्क्रमातिस्तु गुणातीत-

त्वेन प्राकृतमनोवृत्त्यमिश्रत्वात् सम्यगेव । सा च तन्माहात्म्यतारतम्यानुसारतारतम्येन बहुलत्वादिधर्मोपेता । ततोऽप्यतिविशदत्वादिधर्मोपेता लक्ष्मीमतिः । तयोरप्यतिस्फुटत्वादिधर्मोपेता सर्ववस्त्ववंत विशेषस्फुरणरूपा नारायणमतिरिति ॥ समुद्रतरलोपमेति । मुक्तरुद्रादिमतेः संकोचविकासप्रकारो दर्शितः । अग्निज्वालादिवदित्यमुक्तरुद्रादिमतेरेवंरूपत्वाभावातिशयो दर्शितः । तत्र सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसीति वचनादन्यथाज्ञानं तमोजन्यं तद्वंतं । एवं वादिनो विष्णुदुर्दर्शनावलंबेन तत्त्वतो मोक्षमज्ञात्वाऽन्यथा वदंतीत्यर्थः । तत्र तावज्जिनोक्तं दुषयितुमनुवदति ॥ आश्रित्येत्यादिना । दूषयति ॥ तदित्यादिना । यः सततोर्ध्वगतिमान्मुक्तो जिनाभ्युगतः स दुःखोपेतः । चेतनत्वे सत्यधिकगतिमत्त्वात् । अधिकगतिमज्जीवांतरवदित्यनुमानेन निराकृतत्वान्न सततोर्ध्वगतिमान्मुक्तत्वेनानुमातुं शक्यते । ननु दुःखित्वे चेतनत्वे सत्याधिगतिमत्त्वं न हेतुः । अनूर्ध्वगतिमत्त्वेन सोपाधिकत्वात् । अनूर्ध्वगतिमत्त्वप्रयुक्तत्वाद्देवतादौ दुःखित्वस्येति चेन्नैवं । दूरोर्ध्वगमनवत्यपि खगे क्लेशायोगादनूर्ध्वगतिमत्त्वस्य साध्याव्यापकत्वेनोपाधिलक्षणरहितत्वादित्यर्थः । अपि च सततोर्ध्वगत्यादिलक्षणे वेदविरुद्धमोक्षे परेणोपन्यस्तानुमानस्य यत्प्रतिपक्षानुमानमुद्भावितं न तस्योपाधिदूषणं भवितुमर्हति । उपाधेरप्यनुमानत्वाद्व्यापकानुमानमुपन्यस्तं स्यादुपाध्युपन्यासेन । न हि प्रतिपक्षानुमानस्य प्रतिपक्षांतरानुमानं दूषणं । तुल्यबलवत्त्वात्तयोः । तदाह ॥ प्रतिसाधनेति । अभ्युपगम्याप्युपाधिदूषणमुपाध्यंतरमाशंक्य परिहरति ॥ अथाऽपीति । जडशरीरवत्त्वोपाधिरपि न दुःखित्वप्रयोजकः । साधनव्यापकत्वेनोपाधिलक्षणरहितत्वात् ।

चेतनत्वे सति गतिमत्त्वहेतोः । जडशरीरत्वेन लोकव्याप्तत्वात् । तेन हेतुना तस्योपाधेर्नित्योर्ध्वगमनवत्यपि मुक्ते साधयितुं शक्यत्वादित्यर्थः । ननु चेतनत्वे सति गतिमत्त्वहेतुना जीवन्मुक्तस्य जडशरीरवत्त्वे वेदोक्तस्यापि तत्स्यात् । चेतनत्वे सति गतिमत्त्वात् । ततश्चापसिद्धांतः स्यादित्याशंक्य परिहरति ॥ आगमेति । ननु न वेदाननुसार्यनुमानेन मोक्षः साधयितुं शक्यते । तेनैव दूषयितुमपि शक्यत्वादित्यतिप्रसंगोक्तौ नापसिद्धांतस्योद्भावनं युज्यते । उद्भावनेऽति-प्रसंगस्यात्रापन्हवत्वेनातिप्रसंगः स्यादित्यर्थः । न चालोकाकाशगतिमत्त्वेनोपाधिना जिनोक्तस्यालोकगतस्य मुक्तस्य दुःखित्वं निवारयितुं शक्यते न चेतनत्वे सति गतिमत्त्वहेतुनैव । तस्याप्युपाधेः सततोर्ध्वगतिमति मुक्ते साधयितुं शक्यत्वेन साधनव्यापकत्वादुपाधित्वासंभवात् । साध्यव्यापकत्वे सति साधनाव्यापकस्यैवोपाधित्वात् । तदाह ॥ लोकेति । यथा जैनमोक्षोऽनुपपन्न एवं बौद्धादिमतगो मोक्षोऽनुपपन्नः । यद्यपि बुद्धावतारेणैव सिद्धेन सर्वज्ञेन बौद्धमतं कृतं । तथाऽप्यसुरमोहार्थं कृतमिति पुराणोक्तत्वेनासुराधिकारित्वात् सद्भिस्त्याज्यमेव । यथोक्तं भागवते । ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां । बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यतीति । बौद्धमतमपि प्रतिपाद्यभेदाच्चतुःप्रकारं । तत्र शून्यप्रतिपादनं ये माध्यमिकाः कुर्वंति तैर्मोक्षो मायिभिरिव निरूप्यते । तदाह ॥ एवमिति । मायावादिमतस्य माध्यमिकमतेन साम्यं दर्शयितुं तावन्माध्यमिकमतमनुवदति ॥ न किंचिदित्यादिना । एकपुद्गलवादो बहुपुद्गलवादश्चेति द्विविधःशून्यवादः । तथा हि । वस्तुतः शून्यस्वरूपस्यैव संवृतिवशात्पुद्गलत्वं पुद्गलस्य मुक्तौ न कश्चिदवशिष्यते । तया संवृत्यैव शून्यस्य बहुधावच्छेदात् ।

बहवः पुद्गला भवंति। तत्र शून्यैक्यज्ञानेन यस्य संवृतिर्निवृत्ता तस्य पुद्गलताऽपि निवृत्त्या शून्यतापत्तिर्भवति। यस्त्वनिवृत्तः संसरन्नास्ते संवृतिसंबंधविगमवशादेव बंधमोक्षौ। शून्यस्य वस्तुतस्तु न बंधो न मोक्ष इत्युपन्यस्तेन शून्यवादेन मायावादस्य साम्यं दर्शयति ॥ एवमित्यादिना। मायावादोऽपि द्विविधः। एकजीववादो बहुजीववादश्चेति। एकपुद्गलवादः प्रागुक्तः स एवैकजीववादः। यो बहुपुद्गलवादः स एव बहुजीववादः। या संवृतिः शून्यजगदाध्यासकारणत्वेनाभिमता सा माया शून्यब्रह्मणोर्भेदो वक्तुं शक्यते। मायिमाध्यमिकाभ्यां निर्विशेषत्वांगीकारात्। न च सच्चिदानंदलक्षणस्य ब्रह्मणः शून्यत्वं विरुद्धमिति वाच्यं। निर्विशेषत्वादिना ब्रह्मणि सत्वादेर्निरूपयितुमशक्यत्वात्। अनृतादिव्यावृत्तिमात्रस्य तु सदादिशब्दवाच्यत्वेऽपि शून्यत्वाविरोधित्वात्। माध्यमिकेनापि शून्यस्य सर्वापोहरूपतयाऽभ्युपगमात्। अतो न कथमप्युत्प्रेक्षितुं शक्यते विशेषः शून्यब्रह्मणोर्निर्विशेषत्ववादिनेत्यर्थः। ननु वेदप्रामाण्यवादिनो वेदबाह्यस्य माध्यमिकस्य च कथमेकः सिद्धांत इत्यत आह ॥ प्रामाण्येति। अतत्त्वावेदकं प्रमाणमंगीकुर्वता मायिनोच्यमानं वेदस्य प्रामाण्यं माध्यमिकेनोच्यमानमप्रामाण्यं च फलत एक एव। अतत्त्वावेदकस्याप्रमाणलक्षणत्वात्। अन्यथा प्रमाणाप्रमाणभेदो न स्यादित्यर्थः। यदतत्त्वावेदकमद्वैदज्ञानैकबाध्यं तत्प्रमाणं। यदन्येनापि बाध्यं तदप्रमाणमिति प्रमाणाप्रमाणयोः सामयिकभेदेन विपरीतस्यापि बाधो दुःष्परिहारः स्यादविशेषत्वात्। न च वेदादेर्दीर्घभ्रमजनकत्वेन नाप्रामाण्यमिति वाच्यं। अल्पकालीनभ्रमजनकस्याप्रामाण्येऽतिदीर्घकालीनभ्रमजनकस्य सुतरामप्रामाण्यात्। अन्यथा

चंद्रप्रादेशत्वाभिज्ञानस्याप्यतिदीर्घकालमनुवर्तमानस्यायथार्थस्य मानत्वं स्यात् । तदाह ॥ दीर्घेति । यथा वेदाप्रामाण्यं परिहर्तुमशक्यं मायिना तथा तेन ब्रह्मणः शून्यत्वमपि परिहर्तुमशक्यमिति सविस्तरमाह ॥ निर्भेदत्वमिति । मायिना ब्रह्मण इव माध्यमिकेन भेदो वक्तुं न शक्यते । यथा निर्विशेषत्वं वदता मायिना ब्रह्मणि सत्त्वासत्त्वादिधर्मो नांगीकृतः । एवमसौ माध्यमिकेनापि शून्ये नांगीकृतः । अतोऽपि तन्निरूपणस्याप्यविशेषः । न हि सत्प्रतियोगित्वलक्षणमसत्त्वाख्यं धर्मं शून्यस्यांगीकरोति माध्यमिकः । शून्याद्वैतभंग्यापत्तेः । दुःखजडनिषेधरूपतामंतरेण सुखज्ञानयोर्भावरूपयोर्ब्रह्मण्यनभ्युपगमान्न बाह्याभिमतशून्याद्विशेष्टुं शक्यं मायिना । किं बहुना कस्यापि धर्मस्यानभ्युपगमेन कथमप्यविशेषस्य वक्तुमशक्यत्वात् । शून्यं ब्रह्मेति संज्ञाभेदमात्रं मायिमाध्यमिकयोर्मते । अतो यः शून्यस्वरूपो मोक्षो माध्यमिकाभिमतः स एव मायिनोऽभिमतः । एतन्निराकरणेन निराकृतो भवति । निराकृतस्त्वेष मोक्षो भगवता सूत्रकृता सर्वकामावाप्तिलक्षणस्य स्वाभिमतमोक्षस्य ख्यापनेन । प्रमाणैः सम्यक्स्थापितपक्षस्य विरुद्धपक्षांतरोदयासंभवात् ॥ नाभाव उपलब्धेरिति यत्सूत्रं प्रमाणैरुपलभ्यमानत्वहेतुना जगतः शून्यत्वं निराकारत्वं तेनापि निराकृतः शून्यस्वरूपो मोक्षः । अनेनैव न्यायेन बाह्यंतराभ्युपगतमोक्षा अपि वैदिकमोक्षविरुद्धा निराकृता वेदितव्याः । तत्र तावच्छून्यस्वरूपं विस्तरेण निराकरोति ॥ आत्मेति । न हि शून्यवाद्यभ्युपगतमोक्षः पुरुषार्थो भवति । आत्माभावरूपत्वात् । न हि स्वनाशः पुरुषेणार्थ्यते । अप्रियो हि प्रियनाशः । सर्वस्य प्रियो ह्यात्माऽतिशयेन पुत्रादिभ्यः । न हि

तस्मादाधिकं लोके प्रियं किंचिदित्यर्थः । यस्तु सजातीयविजातीयत्वेन भेदवर्जितं शून्यभावरूपं मोक्षमिच्छन्नात्मावशेषमोक्षं नांगीकरोति । किं तु देहवदात्मनोऽपि नाशमाकांक्षते । तन्मते घटनाशोऽपि मोक्षः स्यात् । न हि घटनाशादन्यो नाशो मोक्षतयाऽऽशास्योऽस्ति । अद्वैतभंगात् । अयं घटनाशोऽयमात्मनाश इति भेदस्य संवृतघटाद्युपाधिकल्पितत्वेनांगीकारात् । ब्रह्मभावं मोक्षमभ्युपगच्छतो मायिनोऽपीदं घटनाशमोक्षत्वापत्तिदूषणं भवत्येव । न हि ब्रह्मणोऽन्यो घटनाशः । अद्वैतभंगापत्तेरित्याह ॥ यदीति । न च वाच्यं निर्विशेषशून्यतापत्तिरेव मोक्षोऽंगीकृतः । घटनाशस्तु घटप्रतियोगिकत्वेन विशेषितो न मोक्षत्वमाप्तुमर्हतीति । आत्मशून्यस्याप्यात्मप्रतियोगित्वेन विशेषितस्य निर्विशेषत्वे घटनाशस्यापि निर्विशेषतापत्तेः । भविष्यत आत्मशून्यस्यानिर्विशेषत्वप्रसंगः तदाह ॥ दृश्यमान इति । न चानुमानेन शून्यरूपो मोक्षः साधयितुं शक्यो बाधेन । आत्मनः शून्यत्वापत्तिर्न मोक्षो देहराहितत्वाद्घटनाशवदित्यनुमानपराहतत्वादित्याह ॥ न मोक्ष इति । ननु यो देहराहितत्वहेतुना दूषितो माध्यामिको मोक्षस्तं वैदिकं ब्रुवन्मायी तस्य हेतोः श्रुत्या बाधं वदिष्यतीत्याशंक्य परिहरति ॥ न चेति । यद्वेद्यं तन्मिथ्येत्यंगीकारादवेद्यस्य श्रुत्याऽपि वेत्तुमशक्यत्वादप्रमाणभूतैव श्रुतिरिति न तया मोक्षदूषणं परिहर्तुं शक्यं मायिनेत्यर्थः । नन्वशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति मुक्तमदेहं श्रावयंती श्रुतिः प्राकृतदेहराहित्यविषयतयोपपन्नेति न काचिच्छ्रुतिरदेहत्वप्रतिपादिकेत्यर्थः । अपि च यदि कश्चिन्निर्विशेषभावस्य घटनाशतन्निर्दुःखत्वेन मोक्षं निराकुर्यात्तर्हि मायिमाध्यमिकौ किमुत्तरं दद्यातां । न च तत्र मायी श्रुत्योत्तरं

दातुं शक्नोति । तन्मतेऽपि श्रुत्यप्रामाण्यस्याप्यापादितत्वात् तदाह ॥ निर्दुःखत्वादिति । किं चाद्वैताभ्युपगमे मुक्तस्यादुःखरूपत्वं न सिध्यति । दुःखेनाभिन्नत्वात् । भिन्नत्वे सविशेषत्वापत्तिसद्वितीयापात्तिश्चस्यात्तदाह ॥ दुःखमिति । अतोऽनंतदोषदुष्टत्वान्मायिसंमतमोक्षेण सहैव माध्यमिकाभिमतमोक्षो हेय इत्यर्थः । निर्विशेषशून्यस्वरूपमोक्षनिराकरणेन निर्विशेषविज्ञानस्वरूपो मोक्षो योगाचाराभिमतो निराकृतो भवतीत्याह ॥ एवमिति । ज्ञानमात्राभ्युपगमे न शून्यवादाद्विज्ञानवादोऽतिरिच्यते । निर्विशेषणाद्वैताभ्युपगम एव विज्ञानव्यतिरेकेण कालक्षणाद्यभ्युपगमात् । क्षणिकत्वविशेषोऽपि वस्तुतो विज्ञानस्य नाभ्युपगतो विज्ञानवादिना । अतो निर्विशेषशून्यमोक्षोऽमोक्षःस्यात् । घटशून्यतेत्यादिना यो दोषोऽभिहितः स द्वैतशून्यविज्ञानमोक्षेऽपि भवत्येवेत्यर्थः । मोक्षकालो न निवृत्तद्वैतेन विज्ञानेन युक्तः कालत्वादिदानींतनकालवदित्यनेनाप्यनुमानेन द्वैतशून्यरूपविज्ञानमोक्षोऽपि निराकृतः । न च कालाभावादिदमनुमानं नोदेतुं शक्नोतीति वाच्यं । कालत्रयेऽपि कालस्य निषेद्धुमशक्यत्वात् । न च कालः कदा नास्तीति प्रश्नस्य मोक्षावस्थायां नास्तीत्युत्तरमिति वाच्यं । मोक्षावस्था न निवृत्तद्वैतज्ञानवती अवस्थात्वात्संसारावस्थावदित्येतेनानुमानेन द्वैतशून्यमोक्षनिराकरणानुपपत्तेः । मोक्षावस्थाऽपि कदेति प्रश्नस्य कालं विहाय दुष्परिहारत्वाच्च । अतः पूर्वमपि कालोऽस्तीति ततः पूर्वमप्यस्तीतः दश्चादपि कालोऽस्ति ततः पश्चादप्यस्तीत्यनुभवेन कालमात्रे निषेधस्य निरुध्यमानत्वाच्च । योऽयं विज्ञानवादिमोक्षे दोषोऽभिहितः स मायिमाध्यमिकमतमोक्षेऽपि सम इत्याह ॥ सम इति । यस्त्वेकमुक्तौ सर्वजगद्बाधं न मन्यते

बहुजीववादी तन्मते कालनित्यत्वानुभवस्य कथंचित्कोपाभावेऽप्येकजीववादिपक्षे भवत्येव कोपः । एकजीववादिनेव मुक्तौ सर्वथा कालादेर्जगतो बाधानभ्युपगमात् । ततश्चासौ कुपितः कालनित्यत्वानुभवे मोक्षेऽपि कालमाद्येदानींतनकालवत्कालेऽपि द्वैतमापादयेदेव । तदाह ॥ एकजीवेति । न केवलमेकजीववाद्यभ्युपगतमोक्षस्य द्वैतशून्यत्वमनुभवेन विरुद्धं । किं तु मोक्षकालः प्रपंचवान् कालत्वादिदानींतनकालवदित्यनुमानेनापि विरुद्धमित्याह ॥ विमत इति । यान्यन्यान्यद्वैतमतानि तानि तान्यप्युक्तदोषैर्दूषितानि । अद्वैतमतानां तद्दूषणानां चातिवैषम्याभावादित्याह ॥ कालेति । उक्तेन प्रपंचवत्त्वसाधकानुमानेन वैभाषिकसौत्रांतिकाभिमतोऽपि निर्विषयचित्संततिरूपो मोक्षो निराकृतः । न निर्विषयचित्संततिर्मोक्षः कालसंबंधित्वात्संसारवदित्यनुमानेनापि निराकृत इत्याह ॥ मोक्ष इति । अत एवं प्रतिपक्षानुमानपराहतत्वान्न वेदबाह्यवाद्युक्तानुमानैर्मोक्षः साधयितुं शक्यते । वैदिकैस्तु सर्वकामावाप्तिलक्षणो मोक्षः साधयितुं शक्यत एव । श्रुतिसामर्थ्यात् । तदाह ॥ अनुमानानीति । ये वेदप्रामाण्यवादिनः सर्वकामावाप्तिलक्षणं मोक्षं नांगीकुर्वंति तैरभ्युपगतमोक्षमनूद्य दूषयति ॥ सांख्येत्यादिना । सांख्यादिभिर्दुःखद्वेषादिदोषाणामिव सुखेच्छादेरपि यन्मोक्षे लयवर्णनं तदप्यनुपपन्नं । श्रुतिभिर्मोक्षे महानंदस्य दिव्यविषयभोगस्य चासंदेहेन प्रतिपादितत्वादित्यर्थः । न चाप्रियवाद्धि यस्यापि मोक्षे वृत्त्यभावेऽशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति विवक्षितं । न तु प्राकृतमेवेत्यस्ति विशेषः । मोक्षयोग्यजीवस्याप्राकृतेनापि भोगाभावात् । सुखादिरूपक्रिययैव हि रूपत्वेन मोक्षभोगस्य श्रावयंती गौपवनश्रुतिः । बलमानंद ओजश्च

सहो ज्ञानमनाकुलं । स्वरूपाण्येव जीवस्य व्यज्यंते परमाद्विभोरिति । यथाऽप्रियमपुरुषार्थत्वेन मोक्षविरोधित्वान्न मोक्षे युज्यते । एवं प्रियाभावेऽपुरुषार्थत्वेन मोक्षविरुद्धत्वान्मोक्षे न युज्यत एव । न चैवमप्राकृतसुखादिरूपत्वमंधतामिस्रयोग्यानामसुराणामपि भवत्विति वाच्यं । तेषामविनाशादिदुःखादिस्वरूपत्वात् । तथा ह्याग्निवैश्मश्रुतिः । नित्यानंदो नित्यज्ञानो नित्यबलः परमात्मा । नैवमसुरा एवमनेवं च मनुष्या इति । भविष्यत्पर्वणि च । नित्यानंदज्ञानबला देवा नैवं तु दानवाः । दुःखोपलब्धिमात्रास्ते मानुषास्तूभयात्मकाः । तेषां यदन्यथादृश्यं तदुपाधिकृतं मतमिति । अतोऽसुरप्रकृतीनामेव प्राकृतदुःखादिस्वरूपत्वं । देवप्रकृतीनां त्वप्राकृतसुखादिस्वरूपत्वमेव । अत एवाप्राकृतसुखानुभवरूपमोक्षसिध्यर्थं संसारसुखपरित्यागेन प्रयत्नो घटते । अन्यथा संसारसुखहानाय न कोऽपि यतेत । यथा न प्रियाप्रिये स्पृशत इत्येतेन न मुक्तस्य सुखाभाव उच्यते । एवं न प्रेत्य संज्ञाऽस्तीति वाक्येनाप्यविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मेति वाक्यशेषाविरोधान्न मुक्तस्य ज्ञानाभाव उच्यते । किंतु प्रत्यक्षपदार्थवन्मुक्तमन्ये न जानंत्यमुक्ता इत्येतदेवोच्यते । तदाह ॥ संज्ञेति । एतदेव विवृणोति ॥ आशंक्येत्यादिना । अयमर्थः । न प्रेत्य संज्ञाऽस्तीति याज्ञवल्क्यवचनं तदभिप्रायमजानत्या मैत्रेय्याः शंकेयं । आह उवाच । मैत्रेय यत्रैव मा भगवान् मोहांतमापीपदिति । आरीभीयत् प्रापयामासेत्यर्थः । एवं न प्रेत्य संज्ञाऽस्तीति संमुग्धवचनेन मैत्रेय्या शंकां कारयित्वा याज्ञवल्क्यः परिहरति । न वा अरे अहं मोहं ब्रवीम्यविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मेति । अत्र मुक्तज्ञाननाशोऽयुक्त इत्याशंकायां

परिहारत्वे नाशं वदतोऽयमभिप्रायः । न मुक्तस्यात्मनो ज्ञाननाशः शंकनीयः । ज्ञाननाश आत्मनोऽपि ज्ञानस्वरूपत्वेन नाशप्रसंगात् । अविनाशी वा ह्यात्माऽसौ प्रसिद्धो वेदेषु । एतदात्मनः शून्यवाद्युक्तशून्यत्वनिराकरणायोक्तं । न विद्यते उच्छित्तिर्येषां तेऽनुच्छित्तयो धर्मा ज्ञानादनंदादयो यस्यासावुच्छित्तिधर्मेति व्याख्यानेऽविनाशीत्यनेन पौनरुक्त्यं स्यात् । मात्रासंसर्गस्त्वस्य भवतीति श्रुत्या दिव्यविषयानुभवश्रवणाच्च न मुक्तस्य बुध्याद्यभाव इत्याह ॥ मात्रेति । न च मुक्तस्य द्रष्टृत्वादिधर्मसद्भावे यत्र त्वस्य सर्वमात्मैवाभूत्केन कं पश्येत्केन कं जिघ्रेदित्यादिवाक्यविरोध इति वाच्यं । दर्शनघ्राणादिरहितमोक्षप्रतिपादकपक्षाक्षेपपरत्वात्तस्य वाक्यस्यान्यथानुच्छित्तिधर्मो यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिपूर्ववाक्यविरोधि स्यात् । घ्राणादिभोगाभावस्यानपेक्षितत्वादनपेक्षिताभिधानं च स्यात् । इतर इतरं पश्य-तीत्यादिपूर्ववाक्यविरोधि स्यात् । येनेदं सर्वं विजानाति तं च केन विजानीयात् तद्विज्ञातारमरे केन विजानीयादित्यत्र यत्र त्वस्य सर्वमात्मेत्यादिवाक्यशेषं च ज्ञानशून्यमात्मावस्थानं मोक्ष इत्येतत्पक्षानिष्टापादानरूपेणैव घटते नान्यथा । तथाहि । येन सर्वमिदं ज्ञायेत न तावत्तस्य विष्णोरज्ञानं पुरुषार्थः । तथा सति वेदानां वैयर्थ्यं स्यात् । तेषां विष्णु-ज्ञापनार्थं प्रवृत्तत्वात् । नापि ज्ञातुः स्वस्याज्ञानं पुरुषार्थः । तथा सति घटादिवज्जडतुल्यतया हेयत्वापातात् । न च स्वस्याज्ञातृत्वे विरोधःकश्चित्कर्तृकर्मविरोधस्त्वत्र मामहं जानामीत्यनुभवबाधितो नास्पदं लभते । दृष्टा बाधेन विरोधोऽपि विरुध्यते तदाह ॥ आचिक्षेपेति ॥ ज्ञानरहितमोक्षाक्षेपेण दिव्यविद्ययाऽनुभवलक्षणमोक्षो योऽभिहितः स तथैवांगीक

र्तव्यः श्रुत्यंतरबलात् । अन्यथा सोऽश्नुत इत्यादिश्रुत्यंतरविरोधः स्यात् । तदाह ॥ सोऽश्नुत इति । ननु मोक्षे घ्राणादिभोगो न युज्यते घ्रातृघ्रेयभेदसापेक्षत्वात्तस्य । यत्र हि द्वैतमिव भवतीत्यत्रेवशब्देनासत्वप्रतिपादनादित्याशंक्याह ॥ अस्वातंत्र्यादिति । लोके यो यदधीनः स तस्माद्द्वितीय इत्युच्यते न तु मुख्यतोऽद्वितीय एवेति तथा विष्णवधीनत्वात् घ्रातृघ्रेयादिकं द्वैतमिवेत्युच्यते न त्वविद्यमानत्वात् । तथा सति तदितर इतरं पश्यतीत्यादिवाक्यशेषविरोधः स्यात् । यत्र त्वस्य सर्वमात्मैवाभूदित्येतद्वाक्याद्यत्र हि द्वैतमिवेत्यस्यार्थाधिक्यं न स्यादित्यर्थः । इवशब्दस्यास्वातंत्र्यवाचित्वं शब्दतत्त्वेप्युक्तमित्याह ॥ अस्वातंत्र्येति । किं च यदि सुखज्ञानादिरहित एव मोक्षो याज्ञवल्क्येनाभिहितः स्यात्तर्ह्यत्रैव मा भगवान्मोहं तमापीपदिति मैत्रेय्यीचोद्यमपरिहृतं स्यादित्याह ॥ मैत्रेयीति । अपि च सुखादिधर्मरहितो मोक्षः पुरुषार्थो न स्यात् । न च दुःखनिवृत्तिरूपत्वेन मोक्षस्य पुरुषार्थत्वं वाच्यं । सुखोच्छित्तिरूपत्वेनापुरुषार्थत्वस्यापि वक्तुं शक्यत्वात् । किं च यस्तु ज्ञानरहितं मुक्तं मन्यते तन्मते निःशेषदुःखनिवृत्तेः पुरुषार्थत्वमुपपद्यते । न ह्यात्मसंबंधित्वेनाननुभूयमाना दुःखनिवृत्तिः पुरुषार्थत्वेन दृष्टा कुत्रचित् । तदाह ॥ किं चेति । दुःखनिवृत्तितोऽपि सुखस्यापेक्षितत्वात् । सुखदुःखनिवृत्तिरूपमोक्षस्यापुरुषार्थत्वादप्यतिशयेनापुरुषार्थत्वं स्यात् । अल्पसुखार्थमपि महता दुःखेन प्रवर्तमानत्वाज्जनस्य । तदाह ॥ तयोरित्यादि । न च सुखित्वे मुक्तस्य संसारिवद्दुःखित्वमपि स्यादिति वाच्यं । सुखरहितत्वेऽपि दुःखित्वापत्तेः । लोके सुखरहितचेतनस्य दुःखित्वदर्शनात् । तदाह ॥ विमत इति । इतोऽपि निःसुख-

मोक्षपक्षो हेय इत्याह ॥ सर्वश्रुतीति । मोक्षानंदप्रतिपादकश्रुतिपुराणवाक्यान्युदाहरति ॥ सोऽनानंदादित्यादिना । निर्गुणे ब्रह्मणीति भगवद्वचनं । भागवतवचनमुपसंहरति ॥ अत इति । मोदप्रमोदाद्यानंदः कथंचिन्मुक्तस्येत्यपि वाच्यं । श्रुतिपुराणवाक्यैरप्राकृततद्वत्त्वेनोक्तत्वात् । तथा हि । तस्मै स्वलोकं भगवान् प्रसादितः संदर्शयामास परं न यत्पदं । व्यपेतसंक्लेशविमोहसाध्वसं संदृष्टवद्भिर्विबुधैरतिस्तुतं । न वर्तते यत्र रजस्तमस्तयोः स्थानमित्यादिभागवतवचनेनैवाप्राकृतदेहत्वेनोक्ताः । परं न यत्पदं यस्माल्लोकात्परं पदं नास्तीत्यर्थः । ऋचां त्वः पोषमास्ते इत्यनया ऋचादिपुष्टत्वेन सामगानादिकर्तृत्वेनोक्तत्वान्मुक्तब्रह्मणो देहवंत इति प्रतीयते । अस्माल्लोकात्प्रेत्य कामान्नी कामरूप्यनुसंचरन्नित्याद्यया श्रुत्या संसारमंडलातीतत्वेन मुक्तोऽप्राकृतरूप इत्युच्यते । प्रकृतिकार्यरूपत्वाभावादेव मुक्तानां देहो न तेभ्योऽन्यन्नेत्यवसीयते । तदाह ॥ शिरःकरेत्यादिना । मुक्तिभाजो देहयुक्ताः चेतनत्वात्संसारिवदित्याद्यनुमयाऽपि देहेंद्रिययुक्तं मुक्तस्वरूपं ज्ञायत इत्याह ॥ शिरःकराद्यैरिति । यथा देहशून्यत्वमनुपपन्नं मुक्तस्यैवं तस्य ब्रह्मत्वापत्तिरपि न प्रमाणेन साधयितुं शक्यते । बहुश्रुतिविरोधात् । तथा हि । सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिता । एतमानंदमयमात्मानमुपसंक्रम्य । इमान् लोकान् कामान्नी कामरूप्यनुसंचरन् । एतत्सामगायन्नास्ते । एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेनरूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः । स तत्र पर्येति जक्षन् क्रीडन् । अमृतस्यैष सेतुः । उतामृतत्वस्येशानो यदन्नेनातिरोहतीत्यादिश्रुतिभिर्हि मुक्तस्य भगवद्वाक्यस्यैव सर्वकामावाप्तिरुच्यते । तदाह ॥ न च

ब्रह्मरूपत्वमिति । यथोपेत्य सुखार्णवं भोगान्भुंक्त इत्यनेनैतमानंदमिति श्रुतिं सूचयति । यत्तादित्यनेनैष संप्रसाद इत्येतां श्रुतिं योजयन्दर्शयति । यत्प्रसादाद्यं परंज्योतिःशब्दाभिधेयं प्राप्य विभूतिस्वरूपो मुक्तजीवो जक्षन् क्रीडन्नास्ते स एव विष्णुरत्रोत्तमपुरुषशब्देनोच्यते । तस्य जीवादवरादुत्तमपुरुषवाचित्वान्न जीवोऽर्थः । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति वचनात् । तथैव परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचेत्यत्रात्मशब्देनापि गुणैराततत्वाद्विष्णुरेवोच्यत इत्यर्थः । अनुमानेनापि मुक्तस्येशानाभेदाभावं दर्शयति ॥ काल इति । अयमर्थः । न हि कश्चिदिदानीमीशेनाभेदमापद्यमानो दृष्टः । यत्पूर्वं येन भिन्नमासीत्तत्पश्चात्तेनाभिन्नं भवतीत्येतत् न हि कथंचिद्युक्त्या साधयितुं शक्यते । न हि किंचिद्येन पूर्वं भिन्नं तेन पश्चादभेदं केनापि कारणेनापद्यमानं दृष्टं कुत्रचित् । यथोक्तं श्रीविष्णुपुराणे । परमात्मात्मनो भोगः परमार्थतयोच्यतां । मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यता यत इति । मुक्तस्य हरिणा भेदाभेदावहं सः सोऽहमित्यनुसंधानकारणभूतावपि युक्तिविरुद्धौ । न हि कुत्रचित्तथाविधौ भेदाभेदौ चेतनस्य चेतनांतरेण लोके दृष्टौ । तदाह ॥ न चैवेति । जैनमोक्षनिराकरणसमयोक्तमर्थमुपसंहरति ॥ इत्थमिति । सर्वकामावाप्तिलक्षणत्वेन यः सर्वपुरुषार्थतमो मोक्षस्तमपि जैनबौद्धसांख्यादयो भ्रमाकुलितत्वाद्यतः सम्यङ् न विदुरतस्तैः कृतानि मोक्षप्रतिपादनानि भ्रममूलानि । लोके मूढा अप्यात्मनः सुखभोगः स्यादितीच्छंति । न तु तत्र विप्रतिपद्यंते । तेभ्योऽप्येते मोक्षे प्राणादिसुखभोगमनंगीकुर्वंतो वादिनो मूढा इत्यर्थः । अधुना सिंहावलोकनन्यायेन तावत्तृतीयाध्यायचतुर्थपादस्याधिकरणेषु पूर्वपक्षयुक्तीरभिधाय क्रमेण सिद्धांतयुक्ती-

राह ॥ औदार्यमित्यादिना । एतदध्यायप्रथमपादस्याधिकरणेषु पूर्वपक्षयुक्तीरभिधाय क्रमेण सिद्धांतयुक्तीराह ॥ सुशक्तेत्यादिना । एतत्पादाधिकरणेषु पूर्वपक्षयुक्तीरभिधाय क्रमेण सिद्धांतयुक्तीराह ॥ व्यामिश्रेत्यादिना । यो देवानां स्वस्वोत्तमदेवतानुप्रवेशरूपो मोक्षो वक्तुमारब्धोऽस्मिन्पादे सोऽधुना प्रपंच्यते ॥ वाङ्मनसि दर्शनादित्यादिसूत्रैः । उमादीनां रुद्रादिषु प्रवेशोऽभिहितः । ततोऽन्येषां देवानां पृथिव्यादिषु लयोऽभिहितो भूतेषु तच्छ्रुतेरित्यनेन सूत्रेण । तत्रोदाहृतश्रुतौ वायाविंद्रः सोम आदित्यो बृहस्पतिरितींद्रादीनां यस्मिन् लय उच्यते । यो भूतमध्यावस्थितोऽपि प्रधानवायुरेव न भूतवायुः । न हि तस्मिन्निंद्रस्य तत उत्तमस्य लयो युज्यते । वातीति वायुरिति योगस्य प्रधानवायौ युक्तत्वात् । स एवात्र वायुशब्देनोच्यते न च भूतवायुरेव । वाति स वायुः एष देवतानादिर्योऽयं पवत इति श्रुतिविरोधात् । प्रधानवायोरपि जडशब्दभूतवाय्वभिमानित्वाच्च भूतवायुशब्दवाच्यत्वं युक्तं । न चाप्रधानवायुरेव जडभूतवाय्वभिमन्यमान इति वाच्यं । महदादिसर्ववस्त्वभिमानिनि प्रधानवायौ भूताभिमानस्यापरिहार्यत्वात् । न हि राज्याधिपतेर्ग्रामस्वामित्वं न विद्यते । तदाह ॥ प्रधानेति । भूतानि पर इत्यनेन वचनेन भूतानां परमात्मनि लयोऽभिहितः । स प्रधानवायुद्वाराऽवगंतव्यः । प्रधानवायुरेव साक्षात्परे प्रविशति । स प्राणमसृजत प्राणः श्रद्धां खं वायुमित्यादिश्रुत्या मुख्यवाय्वादिक्रमेण सृष्टिश्रवणात् । भूतानां च पृथिव्यादीनां स्वस्वकारणदेवताप्रवेशद्वारा मुख्यवायौ प्रवेशो न तु साक्षात् । सर्वेषामिंद्रसोमादीनामपि यो मुख्यवायौ श्रुत्युक्तः प्रवेशः सोऽपि

स्वस्वकारणदेवताप्रवेशेनैवावगंतव्यः । तदाह ॥ तस्मिन्निति । तमेव स्वस्वकारणप्रवेशक्रमं प्रपंचयति ॥ तस्मादि-
त्यादिना । ननूमागिरिशयोर्वारुणीशेषजन्मन्येव मुक्तिर्भारतीमुख्यवायोरपि ब्रह्माणीब्रह्मजन्मन्येव मुक्तिरभ्युगंतव्या ।
स्थितप्रज्ञोऽपि यदूर्ध्वः प्राप्य रुद्रपदं ततः । सांकर्षणतनौ मुक्तिमगाद्विष्णुप्रसादत इत्यादिवचनात् । प्रसिद्धं हि
बलेर्भविष्यदिंद्रत्वमिव मुख्यवाय्ववतारस्य हनुमतो भविष्यद्ब्रह्मत्वं पुराणादिषु । अतो नामादिष्विंद्रादीनां मुच्य-
मानानां लयो युज्यते तदाह ॥ उमेति । तथा तेषामुमादिभिः सह पुनर्जननप्रसंगात् । नायं दोषः । अत्रोमा-
दीनां मुक्तिकालीनप्रवेशस्थानत्वमुच्यते । अग्निरिंद्रे इंद्र उमायामुमा रुद्रे विलीयत इत्यादिश्रुतौ । तत्रोमागिरीश-
भारतीवायुशब्दैर्वारुणीशेषब्रह्माणीविरिंचादीनां पूर्वगत्या ग्रहणोपपत्तेः । यस्मादुमादय एव महाकल्पांतरे वारुण्या-
दिपदं प्राप्नुवंति । अतो यदैतदुमादिपदस्थास्तदा तानुपासितवंत इंद्रादिजीवा वायोर्ब्रह्मत्वे सत्यं निरंतरमुच्यमाना
उमादीन्प्रविशंतीत्युमादिषु मुच्यमानजीवप्रवेशवचनं युज्यते । तदाह ॥ उमेति । अधुना सुपर्णादिषु प्रविश्य मुच्य-
मानानाह ॥ सूर्य इति । नन्विंद्रस्योमां प्रविश्य रुद्रादौ प्रवेशः श्रुत्युक्तस्तत्कथं तस्य सौपर्णीं प्रविश्य गरुडप्रवेशोऽ
त्रोक्तः । नैष दोषः । यदोमायां कामदेवः प्रविशतीत्युच्यते तदोमाशब्देन वारुण्युच्यते । यदेंद्रः प्रविशतीत्युच्यते तदो-
माशब्देन सौपर्ण्युच्यते । गरुडश्च गिरीशनाम्नोच्यते इति व्यवस्थायोगेनाविरोधात् तदाह ॥ इंद्रेति । इंद्रं प्रविश्य
मुच्यमानानन्यांश्च कांश्चित्कामं प्रविश्य मुच्यमानानाह ॥ भृग्वादय इत्यादिना । आदिशब्देनात्र वशिष्ठमरीच्यादेर्ग्रहणं ।

सनादय इत्यत्रादिशब्देन सनंदसुजातादेर्ग्रहणं । नृप इत्यत्रोक्तव्यतिरिक्तदेवा इति । एवं हव्यवाहं प्रविशंतीत्यर्थः । अनेनाग्नौ सर्वे देवा विलीयंत इत्येतच्छ्रुतिविषयः प्रदर्शितो भवति । तमेव धर्ममेवेत्यर्थः । सुरेंद्रानुगा देवगंधर्वा इत्यर्थः । य एते स्वस्वोत्तमदेवेषु प्रविष्टा उक्तास्ते परकायप्रविष्टयोगासिद्धवत्तत्रैव भोगान्भुंजते मुक्तास्तत्रैव व्यक्तस्वरूपानंदाश्च भवंति । सच्चिदानंददेहेभ्यो मुक्तेभ्यः स्वस्वोत्तमदेवेभ्यो बाहिः स्वेच्छया निर्गत्य क्रीडित्वा तानेव प्रविशंति । अयं हि तेषां सायुज्यलक्षणो मोक्षो यत्क्षीरनीरवदाविष्णुं स्वस्वोत्तमदेवतासंश्लेषः संयोगो नामायं प्रवेशः । स्वस्वोत्तमदेवताप्रवेशस्तु क्रमेण प्रलयकाले सायुज्यहीनानामपि भवत्येव । सृष्टिकाले तु ताभ्यो बहिर्निर्गतानां तेषां सामीप्यादिकमेव न सायुज्यं । प्राप्तसायुज्यमोक्षाणां तु सृष्टिकालेऽस्त्येव स्वस्वोत्तमदेवतासु प्रवेशः । तदेतदाह ॥ भोगां-श्चेत्यादिना । यदेतदुक्तं तत्परमश्रुतौ विस्तरेणोक्तमित्याह ॥ उक्तमिति । न चोत्तमदेवानां स्वावरदेवतानुप्रवेशो मुक्तिर्न स्यादिति वाच्यं । सृष्टिक्रमविपरीतक्रमभावित्वात् लयवन्मोक्षस्य लयश्च सृष्टिक्रमविपरीतक्रमेणेत्युक्तं सूत्रकृता ॥ विपर्ययेण तु क्रम उपपद्यते चेति । योऽयं देवानां स्वस्वकारणभूतदेवतालय उक्तः प्रवेशनामको यश्च चतुर्थपादे विशेषेण वक्ष्यमाणो भोगस्तदुभयमेव तेषां मुक्तिश्च । अतो यथा महदादिजडानां सृष्टिक्रमवैपरीत्येन लयः । तथा तदभिमानि-देवानामपि सृष्टिवैपरीत्येनैव मोक्षो युज्यते लयविशेषत्वान्मोक्षस्य । ब्रह्मादिक्रमेणैव देवानां बिंबप्रतिबिंबभावादेवावरदेवस्यो-त्तमदेवे लयः पूर्वोक्तस्तथैवांगीकर्तव्यः । तथैतेषां बिंबप्रतिबिंबभावस्य पैंगिश्रुत्योक्तत्वाद्युज्यते च बिंबभूतदेव एव प्रति-

बिंबभूतदेवस्य लयो मुक्तिदशायां न तु प्रतिबिंबभूतदेवे बिंबभूतदेवस्य । बिंबाधीनत्वात्प्रतिबिंबस्य । अतः प्रतिबिंबरूपाणां मुक्तानां स्वस्वबिंबदेवताधीनता न कदाचिदपि निवर्तते। तदेतदाह ॥ सर्गक्रम इत्यादिना। तेजोभिदां त्विति श्लोकस्यायमर्थः । प्राणस्तेजसि तेजः परस्यां देवतायामित्यस्यां श्रुतौ प्राणपरमात्मनोर्मध्ये तेजःशब्देन या निर्दिष्टा श्रीस्तां लयेऽग्रे भविष्यद्ब्रह्मपदमनुभविष्यन्मुख्यवायुरप्यानंतरं श्रियमाप्तः। ताभ्यां मातापितृभ्यां पुत्रतया प्रसूत उत्पादितः । पुनः प्रलये विष्णुं प्रविश्य मुक्तः सन् तत्र तिष्ठतीति । यो मुक्तस्तेषां सर्वदा स्थितिप्रकारमाह ॥ सर्वे इति । उक्तप्रकारेण ये विष्णुं प्रविष्टा मुक्तास्ते प्रलयकाले न सुप्तवद्विष्णौ तत्संस्पर्शसुखमजानंतस्तिष्ठंति । किंतु विष्णुसंसर्गात्सम्यगाविर्भूतमानंदमनुभवंत एव तिष्ठंति सृष्टिकाले तु विष्णुदेहविशेषान्निर्गत्य वैकुंठादिषु क्रीडंतीत्यर्थः । पूर्वोक्तेभ्योऽन्ये ये निर्ऋत्यादयस्ते धर्मादिषु प्रवशंतीत्याह ॥ प्रयांतीति । धर्मदेवानां स्वायंभुवमन्वादिमार्गेण मुक्तिः पूर्वोक्तैव ज्ञातव्या । तत्र मरुद्गणाः शक्रं प्रयांति। अनेन मरुतो मारुत इति श्रुत्या यो मरुतां प्रधानवायौ लय उक्तः स इंद्रादिद्वारा उक्त इति ज्ञापितं भवति । पृतनाधिपो विष्वक्सेनः ॥ उक्तार्थे च तुरश्रुतिरस्तीति । उक्तार्थमुपसंहरति ॥ इयं विमुक्तिरिति । अत्रोक्तप्रकारैव न जिनाद्युक्तप्रकारेत्यर्थः ॥ ❁

॥ इति श्रीमदानंदतीर्थभगवत्पादकृतब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४-२ ॥ ❁ ॥

॥ श्रीगुरुभ्योनमः हरिः ॐ ॥ यस्य क्षीणकर्मण उत्क्रमणं निरूपितं प्राक् तस्योत्क्रांतस्य गमनमार्गो गम्यं च वस्तु निरूप्यते । अनेनार्चिरादिना तत्प्रथितेरित्यादिना पादेनेत्याह ॥ उत्क्रांतेति । अस्य पादस्याधिकरणेषु पूर्वपक्षतर्काऩभिधाय क्रमेण सिद्धांततर्कानाह ॥ सुक्रमेत्यादिना । अर्चिरादिमार्गेण गतानां ब्रह्मप्राप्तिः श्रूयते । स एनान्ब्रह्म गमयतीति । अत्र यद्गम्यतया प्रतीतं ब्रह्म चतुर्मुखाख्यं कार्यब्रह्मेति बादरिमतं । परब्रह्मेति जैमिनिमतं । मतद्वयमेतत्सयुक्तिकमुपन्यस्य तद्भगवता स्वमतमुपन्यस्तं ॥ अप्रतीकालंबनान्नयतीति बादरायण इति । तद्विवृणोति ॥ प्रतीकामिति । अयमर्थः । देहाद्यधिष्ठानस्थितविष्णुदर्शिनः प्रतीकालंबनाख्याः । सर्वगतविष्णुदर्शिनोऽप्रतीकालंबनाख्याः । तत्र प्रतीकालंबनास्तावच्चतुर्मुखमेव प्राप्य तदुपदेशेन ज्ञानमुज्वलितं कुर्वंतस्तिष्ठंति । प्रलयकाले विष्णुं प्राप्नुवंति । अप्रतीकालंबनास्तु चतुर्मुखं प्राप्यानंतरमेव ततो विष्णुं प्राप्नुवंति । उभयेऽपि निःशेषबंधध्वंसे द्विपरार्धावसान एव प्राप्नुवंति । तथा चोक्तं । अप्रतीकाश्रया ये हि ते यांति परमेव तु । स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद्ब्रह्म सलोकतां । ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यांते परात्मनः प्रविशंति परं पदमिति । अनेन न बादरिमतस्यात्यंतबाधो नापिजैमिनिमतस्येत्युक्तं भवति । कैश्चिदपरब्रह्मणः कैश्चिच्च परब्रह्मणो योग्यताभेदाद्गम्यानुगमात् ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादकृतश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य तृतीयः पादः ॥ ४-३ ॥

॥ श्रीगुरुभ्योनमः ॥ हरिः ॐ ॥ श्रीविष्णुं प्राप्याविर्भूतस्वरूपस्य मुक्तस्य कामभोगोऽस्मिन्पादे प्रतिपाद्यते । अस्य पादस्याधिकरणानां पूर्वपक्षियुक्तिमालामुद्धृत्य सिद्धांतयुक्तिमालामुद्धरति ॥ अतिक्रमोक्तिरित्यादिना । संकल्पादेव च तच्छ्रुतेरित्यनेन सूत्रेण संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिश्रुतिबलात्संकल्पमात्रसाधनो मुक्तस्य भोगो न व्यापारांतरसाध्य इत्युक्तं भगवता सूत्रकृता । अत एव चानन्याधिपतिरिति यदुक्तं तस्यार्थमाह ॥ अनन्यभृत्यत्वमित्यादिना । यस्य मुक्तस्य यावंतोऽधिपतयो विष्णवादय इयदामननादौ प्रतिपादितास्तस्य तेभ्योऽन्यो नियंता संसारिण इव स्वाधमः कदाऽपि नास्तीत्येतदेवास्मिन्सूत्रे विवक्षितं न तु तस्य मुक्तस्य न कोऽप्यधिपतिरिति । तथा सति हरेर्मुक्ताधिपतित्वं वदंत्योतामृतत्वस्येशान इति श्रुत्या विरोधः स्यात् । तस्मिन्सूत्रे मुक्तस्याधिपतिशून्यत्वं विवक्षितं चेदाधिपतिरस्य नास्तीत्येतावता पूर्णत्वादनधिपतिरित्येव योगः स्यात् । न त्वनन्याधिपतिरिति । अन्यशब्दस्य वैयर्थ्यात् । न च संसारिण एव विष्णवधीना न मुक्ता इति वाच्यं । अमुक्ता अनन्येनाधिपतिना युक्ता विष्णवन्यचेतनत्वात्संसारिपुरुषवदित्यनुमानविरोधात् । तदेतदाह ॥ एत इति । न चाविभागेन दृष्टत्वादित्येतत्सूत्रोक्तेनाविभागेन मुक्ताविष्णुभेदस्य निराकृतत्वान्न मुक्तानां विष्णुरधिपतिरिति वाच्यं । अविभागस्य निराकरणात् । न ह्यविप्रयुक्तयोर्लतावृक्षयोरभेदो भवति । तेन न केवलं विष्णोरेव मुक्ताधिपत्यं किंतु मुक्तब्रह्मादीनामपि स्वस्वावरमुक्ताधिपत्यमस्तीत्याह ॥ मुक्तस्वकीयेति । एतदुपपादयति ॥ अनेनेत्यादिना । य एषोऽतरादित्ये हिरण्मयः पुरुषो दृश्यते । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं

वेद। अथ य एषोऽतरक्षिणि पुरुषो दृश्यते। अथ य एतदेवं विद्वान् साम गायत्युभौ साम गायति सोऽमुनैव स एष वाऽमुष्मात्परांचो लोकास्तांश्चाप्नोति देवकामांश्चाथानेनैव ये चैतदस्मादर्वांचो लोकांस्तांश्चाप्नोति मनुष्यकामांश्चेति छंदोगश्रुतावादित्येऽक्षिणि च स्थितविष्णुज्ञानफलं तावदुपारितनादधस्तनलोकैश्वर्यं सर्वपापनिवृत्तिविशिष्टं प्रतीयते। एतच्च सर्वाशुभनाशलिंगान्मुक्तावेवेत्यंगीकर्तव्यं न ब्रह्ममुक्तस्य सर्वपापेभ्य उद्गमनं युज्यत इत्यर्थः। ज्ञानफलं च लोकाधिपत्यं ज्ञानतारतम्यात्तारतम्येनैव सिध्यति। तत्र समग्रं लोकाधिपत्यं समग्रज्ञानवतो मुक्तविधातुरेवेत्यत्र तुरश्रुतिमाह॥ लोकाधिपत्यमिति। ता यो वेद स वेद ब्रह्म सर्वेऽस्मै देवा बलिमावहंतीत्यस्यां च श्रुतौ व्याहृतिभिः प्रतिपाद्यपरब्रह्मज्ञानफलं मुक्तौ सर्वदेवतापूज्यत्वं प्रतीयमानं मुख्यं मुख्यविधातुरेव। समग्रज्ञानत्वात्। न हि यस्मै कस्मैचित्सर्वे देवा बलिमावहंतीति युज्यते। तदाह॥ सर्वे बलिमिति। यदुक्तं ननु यदुक्तं लोकाधिपत्यं मुक्तविधात्रादीनां तन्न युज्यते प्रकृतलोकाधिपत्यस्यामुक्तब्रह्मादिष्वेव युक्तत्वादित्यत आह॥ लोक इति। न हि लोक इति प्राकृतभुवनमेवोच्यते। लोकस्तु भुवने जन इत्यभिधानात्। जनानामपि लोकशब्दार्थत्वात्। लोकाभिमानिनामपि लोकशब्दार्थत्वाच्च। ततश्चेह योग्यतावशाद्भूरादिष्वंतर्लोकादिषु लोकेषु वर्तमाना मुक्ताः स्वान्स्वकीयत्वेनाभिमन्यमानान्मुक्तनाथांश्चोत्तममुक्तलोका इति निर्दिष्टा इत्यत्र पैंगिश्रुतिमाह॥ तद्वा इति। अथवा पूर्वनिर्दिष्टा मुक्ता लोकातीतत्वेनालोकत्वात्परांचो लोका इत्यत्राकारप्रश्लेषेणालोका इत्युच्यंते। अथवा लोका इत्येव मुक्तानां निर्देशः प्रकाशरूपत्वात्तेषां।

प्रकाशस्यापि लोकशब्दार्थत्वात् । तदाह ॥ अलोकेति । एवंविधलोकाधिपत्यं च प्रक्तश्चतुर्मुखस्यैवेत्यत्र तुरश्रुतिमाह ॥ ब्रह्मेति । ननु ये चामुष्मातपरांचो लोकास्तेषां चेष्टदेवकामानां च यच्चैदस्मादर्वांचो लोकास्तेषां चेष्टे मनुष्यकामां-श्चेत्यनेन यदादित्येऽक्षिणि स्थितस्य च हरेर्लोकाधिपत्यमुक्तं तदेवोक्तमाधिपत्यमथ एतदेवं विद्वान्साम गायतीत्यादिना ज्ञान-फलं नान्यत् । आदित्यादिस्थेन हरिणैकीभूतस्य विदुषः पृथगाधिपत्यासंभवादतः कथमुक्तब्रह्मणोऽपि लोकाधिपत्यमुच्यत इत्याशंक्य परिहरति ॥ न चेति । आदित्यादिस्थे हरौ लोकाधिपत्यस्य पूर्वं पृथगेवोक्तत्वात् । तद्विषये च पश्चाल्लो-काधिपत्यस्य पृथगाधिपत्यस्य पृथगेवोक्तत्वात् । नादित्यादिस्थे हरावुक्तलोकाधिपत्यमेतज्ज्ञानफलतयोच्यत इत्युच्यते । न हि यद्ग्रामस्वामित्वं राज्ञस्तदेव राजनियुक्तपुरुषस्यापीति घटते । न चादित्यस्थेन हरिणैकीभूतस्य विदुषः पृथक् लोकाधिपत्यासंभव इति वाच्यं । सोऽमुनैवेत्यादिनाऽऽदित्यादिस्थहरितल्लोकाधिपत्यस्य विदुषस्तस्माद्धरेर्भेदेन स्पष्टमु-च्यमानत्वात् । न च सोऽमुनेत्यादिनाऽऽदित्यस्थपुरुषरूपेण विद्वांस्तांस्तान् लोकानाप्नोतीत्युच्यत इति वाच्यं । रूपेणेति शब्दस्याश्रवणात् । यदि सोऽमुनेतिवत्तत्स्थत्वेनेति श्रवणं स्यात् । तर्ह्यादित्यादिस्थेन रूपेण विद्वांस्तान् लोकानाप्नोतीत्य-यमर्थो युक्तः स्यात् । न चात्र तथा त्वतलादिप्रत्ययोऽस्ति भाववाचकोऽतो नासावर्थो युक्तः । किंचास्मिन्पक्षे ये चामुष्मादिति विदुषो मुक्तौ लोकाधिपत्यप्रतिपादकानि व्यर्थान्येव भवेयुः । किंतु य एतदेवं विद्वानयमसौ भवतीत्ये-तावदेव वाक्यं स्यात् । विदुषश्चादित्यस्थहरिलोकाधिपत्यस्थविदुषि सिद्धत्वादयमसौ भवतीत्येतद्वाक्यश्रवणं सोऽमुने- ॥१४॥

त्यादि व्यर्थं बहुवाक्यश्रवणं चेत्यादिदोषो दुर्निवारो जीवेशाभेदवादिन इत्यर्थः । अतो हिरण्मयपुरुषो दृश्यते हिरण्य-श्मश्रूर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदेति नाम स एष सर्वेभ्यः पाप्मभ्य उदित इत्यत्र पुंडरीकाक्षत्वादिना य आदित्यादिगतो निर्धारितो विष्णुस्तत्प्रसादात्स्थावरमुक्तजीवादैश्वर्यवंत एव ब्रह्मादयः क्रमेण गुणपूर्णाः । स्वं स्वमानंदं निरंतरमनुभवंतः समासत इत्युपसंहरति ॥ अत इति । घटशरावादीनामुदकेन पूर्णानां पूर्तौ तारतम्यमिव मुक्तब्रह्मादीनामप्यस्तीत्यभिप्रायः । अनेनाधिकारिकमंडलस्थोक्तैरित्यादेरर्थः उक्तो भवति । अधुनाऽयं भगवानाचार्यो यत्प्रसादादागमापारपारावार-तरणोपायन्यायप्लवरूपमिमं ग्रंथं कृतवान् । यं वाऽनेनाशेषविशेषपूर्णगुणगणपात्रतया प्रतिपादितवान् । यत्कारुण्येनैवं-विधामतिशुद्धां संविदं लब्धवान् । यत्कल्याणगुणेषु स्वस्य निरुपाधिका प्रीतिस्तं पुरुषोत्तमं पौनः पुन्येन नमति ॥ नमो नम इति । यस्येति श्लोकस्यायमर्थः । यच्छब्दश्रवणात्तच्छब्दोऽत्राध्याहर्तव्यः । यस्य वायोर्देवस्य वचने त्रीणि रूपाण्युदितानि तस्य यदेतत्तृतीयं रूपं । अमुना रूपेणायं केशवविषयो ग्रंथः केशवमेवोद्दिश्य कृतः । यदेतद्रूपत्रयप्रति-पादकं वेदवचनं बळित्था तद्वपुषेऽधायि दर्शतं देवस्य भर्ग इत्यादि तदर्थोऽत्र कथ्यते ॥ बदू इत्यादिना । तद्रूपत्रयं बदू बलात्मकं । दर्शतं भगवद्द्रष्टृ । भरणगमनयोगात् भर्गःशब्दाभिधेयं महन्महनीयं । इत्थं वक्ष्यमाणप्रकारेण विष्णुना निहितं । तत्र भगवतो रामस्य वचः सीतां प्रति नीतवत्तत्प्रथमं रूपं ; लूपव्याजदैत्यपृतनाक्षयकारि-

त्वात्पृक्षशब्दाभिधेयं द्वितीयं रूपं । मध्वशब्दाभिधेयानंदतीर्थाख्यं तृतीयं रूपं । तथा चोक्तं भाववृत्तादौ । हनुशब्दो ज्ञानवाची हनुमान्मतिशब्दितः । रामस्य वृत्तरूपस्य वाचस्तेनानयंत हि । भूतमो भीम इत्युक्तो वाचोमा मातरः स्मृताः । ऋगाद्या इतिहासश्च पुराणं पंचरात्रकं । प्रोक्ताः सत्याशिवास्तत्र श्रयो भीमस्ततः स्मृतः । मध्वित्यानंद उद्दिष्टो वेति तीर्थमुदाहृतं । मध्व आनंदतीर्थः स्यात्तृतीया मारुतीतनुः । इति सूत्रगतं रूपत्रयमेतन्महात्मनः । यो वेद वेदवित्सः स्यात्तत्त्ववित्तत्प्रसादतः । साधको रामवाक्यानां तत्समीपगतः सदा । हनूमान्प्रथमो ज्ञेयो भीमस्तु बहुशुग्रिपोः । पूतनाक्षयकारी च द्वितीयस्तु तृतीयकः । पूर्णप्रज्ञस्तथानंदतीर्थनामप्रकीर्तितः । दशेति पूर्णमुद्दिष्टं सर्वं पूर्णमिहोच्यते । प्रज्ञा प्रमितिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः । आसमंतात्पतितत्वेन गूढं कलियुगे हरिं । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं । वदद्भिर्गूहितं संतं तृतीयोऽसुर्मथायति । येन विष्णोर्हि वर्याख्यान्गुणानज्ञाशिशुर्वरान् । ईशा नासुः सूरयश्च निगूढा निर्गुणोक्तिभिः । त्रेतायां द्वापरे चैव कलौ चैते क्रमात्त्रयः । एतेषां परमो विष्णुर्नेता सर्वेश्वरः परः । स्वयं तु ब्रह्मसंज्ञोऽसौ परस्मै ब्रह्मणे नम इति । शास्त्रेणानेन प्रतिपाद्यं विष्णोस्तत्त्वं संक्षिप्य प्रदर्शयन् पुनः पुनः प्रणमति ॥ निःशेष इति । लक्ष्मीनारायणौ वंदे तयोर्यो भक्तिमत्तमः ॥ श्रीमदानंदतीर्थाख्यो गुरुस्तं च नमाम्यहं ॥ १ ईशाय नारायणसंज्ञकाय जन्मादिकर्त्रे जगतो नमोऽस्तु ॥ व्यासाभिधानाय तथा गुरुभ्योऽप्यानंदतीर्थाभिधया युतेभ्यः ॥ २ ॥ श्रीपद्मनाभयतिसिंधुसमुत्थितेयं सन्न्यायरत्नपरमावलिरुज्ज्वलालं ॥ भूयादशेषसुजनौघसुखैकहेतुः सूत्रानुभाष्यप-

ददीपनदीपरूपा ॥३॥ अशेषकल्याणगुणौघहेतुर्हरिः सुखात्माखिलदोषदूरः ॥ भक्त्या प्रपन्नस्य सुखैषिणः सदा करोत्वभीष्टं हि रमासहायः ॥ ४ ॥ इति श्रीमदानंदतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य चतुर्थःपादः ॥ ४-४ ॥ समाप्तोऽयं ग्रंथः ॥ ❁ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ अथ श्रीमदनुव्याख्यानटिप्पणी सन्न्यायरत्नावली समाप्ता ॥

॥ चतुर्थाध्यायः ॥